३०४ -a) द1 अनन्त (→अद्वैत) -c) ब1 दे1 सुसंवेद्यम् (→स्वसंवेद्यम्), दे1 अवेद्य च, दे4 तत्त्वम (→अवेद्य तत्), द1 ग्र1 म1 स्वसंवेद्यमवेद्य -d) का1 ब2 3 दे3 म1 द1 ग्र1 2 म1 पर, दे4 5 शिव (→परे), म1 व्योम-व्य° (→व्योम्नि व्य°), द1 पर व्योममव्ययम्

३०५ -a) दे9 सूक्ष्मेण (→सूक्ष्मेण), ब3 तमसा, दे1 ग्र2 तपसा, दे4 तमस (→तमसा) -b) दे1 8-10 म1 द1 ग्र1 म1 वेष्टित, दे4 वेष्ठित (→वेष्टिता), ग्र2 मूढितन्मायया जगत् -c) ब3 °सागरो घोरे, दे10 °सागरो घोरा (→°सागरे घोरे) -d) ग्र2 जायते (→जायन्ते)

३०६ -a) दे3 ग्र2 भक्ता (→भक्त्या), द1 ग्र1 2 म1 ह्यनन्यया (→त्वनन्यया), दे1 चैव (→राजन्) -b) ते1 मम (→सम्यक्), ग्र2 सम्यग्ज्ञानश्चैव हि -c) दे3 अन्वेष्टव्य (→अन्वेष्टव्य), दे10 च (→हि), दे1 त (→तद्) -d) ब2 °निवर्तते, ते1 °विमुक्तये (→°निवृत्तये)

३०७ -a) ग्र2 अहङ्कारश्च (→अहङ्कारं च) -b) ब1 दे3 8 ग1 ग्र1 3 मुवे काम, दे7 कर्न- (→कामं), ग्र1 2 मुवे मुए मुध क्रोध (→क्रोधं) -d) दे1 त्यक्ता दे3 त्यक्ता (→त्यक्त्वा)

३०८ का1 ○ -c) दे2 ग्नीक्ष्य, दे7 अन्वीक्ष, दे8 9 मुवे मुए मुब अवेक्ष्य, म1 अन्विष्य (→अन्वीक्ष्य), दे10 वीक्ष्य चात्मयमात्मानम -d) दे4 ब्रह्मरूपाय (→ब्रह्मभूयाय)

३०९ का1 ab ○ -a) ब3 दे2 म1 ब्रह्मभूत, दे3 ब्रह्मभुन, ग्र1 3 म1 सवभूत- (→ब्रह्मभूत) -b) दे3 सर्व-भूतो, द1 ग्र2 सर्वभून (→सर्वभूता), दे6 °भयप्रदम् (→°भय-प्रद), ते1 सर्वभूतानुकम्पक -c) दे1 8-10 मुवे मुए ऐश्वर्य, दे2 ईश्वरे (→ऐश्वरी), दे8-10 परम (→परमां), का1 ब1 3 द1 ग्र1 म1 शक्ति (→भक्ति) -d) का1 दे10 म1 विंदते, ते1 विवेना, द1 वेदात्मा- (→विन्देत), का1 चान्यगामिनीम्, दे1 द1 ग्र1 2 म1 नान्यभागिनीम्, दे4 नान्यगामिनीम्, दे8-10 मुवे मुए मुब -नन्यभाविनीम् (→नन्यगामिनीम्)

३१० -a) ब1 3 दे1-4 8 10 म1 द1 म1 मुवे मुए मुब वीक्ष्यते दे5 वाक्षते, (→वीक्षते) -b) का1 निष्कर, ब1 3 दे2 5 6 म1 ते1 द1 ग्र1 म1 ईश्वर (→ऐश्वर), ग्र2 •••ब्रह्मनिष्कलम् -c) ग्र2 सर्वपापविनिर्मुक्ता -d) दे2 ब्रह्मण्येवा•••••, दे4 ब्रह्मण्येवावतिष्ठते, दे10 ब्रह्मणश्च च निष्ठतो (?)

वें1.12 300 ब्रह्मणो हि प्रतिष्ठाऽयं परस्य परमः शिवः ।
अनन्तस्याव्ययस्यैकः स्वात्माधारो महेश्वरः ॥३११
ज्ञानेन कर्मयोगेन भक्तियोगेन वा नृप ।
सर्वसंसारमुक्त्यर्थमीश्वरं सततं श्रय ॥३१२
एष गुह्योपदेशस्ते मया दत्तो गिरीश्वर ।
अन्वीक्ष्य चैतदखिलं यथेष्टं कर्तुमर्हसि ॥३१३
अहं वै याचिता देवैः संजाता परमेश्वरात् ।
विनिन्द्य दक्षं पितरं महेश्वरविनिन्दकम् ॥३१४
धर्मसंस्थापनार्थाय तवाराधनकारणात् ।
मेनादेहसमुत्पन्ना त्वामेव पितरं श्रिता ॥३१५

स त्वं नियोगाद् देवस्य ब्रह्मणः परमात्मनः ।
प्रदास्यसे मां रुद्राय स्वयंवरसमागमे ॥३१६
तत्संबन्धाच्च ते राजन् सर्वे देवाः सवासवाः ।
त्वां नमस्यन्ति वै तात प्रसीदति च शंकरः ॥३१७
तस्मात् सर्वप्रयत्नेन मां विद्धीश्वरगोचराम् ।
संपूज्य देवमीशानं शरण्यं शरणं व्रज ॥३१८
स एवमुक्तो भगवान् देवदेव्या गिरीश्वरः ।
प्रणम्य शिरसा देवीं प्राञ्जलिः पुनरब्रवीत् ॥३१९
विस्तरेण महेशानि योगं माहेश्वरं परम् ।
ज्ञानं चैवात्मनो योगं साधनानि प्रचक्ष्व मे ॥३२०

---

३११ –a) दे8 9 मुवें मुए मुब ब्रह्मणोम, दे10 ब्रह्मा॥य (→ब्रह्मणो हि), का1 दे4 न1 प्रतिष्ठोऽय, ब1-3 दे3 6 तै1 मुब प्रतिष्ठेय, दे1 6-10 प्र2 प्रतिष्ठाया, दे5 प्रतिष्ठेह् (?) मुवें मुए प्रतिष्ठान (→प्रतिष्ठाऽयं); दे2 ****प्रतिष्ठेय –c) का1 ब3 दे5 6 अनन्यस्याप्यजस्यैक, ब1 दे1 अनन्यस्याव्य जस्यैक, प्र2 अनन्तस्याप्यजन्यस्य, दे2 अनन्यस्याव्ययस्यैव, दे3 अनन्यस्याथ यस्यैक दे4 न1 अनन्यस्याव्ययस्यैकं (न1 °क) दे8-10 मुवें मुए मुब अनन्यस्याव्ययस्यैकस्, तै1 अनन्यस्या व्यजस्यैक –d) दे3 स्वात्माचारो, दे8-10 मुवें मुए मुब चात्माधारो, प्र2 -स्य वा माधारो (?)(→स्वात्माधारो)

३१२ –b) ब1-3 दे3 5 6 8-10 न1 प्र2 मुवें मुए मुब भक्त्या (→भक्ति-), दे1 वं (→वा) –c) ब2 दे1 °मुक्त्य° (→°मुक्त्य°) –d) दे1 2 8-10 तै1 द1 प्र1 2 म1 मुवें मुए मुब शरण (→सततं), दे1 2 8-10 ब1 प्र1 2 म1 मुवें मुए मुब व्रज, दे3 6 न1 श्रय, दे5 श्रया (?) (→श्रय)

३१३ –a) दे3 द1 एव (→एष) –b) न1 म1 गिरीश्वर, प्र2 मुनीश्वरा (→गिरीश्वर) –c) दे3 अन्था (?) क्ष्य, दे5 अन्वीक्ष, द1 आन्वीक्ष्य (→अन्वीक्ष्य), दे1 सकल (→अखिल)

३१४ –a) दे4 च (→वं), दे10 याचितो, ग1 याचित (→याचिता), दे3 देवं (→देवैं), तै1 मह् पैवार्थितो देवं –b) द1 प्र2 म1 सस्मृता, प्र1 त्वत्स्मृता (→संजाता), दे1 परमेश्वर (→परमेश्वरात्), –c) दे3 10 दक्ष- (→दक्षं) –d) दे1 रत्नेश्वर° (→महेश्वर°), द1 °मनिन्दकम् (→°विनिन्दकम्)

३१५ –a) दे3 6 °स्थापनार्थंन्च, दे5 °रक्षणार्थाय (→°स्थापनार्थाय) –b) दे2 त्वदा° (→तवा°) –c) द1 2 म1 °देहात् (→°देह-), दे4 °समुत्पन्न- (→°समुत्पन्ना), दे1 मेनेदिह समुद्भूता –d) दे4 प्र2 त्वमेव, दे3 त्वामेवा (?) (→त्वामेव), का1 पितर श्रिता, द1 पितर श्रिया, प्र2 परमाश्रिता (→पितरं श्रिता)

३१६ –a) प्र2 नियागदेव° (→नियोगाद्देव°) –b) ग1 ब्रह्मण्य (→ब्रह्मण) –c) प्र1 °सोमा (→°से मा)

३१७ –a) द1 प्र1 प्र2 मत् (→तत्), दे1 °धे ते वे (?), दे3 °धाचिता, दे8-10 मुवें मुए मुब °धान्तरे, ग1 °धाच ते, प्र2 °धाच्चरे (→°धाच्च ते) –b) दे5 8-10 द1 सर्वे- (→सर्वे), दे1 सवान्धवा (→सवासवा) –c) दे10 नमस्यति (→नमस्यन्ति), ग1 चैतेन (→वै तात) –d) दे1 प्रसीदेति च, प्र2 प्रसीद तत (→प्रसीदति च)

३१८ द1 ⊙ –a) प्र2 तस्मै (→तस्मात्) –b) का1 ब1-3 दे1-6 न1 तै1 प्र1 म1 निन्दामी-, प्र2 निन्दाढो- (→मां विद्धी), का1 ब2 -गोचरीम्, दे1 -गोचयत, प्र2 -गोचरम् (→-गोचराम्) –c) का1 ब1-3 दे1-6 न1 तै1 प्र1 2 म1 सन्तपन्य (→संपूज्य) –d) प्र1 मामेव (→शरण्य)

३१९ –a) द1 स एवमुक्तो (?), दे1 एवमुक्ता भ, न1 एवमुक्तोऽथ (→स एवमुक्तो), का1 ब1 दे2 8 9 द1 प्र1 2 ग1 मुवें मुए मुब हिमवान् (→भगवान्) –b) ब3 देव्या दे2 देव, दे8-10 प्र2 देवो (→देव-), ब3 °देव-, दे10 °देव्यो (→°देव्या), प्र2 हिमेश्वर (→गिरीश्वर) –d) दे1 द1 प्राञ्जलि (→प्राञ्जलिः)

अन पर प्र2 पुस्तके अधिकम्—हिमवान्

३२० –a) प्र2 विस्तारेण (→विस्तरेण); प्र2 महेश्वरी, म1 महादेवि (→महेशानि) –b) दे1 3 योग-, प्र2 योगाद् (→योग), प्र2 महेश्वर (→माहेश्वर), प्र2 म1 परम्

तस्यैतत् परमं ज्ञानमात्मयोगमनुत्तमम् ।
यथावद् व्याजहारेशा साधनानि च विस्तरात् ॥३२१

निशम्य वदनाम्भोजाद् गिरीन्द्रो लोकपूजितः ।
लोकमातुः परं ज्ञानं योगासक्तोऽभवत्पुनः ॥३२२

प्रददौ च महेशाय पार्वतीं भाग्यगौरवात् ।
नियोगाद् ब्रह्मणः साध्वीं देवानां चैव संनिधौ ॥३२३

य इमं पठतेऽध्यायं देव्या माहात्म्यकीर्तनम् ।
शिवस्य संनिधौ भक्त्या शुचिस्तद्भावभावितः ॥३२४

सर्वपापविनिर्मुक्तो दिव्ययोगसमन्वितः ।
उल्लङ्घ्य ब्रह्मणो लोकं देव्याः स्थानमवाप्नुयात् ॥३२५

यश्चैतत् पठते स्तोत्रं ब्राह्मणानां समीपतः ।
देव्याः समाहितमनाः सर्वपापैः प्रमुच्यते ॥३२६

नाम्नामष्टसहस्रं तु देव्या यत् समुदीरितम् ।
ज्ञात्वाऽर्कमण्डलगतां संभाव्य परमेश्वरीम् ॥३२७

अभ्यर्च्य गन्धपुष्पाद्यैर्भक्तियोगसमन्वितः ।
संस्मरन् परमं भावं देव्या माहेश्वरं परम् ॥३२८

अनन्यमानसो नित्यं जपेदामरणाद् द्विजः ।
सोऽन्तकाले स्मृतिं लब्ध्वा परं ब्रह्माधिगच्छति ॥३२९ वं१.१२.३१८

(→परम्) –c) दे1-3 8 9 नं1 द1 ग्र2 मुवें मुए मुव. चैवा° (→चैवा°); दे10 °त्मना योग, ग्र2 °त्मयोग या (→°त्मत्तो योगं) –d) दे3 साधर्म्याणि (→साधनानि); का1 दे5 ग्र1 प्रपश्च मे, दे8 6 प्रचक्ष्व मे (→प्रन्त्य मे).

३२१. –a) व2 दे1 4 नं1 द1 ग्र1 तस्मै, दे8 तथै- (→तस्यै-); दे8 9 परमेशानम् (→परमं ज्ञानम्) –b) दे8 9 मुवें मुए मुव आत्मनो योगमु°, द1 ग्र1 2 म1 मायायोगमनु°, (→आत्मयोगमनु°). दे1 आत्मयोगरामुद्भवम्, मुवें मुए मुव आत्मना योगमुत्तमम् –c) का1 व्याजहारेश, व3 व्याजहारेणा, दे3 व्याजहरि (?) (→व्याजहारेशा).

३२२ –b) दे8 गिरीशो (→गिरीन्द्रो) –d) दे1 योगासक्तो(?), तें1 योग शक्तो, ग्र1 योगसिद्धो, म1 योगसक्तो (→योगासक्तो)

३२३ –a) दे8 प्रददौव (→प्रददौ च), दे1 *मेशाय (→महेशाय) –b) दे1 3 8 द1 पार्वती- (→पार्वतीं), दे2 चावय°, दे6 योग्य° (→भाग्य°), नं1 °गौरवाम् (→गौरवात्) –c) दे10 नियोगब्राह्मण (→नियोगाद् ब्रह्मण); व1 दे1 10 द1 ग्र2 मुवें मुए साध्वी, ग्र1 पुत्री (→साध्वीं), म1 नियोगाद् ब्रह्मणस्पर्षि –d) दे2 चापि (→चैव), दे1 देवताना च सनिधौ, तें1 दत्तवान् धर्मसंनिधौ

३२४ –a) का1 व3 दे1-3 5 6 10 नं1 द1 इदं (→इमं), व1 दे1 पठ्यते (→पठते), द1 ध्यान (→[प्र]ध्याय) –b) ग्र2 °त्म्यमुत्तमम् (→°त्म्यकीर्तनम्). –c) दे1 भूत्वा (→भक्त्या) –d) व1 ग्र1 म1 शुद्धस् (→शुचिस्), व1 सद्भाव°, दे2 तद्गत°, तें1 मद्भाव°(→तद्भाव°), दे2 °मानस, दे4 °भावित. (→°भावित).

३२५ म1 ⊙, दे3 8 ab ⊙ –a) व1 °माया° (→°पाप°) –b) व2 3 देव्या, दे1 दे*, दे2 देव्या, + दिव्य, ग्र2 देव्ये (?)(→दिव्य), व2 3 योग(→योग-), व2 3 समाश्रित (→समन्वित) –c) दे10 लोके (→लोक). –d) का1 दे1 2 4 6 8 10 देव्या (→देव्याः), दे3 लोकम् (→स्थानम्), ग्र2 च माप्नुयात् (?)(→मवाप्नुयात्).

३२६ म1 ab ○ –a) व1 दे1 पठ्यते, दे4 पठिते, दे8 9 मुवें मुए पठति, दे10 पठितं (→पठते), द1 ग्र1 2 यस्तु मत्यं पठेत्स्तोत्र –c) दे8-10 मुवें मुए मुव. समाहितमना सोऽपि. –d) दे1 किल्विषैं संप्रमुच ते(?)

३२७ दे6 ab पादयो 'यत्' इति यावत् खण्डितम्. –b) म1-या (→यत्), दे1 देवमाहेश्वर प *, तें1 देवरूपमुदीरितम् –c) तें1 गत, ग्र2 मुवें मुए मुव. °गता (→°गतां) –d) व1 दे1 तें1 ग्र1 2 म1 समाध्य, दे8-10 मुवें मुए मुव प्राकाह्य (→संभाव्य), दे3 परमेश्वरी, तें1 परमेश्वरम् (→परमेश्वरीम्).

३२७ श्लोकस्य b चरणानन्तरम् दे1 पुस्तके अधिकम्—
अनन्यमनसो नित्य जपेदामरणाद् द्विज ।
सोंतकाले स्मृति लब्ध्वा पर ब्रह्माधिगच्छति ॥
अथवा जायते विप्रो ब्राह्मणाना कुले*यो ।
पूर्व संस्कारमाहात्म्या ब्रह्मविद्यामवाप्य स ॥
संप्राप्य योग परमं दिव्या यत्समुदीरितम् ।
(=३२६–३३१b)

b चरणानन्तरं म1 पुस्तके ३२५–३२७ ab आवृत्तम्.

३२८. –a) दे5 अभ्यर्च्यं (?)(→अभ्यर्च्य), दे10 अभ्यर्च्य पुष्पगन्धाद्यैर्. –c) दे4 संस्मरन्नीश्वर भावम्. –d) दे0 म1 पद (→परम्), दे1 देव्य दत्परमेश्वरम्.

३२९ दे1 ⊙ (पूर्वमागतम्; द्र. ३२७ पा. टि.) –a) दे2 ग्र1 °मनसा, दे4 10 ग्र2 °मनसो (→°मानसो). –b) दे1-3 8 तें1 म1 आ (दे3 म) मरण, दे4-10 आमरण- (→आम-

वें१ १२ ३१६ अथवा जायते विप्रो ब्राह्मणानां कुले शुचौ ।
पूर्वसंस्कारमाहात्म्याद् ब्रह्मविद्यामवाप्य सः ॥३३०
संप्राप्य योगं परमं दिव्यं तत् पारमेश्वरम् ।
शान्तः सर्वगतो भूत्वा शिवसायुज्यमाप्नुयात् ॥३३१
प्रत्येकं चाथ नामानि जुहुयात् सवनत्रयम् ।
पूतनादिकृतैर्दोषैर्ग्रहदोषैश्च मुच्यते ॥३३२
जपेद् वाऽहरहर्नित्यं संवत्सरमतन्द्रितः ।
श्रीकामः पार्वतीं देवीं पूजयित्वा विधानतः ॥३३३
संपूज्य पार्श्वतः शंभुं त्रिनेत्रं भक्तिसंयुतः ।
लभते महतीं लक्ष्मीं महादेवप्रसादतः ॥३३४
तस्मात् सर्वप्रयत्नेन जप्तव्यं हि द्विजातिभिः ।
सर्वपापापनोदार्थं देव्या नाम सहस्रकम् ॥३३५
प्रसङ्गात् कथितं विप्रा देव्या माहात्म्यमुत्तमम् ।
अतः परं प्रजासर्गं भृग्वादीनां निबोधत ॥३३६

इति श्रीकूर्मपुराणे षट्साहस्र्यां संहितायां पूर्वविभागे एकादशोऽध्यायः ॥११॥

रणाद्), का1 व2 3 दे3 8 द्विजा (→द्विज), दे2 जपेत्स°म-मतन्द्रित, प्र2 जपेदामरणाद्विप -c) का1 व2 दे3 6 स तु(दे3 °तु), प्र2 सोऽन्त (→सोऽन्त-), दे6 रमृतिर् (→स्मृति), दे4 8 सश्चा (→लब्ध्वा) -d) व1 3 ब्रह्मादिगच्छति, द1 प्र1 2 म1 ब्रह्माधिरोहति (→ब्रह्माधिगच्छति), दे10 परमब्रह्मणाधिकम्

३३० दे1 O (इ ३२७ पा टि). -a) म1 अथ वा (→अथवा) -b) दे6 ब्राह्मणश्च, दे8-10 मुवें मुए ब्राह्मणस्य (→ब्राह्मणानां), प्र2 कुल (→कुले), दे8 10 द1 प्र1 ग1 कुलेे, प्र2 शुभ (→शुचौ), व1 दे3 तै1 ब्राह्मणानां कुलेषु वै -c) व1 दे8-10 सर्व° (→पूर्व°), व3 दे3 °माहात्म्या(?), दे6 °माहात्म्य(→°माहात्म्याद्) -d) दे8 9 मुवें मुए मुब अवाप्नुयात, दे10 माहात्म्या(?), दे10 अवाप्स्यसि द1 प्र1 2 ग1 अवाप्य च (→अवाप्य स)

३३१ दे1 ab O (इ ३२७ पा टि) -b) दे5 दिव्ये (→दिव्य), व1 दे3 10 न1 परमे (नामी) श्वरम्, म1 पारमेश्वरम (→पारमेश्वरम्) -c) व2 शान्तास (→शान्त), दे8 10 मुवें मुए मुब सुमयतं, तै1 समगतो (→सर्वगतो)

३३२ -a) का1 व1-3 दे8 9 न1 द1 प्र1 2 ग1 चा, (→चा-), द1 प्र1 2 म1 [प्र]पि (→[थ]प), तै1 प्रत्येक वा **** -b) का1 दे8 10 कुसुम°, व1 सवन°, दे3 वत्सर° (→सवन°), न1 जुहुयात्सवने त्रयम द1 प्र1 2 म1 जुहुयाद्भुवनत्रयम -c) दे8 10 मुवें मुए मुब महामारि° (दे10 °री) (→पूतनादि°) -d) दे4 द1 प्र1 2 म1 प्रमुच्यते (→च मुच्यते)

३३३ -a) द1 प्र1 2 म1 °दहरहर् (→वाऽहरहर्)

३३४ -a) दे8 9 सार्द्धत, दे10 सार्धन, द1 वाराणतश्, प्र2 पार्वतस् (→पार्श्वत) -b) द1 प्र1 2 म1 शक्तिसंयुतम् (प्र2 °त) (→भक्तिसंयुत.) -ab) व1 संपूज्य पार्श्वतो विप्रा देव्या नामसहस्रकम् -c) प्र2 म1 लभेत (→लभते), व1 दे1 महती (?) (→महतीं) -d) दे1 °प्रभावत (→°प्रसादत)

३३५ -b) दे1 प्रजप्तव्य च, प्र2 तमव्य हि (→जप्तव्य हि) -c) दे2 द1 प्र1 2 म1 सर्वपापप्रणाशार्थं -d) तै1 देव, + देवी (→देव्या)

अत पर दे8 10 मुवें मुए अधिकम्—सूत उवाच

३३६ -a) दे3 कथिता (→कथित) -c) दे1 तत पर (→अत पर) -d) दे8 भृत्यादीनां (→भृग्वादीना), व3 दे1 निवोधत, दे6 निबोध त(?) (→निबोधत)

पुष्पिका —

पुराणनाम—का1 दे1 2 5 6 8 10 द1 प्र1 2 म1 मुवें मुए इति श्रीकूर्मपुराणे, व1 इत्यादिकौर्मे, व2 3 दे3 इति कूर्मपुराणे, दे4 न1 तै1 इत्यादिमहापुराणे श्रीकौर्मे(दे4 कौर्म्ये), मुप इति श्रीकौर्मे महापुराणे पूर्वभागे अध्यायनाम—का1 व1 3 दे3 6 न1 तै1 प्र2 O, व2 दे1 देव्या नामसहस्रकं, दे3 देव्याष्टोत्तर सहस्रनाम, दे8 10 मुवें मुए देव्या माहात्म्ये, द1 प्र1 देवीसहस्रनामधेये, म1 देवीसहस्रनामधेयो नाम, मुब देवीमाहात्म्ये देव्या नामसहस्रकथन नाम अध्यायसंख्या—व2 दे8 O, का1 व1 3 दे2-5 न1 तै1 एकादशोऽध्याय, दे1 8 10 द1 प्र1 2 म1 मुब मुए मुव द्वादशोऽध्याय ॥१२॥

अध्यायसमाप्तौ अधिकम्—दे8 10 इति गौरीसहस्रनाम-दे9 गौरीसहस्रनाम, न1 दुर्गासहस्रनामाख्यान नाम

१२

सूत उवाच ।*

भृगोः ख्यात्यां समुत्पन्ना लक्ष्मीर्नारायणप्रिया ।
देवौ धाताविधातारौ मेरोर्जामातरौ तथा ॥१

आयतिर्नियतिर्मेरोः कन्ये चैव महात्मनः ।
धाताविधात्रोस्ते भार्ये तयोर्जातौ सुतावुभौ ॥२

प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः ।
तथा वेदशिरा नाम प्राणस्य द्युतिमान् सुतः ॥३

मरीचेरपि संभूतिः पौर्णमासमसूयत ।
कन्या चतुष्टयं चैव सर्वलक्षणसंयुतम् ॥४

तुष्टिर्ज्येष्ठा तथा वृष्टिः कृष्टिश्चापचितिस्तथा ।
विरजाः पर्वतश्चैव पौर्णमासस्य तौ सुतौ ॥५

क्षमा तु सुषुवे पुत्रान् पुलहस्य प्रजापतेः ।
कर्दमं च वरीयांसं सहिष्णुं मुनिसत्तमम् ॥६

तथैव च कनीयासं तपोनिर्धूतकल्मषम् । वि. १.१२.७

१२

[अध्यायारम्भे अधिकम्–दे10 गौरीसहस्रनाम, द1 श्रीरामाय नम]

* द1 प्र1. ⊙, ना1 सूत, ते1 श्रीशिव सूत, प्र2 कूर्म, म1 श्रीकूर्म

१. –a) दे2 भगो, प्र1 ॐ भृगो (→भृगो), दे3 6 प्र2 ख्याता (दे3 °ता) (→ख्यात्यां), दे10 समुत्पन्ना (→समुत्पन्ना) –c) दे4 दिवौ (→देवौ), दे1 ना1 ते1 म1 धातृ° (→धाता°), प्र2 देवौ धातृश्च मार्कण्डेय, + देवौ धाताविधातारौ –d) दे1 मेनोर्, दे6 प्र2 मरो (→मरार्), दे1 2 द1 म1 उभौ, दे8-10 प्र1.2 मुवें मुए, मुव मुभौ (→तथा).

२ दे1. ⊙ (द, प.), का1 २c–३d ○ –a) बा1 दे3 मायानिर्, प्र1 मयानिर् (→प्रायनिर्), दे10 नियतम् (→नियतिर्), दे2.8-10 द1 प्र1.2 म1 मुवें मुए मुव चैव (→मेरो) –b) दे2.3 10 द1 प्र1.2 म1 मुवें मुए मुव मेरो कन्य (द1 °न्या) (→कन्ये चैव). –c) दे2 प्र2 धात्रा (→धाता), दे8-10 मुव मुए मुव तयोर्धातृविधातृभ्या –d) दे3 तपोर्जानी, दे8 10 मुवें मुए. मुव यौ च जातौ (→तयोर्जातौ), दे10 इभौ (→उभौ).

३ वा1. ⊙. –a) व3 प्राणश्चैव, प्र2 प्रोधाणेन (→प्राणश्चैव). –b) दे1 ना1 मृकण्डुश्च, दे3 6 8-10 मृकण्डु, प्र2 म1 मृकण्डूस (→मृकण्डुत). –c) दे4 तनो, द1 प्र1 म1 तथ (→तथा), दे4 10 ना1 °शिरो (→°शिरा). प्र2 यधिवेद-शरा नाम. –d) प्र2 प्राणस्य (→प्राणस्य), दे4 मतिमा (?) (→द्युतिमान्), दे4 सुत, द1 प्र1 2 म1 पुत्र (→सुत).

४ –a) दे4 मरीचिरपि, दे8 मरीचेरपि-, दे10 मारीचेरपि (→मरीचेरपि) –b) दे8-10 मुवें मुए, मुव पूर्ण°, प्र2 पौर्णि° (→पौर्ण°) –c) द1 चतुष्टये (→चतुष्टय), ना1 जात (→चैव) –d) प्र1 सयुतंसर्वलक्षणं .

५ –a) का1 दर्पर्, व1 दष्टिर्, व2 म1 दृष्टिर् व3 दे1 2 5 6 हृपिर्, दे8-10 श्रपिर् (वे10 °ष्टिर्), द1 ते1 कृष्णिर्, ना1 हृपि-, प्र1 दृष्टी(→तुष्टिर्), म1 प्र2 जेष्ठ(→ज्येष्ठा), वा1 व3 तयो दष्टि, व1 ते8 तपो वृष्टि, व2 ततो दृष्टि, दे3 म1 तथा दष्टि दे4 तथा कृष्णि, दे5 तमो तुष्टि, म1 ततो वृष्टि, ते1 तथाधृष्टि, प्र2 तथा गृष्टि (→तथा वृष्टि), दे3 कृषिश्चैवापचो दृष्टि (?) द1 कृष्टिज्येष्ठस्तथा हृष्टिर् –b) व1 2 हृष्टिर्, दे2 5 8 9 ना1 ते1 कृपिर्, दे3 6 दृष्टश्, दे10 श्रपिर्, द1 प्र1 म1 तुष्टिश् (→कृष्टिश्), दे1 10[म]पि (→[प]च-) –c) ना1 विराज, द1 प्र1 2 म1 विजय (→विरजाः), व3 विरजा पर्वतावैव –d) दे8 9 मुवें मुए मुव पूर्ण°, प्र2 पौर्णि° (→पौर्ण°), दे5 6 तौ (→तौ). दे1 पौर्णमास्यसुतावुभौ

६ –a) ते1 भार्या (→पुत्रान्) –b) व2 पुलहाख्य, दे1 द1 प्र1 2 पुलस्त्यस्य (→पुलहस्य) –c) वा1 व3 ना1 कर्दमश्च (वा1 °श्चा)वरीया (व3 °या)स, व1.2 कर्दमश्चा(व2 °श्च) वरीयान् (व2 °का) म, दे1 कर्दम पार्वरीयासम, दे3 कर्दमश्चापरीयां महत्, दे6 कर्दमश्चात्र ॰ यांस, दे8-10 कर्दम पार्वरीयांस, ते1 कर्दमश्चापरीयांसम्, प्र2 कर्दमश्च वरीयास –d) द1 प्र2 सहिष्णुर् (→सहिष्णु), दे1 °सुतम, ते1 °सत्तम (→°सत्तमम्).

७ –a) वा1 तथा एव कनीयासम्, व1 तथास्त कनीयांसं, व2 तथा पतकनीयासम्, व3 तथा पुनरवरीयासम्, दे1 तथावत

वा.१.१३.७ अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान् ॥७
सोमं दुर्वाससं चैव दत्तात्रेयं च योगिनम् ।
स्मृतिश्चाङ्गिरसः पुत्रीर्जज्ञे लक्षणसंयुताः ॥८
सिनीवालीं कुहूं चैव राकामनुमतिं तथा ।
प्रीत्यां पुलस्त्यो भगवान् दत्तात्रिमसृजत् प्रभुः ॥९
पूर्वजन्मनि सोऽगस्त्यः स्मृतः स्वायंभुवेऽन्तरे ।
वेदबाहुं तथा कन्यां सन्नतिं नाम नामतः ॥१०
पुत्राणां षष्टिसाहस्रं संततिः सुषुवे क्रतोः ।
ते चोर्ध्वरेतसः सर्वे बालखिल्या इति स्मृताः ॥११
वसिष्ठश्च तथोर्जायां सप्तपुत्रानजीजनत् ।
कन्यां च पुण्डरीकाक्षां सर्वशोभासमन्विताम् ॥१२
रजोहश्चोर्ध्वबाहुश्च सवनश्चानघस्तथा ।
सुतपाः शुक्र इत्येते सप्त पुत्रा महौजसः ॥१३
योऽसौ रुद्रात्मको वह्निर्ब्रह्मणस्तनयो द्विजाः ।
स्वाहा तस्मात् सुतान् लेभे त्रीनुदारान् महौजसः ॥१४
पावकः पवमानश्च शुचिरग्निश्च ते त्रयः ।
निर्मथ्यः पवमानः स्याद् वैद्युतः पावकः स्मृतः ॥१५

कनीयासो, दे2 तथा कनक्पीडाश्च, दे10 तथा पल्वनपीवामं, दे8-10 तथा चनश्ती (दे10 °ती) नाम, मे1 द1 ग्र1 मे2 तथा च (म1 च)नकपीनाम, दे1 तदापरक ***, प्र2 तथा चनकचीवाना –b) च2 तथा निर्धूत°, च3 द1 ग्र1 2 म1 तयोर्निर्धूत° (ग्र2 °य) (→तपोनिर्धूत°) –c) दे1 2 8 मनु° (→मन°), दे1 चाय पुत्रेर्, न1 तथैवात्रे, प्र2 तथैवात्रेर् (→तथैवात्रेर्). –d) दे1 पत्ने पुत्र- (?)(→जज्ञे पुत्रान्).

८. ग्र1 ८ ६ ⊙ –c) च3 दे1 2 8-10 द1 म2 मुत्रे मुए. मुब पुत्री, दे3 पुत्राज्, द4 5 ते1 पत्नी, दे6 पुत्रा (→पुत्रीर्) –d) न1 च2 3 दे1 3 5 6 8 9 ते1 ग्र1 2 म1 मुत्रे मुए मुब °मयुता, दे2-4 न1 °संयुता (→°संयुता)

९. च1 ○ –a) दे1 3 6 सिनीवाली (→सिनीवालीं), दे1 कुहूंचैव, दे6 कुहूर्चैव (→कुहूं चैव) –b) न1 दे5 8 10 ते1 द1 ग्र1 2 म1 मुत्रे मुए. मुब राकामनुमतीमपि, च2 3 राका चा (च1 मा)नुमतीमपि, दे1 2 राका (दे2 मा) चानुमति तथा, दे3 6 सोकाचानुमतीस्तथा, दे1 राकामरममनामपि. –c) ते1 प्रयां, द1 प्रीत्या (→प्रीत्यां), दे6 पुलस्त्य (→पुलस्त्यो) –d) दे1 दत्ती विसृ°, दे6 दत्तात्रेय°, दे8-10 दत्तोत्रिम°, न1 दत्तात्रिम°, द1 ग्र1 म1 मुब दत्तात्रिम°, प्र2 मुत्रे मुए दम्भात्रिम° (→दत्तात्रिम°)

१० –a) न1 च2 3 दे1 4 5 म1 द1 ग्र1 2 म1 पौलस्त्य (दे1 स्य, °दे3 °स्या, म1 च2 °स्य) (→सोऽगस्त्य) –b) दे1 स्वायंभवोंतरे, ते1 द1 स्वायंभुवोंतरे (→स्वायम्भुवेऽन्तरे) –c) दे1 देवबाहु तथा कन्यां, दे1 देवबाहुं तथा कन्यां, दे6 8-10 मुत्रे, मुए मुब देवबाहुस्तथा कन्या (दे10 °न्या) –d) च2 सुमति, द1 10 सिनीवाली, दे4 6 8 प्र2 मुत्रे, मुए मुब [illegible], म1 सन्नतीं, ते1 सन्नतिं, द1 म1 सन्नति, ग्र1 सन्नतिं (→सन्नतिं)

११ –b) न1 सन्नती, न1-3 दे1-3 ते1 सन्नति, दे1 [illegible], म1 सन्नति (→सन्नतिं), दे3 सुषुव तदा, द5 सुषुवे क्रतो, दे6 सुषुवे रक्रते, न1 सुषुवे क्रतो, (→सुषुवे क्रतोः), प्र3 संतति साभीतिस्सुहते –c) दे1 तदूर्ध्व°, दे10 न चोर्ध्व° (→ते चोर्ध्व°), दे3 ते सर्वे सप्तते पुत्रा, दे6 सप्तोर्ध्वाः सुशिता मर्यां –d) च1-3 दे8 बालि° (→बाल°), दे1 श्रुत (→स्मृता)

१२ –a) दे2 10 न1 वसिष्ठस्य, द1 ग्र1 म1 वसिष्ठाच्च (→वसिष्ठश्च), दे2 ततो भार्या, दे1 म1 ततो वा (न1 °र्जा) या, द1 ग्र1 2 म1 तथैवोर्जा (→तथोर्जायां) –c) प्र2 कन्याश्च (→कन्यां च), न1 *****, च1 दे6 पुण्डरीकाग, च2 दे2 दे5 द2 ग्र1 2 म1 पुण्डरीकाक्षीं, दे1 न1 पुण्डरीकाक्ष्या (न1 °क्ष्या), ते1 पुण्डरीकाग (→पुण्डरीकाक्षां)

१३ –a) न1 रजोहश्चोर्द्धबाहुश्च, च1 राजाश्चोर्द्ध-बाहुश्च, दे1 रजोहश्चोर्द्धबाहुश्च, दे2 ते1 रजोहश्चोर्ध्वबाहुश्च, दे4 रजोहगोर्द्धबाहुश्च दे5 राजाहश्चोर्ध्वबाहुश्च, दे8 10 मुत्रे मुए मुब रजोगात्रोर्ध्व (दे8 10 °द्ध°) बाहुश्च (मुत्रे मुए °श्च), द1 ग्र1 2 म1 रजोम(द1 °ह°)श्चोर्ध्वबाहु, –b) न1 सवनश्चानघस्तथा, दे2 सवन सनकस्तथा, + सवन-श्चानघस्तथा, दे4 सवनश्चानघस्तदा, दे5 सवनश्चानघस्तथा, द1 ग्र1 2 म1 सवनश्चावनघस्तथा, मुत्रे सवनश्चानघस्तथा, –c) दे1 6 सुतप (→सुतपा), न1 दे10 द1 शत, ते1 शक (→शुक्र) –d) दे6 महौजसा (→महौजस)

१४ –b) प्र2 ब्रह्मणस्तेनवाद्विजा –c) द1 सुता (→सुतान्); च2 स्वाहा तस्मात्सुतांल्लेभे, दे2 तस्मात्स्वाहा सुता-ल्लेभे –c) म1 पान् (→त्रीन्), न1 च1-3 दे3-6 म1 ते1 त्रीनुदारानिमौजस, दे2 त्रीनगौरमितौजस

१५ दे1 15b–15a ⊙ (ए. म). दे1 15 cd ○ –a) च3 पवनश्चैव (→पवमानश्च), म1 शु (→च) –b) द1 शुचिर् (→शुचिर्), मुत्रे मुए मुब [illegible] (→त्रयः),

यश्चासौ तपते सूर्यः शुचिरग्निस्त्वसौ स्मृतः ।
तेषां तु संततावन्ये चत्वारिंशच्च पञ्च च ॥१६
पावकः पवमानश्च शुचिस्तेषां पिता च यः ।
एते चैकोनपञ्चाशद् वह्नयः परिकीर्तिताः ॥१७
सर्वे तपस्विनः प्रोक्ताः सर्वे यज्ञेषु भागिनः ।
रुद्रात्मकाः स्मृताः सर्वे त्रिपुण्ड्राङ्कितमस्तकाः ॥१८
अयज्वानश्च यज्वानः पितरो ब्रह्मणः स्मृताः ।
अग्निष्वात्ता बर्हिषदो द्विधा तेषां व्यवस्थितिः ॥१९
तेभ्यः स्वधा सुतां जज्ञे मेनां वैतरणीं तथा ।
ते उभे ब्रह्मवादिन्यौ योगिन्यौ मुनिसत्तमाः ॥२०
असूत मेना मैनाकं क्रौञ्चं तस्यानुजं तथा ।
गङ्गा हिमवतो जज्ञे सर्वलोकैकपावनी ॥२१
स्वयोगाग्निबलाद् देवीं लेभे पुत्रीं महेश्वरीं ।
यथावत् कथितं पूर्वं देव्या माहात्म्यमुत्तमम् ॥२२ वें.१.१३.१२

दे4 शुचिस्तेषां पिता च य -c) का1 निमन्थातु, ब1 निमन्थु, ब3 दे5 निर्मन्थ्य (दे5 °न्थ्य), दे1 8 निर्मथ्य, न1 निर्मथ्य, प्र2 निर्बध्य, म1 निर्मल (→निर्मथ्य). का1 दे6 पवमाना स्याद दे8 पवमानश्च, न1 ते1 पवमानस्य (→पवमान स्याद्), दे3 निर्मन्थ्यया च मानश्च, प्र1 निर्मन्थ्य पावमानिस्य

१५ श्लोकानन्तर म1 पुस्तके अधिकम्—

1 * योर्वधशुचिस्मृतोग्निस्तु सदाजलनिवासक ।

१६. दे0 ⊙ (द्र १५ पा टि), दे4 10 द1 प्र1.2 म1 ab ⊙ -a) दे1 8 9 ते1 मुवें, मुए मुव सूर्यं (→सूर्य°) -c) दे1 द1 प्र1 2 म1 च (→तु), ब3 सन्ततास्त्वन्ये, दे1 सन्तरावन्ये, दे10 सततो बन्ये, द1 प्र1 म1 सन्ततो जज्ञे, प्र2 सन्ततेर्जज्ञे (→सन्ततावन्ये). -d) का1 च1.3 दे5 न1 तु (→च) द1 पचक, प्र2 पचम (→पञ्च च)

१७ दे6 a ⊙ -a) द1 प्र1.2 म1 तु (→च), दे8-11 मुवें मुए मुव पवमान पावकश्च.-b) ब3 पितुस् (→शुचिस्), का1 पितामिस, दे1 महानल दे2 पितामध, + पितामह, ते1 पितापर (→पिता च य) -c) का1 दे2 एकोन° (→चैकोन°) -d) का1 म1 समन्य (→वह्नय), ब3 द1 प्र1 °कीर्तित (→°कीर्तिता)

१८. -a) ब3 तेजस्विन (→तपस्विन). -b) ब3 सर्व- (→सर्वे), दे1 योगिन, दे8-10 भोगिन, द1 प्र1 भाविन (→भागिन), दे1 सर्वे भाग्येषु भोगिन. -c) दे1 3 8 10 रुद्रात्मिका (→रुद्रात्मका), न1 होते (→सर्वे), ब1 रुद्रात्मकाश्च ते सर्वे -d) का1 त्रिपुरान्कि°, दे1 त्रिरुद्राङ्कित° (→त्रिपुण्ड्राङ्कित°), दे9.10 °मस्तका (?) (→°मस्तकाः)

१९. -a) द1 प्र1 2 म1 स (→च), ब1 यज्वाना, दे1 विज्वान (→यज्वान) -b) दे4 9 इतरे (→पितरो), का1 ब्राह्मणा, प्र2 ब्राह्मण (→ब्रह्मण), ब2 दे2.8-10 ते1 प्र2 मुवें मुए मुव. सुता, दे1 शुभा (→स्मृता). -c) दे3 वह्निर्दोषो (→बर्हिषदो) -d) दे6 प्र2 व्यवस्थित (→व्यवस्थिति).

२०. प्र2. २०b-२१c ⊙ (द्र. स) -a) ब3 दे3 8 स्वधा सुत ज (दे8 य°) ज्ञे, दे1 5 स्वधा सुता जज्ञे, दे2.8-10 ते1 द1 म1 स्वधा सुते य(दे2 ते1 द1 म1 ज) ज्ञे, दे4 प्र1 सुधा सुत य(प्र1 ज)ज्ञे, न1 स्वधा सुधा जज्ञे, प्र2 सुता स्वधाजज्ञे (→स्वधा सुता जज्ञे) -b) दे4 5 10 द1 प्र1 म1 मेना, दे8 तेना (→मेना), दे2 वैतरिणी, दे8-10 म1 ते1 मुवें. मुए मुव. वै धारिणी (दे10 °णी) (→वैतरणी). -c) का1 उभे ते, दे4 उभे च (→ते उभे). -d) ब2 स्मृते च (→योगिन्यौ), ब1 °सत्तम, वे8 °सत्तमा (→°त्तमा)

२१ प्र2 abc ○ (द्र २० पा टि). -a) दे1 प्रसूत, दे8 प्रभुत (→असूत), दे4 मेना (→मेना), ब3 दे10 मेनाक, दे1 मैनाकं- (→मैनाक) -b) ब2 3 ते1 क्रौञ्चस् (→क्रौञ्च), का1 ब3 दे5.8 °स्मज, ब3 दे3 ते1 °स्मजस्, दे1 4 °नुजस् (→°नुज), द1 क्रौञ्चा ईस्तज तथा -c) दे8 यदा (→गङ्गा), दे8 यज्ञे (→जज्ञे) -d) का1 °लोकस्य (→°लोकैक-)

२२ -a) वे8 10 स्वयोगात्म°, न1 स्वदेवाग्नि°, प्र2 स्वयोपाग्नि° (→स्वयोगाग्नि°), का1 दे8 °बलादेवी (दे8 वी), म1 °बलान्देवी, ब3 °बलाद्देवी, दे2 °बलाच्चैव, दे2 8-10 म1 °बलाद्देवी (→°बलाद्देवी), ब2 स्वयोगाग्निश्रयाद्देवीं, दे1 योगाग्निधवला चैव -b) प्र1 लेभे पुत्रीम्, दे8 लेभे पुत्रान्, दे8 10 पत्नि लेभे, मुवें मुए मुव पुत्रीं लेभे (→लेभे पुत्री), दे8-10 महेश्वर (→महेश्वरीम्)- -c) द1 प्र1 2 म1 सर्वं (→पूर्वं)

दे8-10 मुवें मुए पुस्तकेषु २२ श्लोकानन्तर अधिकम्—

वं.१.११.२८ एषा दक्षस्य कन्यानां मयाऽपत्यानुसंततिः । व्याख्याता भवतामद्य मनोः सृष्टिं निबोधत ॥२३

इति श्रीकूर्मपुराणे षट्साहस्र्यां संहितायां पूर्वविभागे द्वादशोऽध्यायः ॥१२॥

१३

सूत उवाच ।*

प्रियव्रतोत्तानपादौ मनोः स्वायंभुवस्य तु ।
धर्मज्ञौ सुमहावीर्यौ शतरूपा व्यजीजनत् ॥१
ततस्तूत्तानपादस्य ध्रुवो नाम सुतोऽभवत् ।
भक्तो नारायणे देवे प्राप्तवान् स्थानमुत्तमम् ॥२
ध्रुवात् श्लिष्टिं च भव्यं च भार्या शम्भुर्व्यजायत ।
श्लिष्टेराधत्त सुच्छाया पञ्च पुत्रानकल्मषान् ॥३
वसिष्ठवचनाद् देवी तपस्तप्त्वा सुदुश्चरम् ।
आराध्य पुरुषं विष्णुं शालग्रामे जनार्दनम् ॥४

* • पार्थिवः महाराजस्य एषा एवमपालना ।
देवो धा[illegible] मनोर्वैमानरात्मजौ । (= १cd)

२३ –a) व₁ एषा, दे₅ मुता (→एषा), व₂ कन्यानां (→कन्यानां) –b) का द₅ ममात्मोत्थानु°, व₁ मया मयानु°, व₂ मया ज्ञपत्यादि° दे₁ मया प्रोत्साम्य°, न₁ [illegible] (→मयाऽपत्यानु°), द₁₀ °संतति, ह₁ °संतत, ब₃ °[illegible] (→°संततिः), दे₃ व्याख्याता तु [illegible], –c) दे₁₋₁₀ मुरे मुर मुर मतो, द₁ व₁₋₃ मर्थ (द₂ °र्थे) (→मद्य) –d) व₃ मता, म₁ मनो (→मनोः); दे₂ [illegible], दे₃ [illegible], दे₅ [illegible] (→सृष्टिं); व₁ निबोध, दे₁ निबोध म, म₁ [illegible] (→निबोधत)

(→°वीर्यौ) –d) दे₈ –व्यजीजनत्, दे₉,₁₀ –व्यजीजनत्, व₁ व₁,₂ –व्यजीजनत् (→व्यजीजनत्)

२ म₁ ab ○ –a) म₁ व₂,₃ दे₁,₅ म₁ दे₁ द₁ व₁ म₁ ततोत्तानपादस्य (व₁ त्ततः) –ab) दे₄ [illegible] ध्रुवोनाम नाम स्थानमुत्तमम्(?) –c) दे₁,₁₀ द₁ व₁ म₁ मुरे मुर मुर भक्तो (→भक्तो), का₁ व₁,₃ दे₁₋₃,₄ म₁ व₂ नारायणं (→नारायणे), का₁ व₁₋₃ द₁₋₃,₄,₄ म₁ देवं, दे₁₀ देवा, दे₁ [illegible] (→देवे) –d) दे₁ [illegible] (→प्राप्तवान्)

रिपुं रिपुंजयं विप्रं वृकलं वृषतेजसम् ।
नारायणपरान् शुद्धान् स्वधर्मपरिपालकान् ॥५
रिपोराधत्त बृहती चक्षुषं सर्वतेजसम् ।
सोऽजीजनत् पुष्करिण्यां वैरण्यां चाक्षुषं मनुम् ।
प्रजापतेरात्मजायां वीरणस्य महात्मनः ॥६
मनोरजायन्त दश नड्वलायां महौजसः ।
कन्यायां सुमहावीर्या वैराजस्य प्रजापतेः ॥७
ऊरुः पूरुः शतद्युम्नस्तपस्वी सत्यवाक् शुचिः ।
अग्निष्टुदतिरात्रश्च सुद्युम्नश्चाभिमन्युकः ॥८
ऊरोरजनयत् पुत्रान् षडाग्नेयी महाबलान् ।
अङ्गं सुमनसं स्वातिं क्रतुमङ्गिरसं शिवम् ॥९
अङ्गाद् वेनोऽभवत् पश्चाद् वैन्यो वेनादजायत ।
योऽसौ पृथुरिति ख्यातः प्रजापालो महाबलः ॥१०
येन दुग्धा मही पूर्वं प्रजानां हितकारणात् ।
नियोगाद् ब्रह्मणः सार्द्धं देवेन्द्रेण महौजसा ॥११
वेनपुत्रस्य वितते पुरा पैतामहे मखे ।
सूतः पौराणिको जज्ञे मायारूपः स्वयं हरिः ॥१२ वं १.१४.११

५ -a) दे4 रिपु जय जय विप्र -b) व1 प्रवल (?), दे10 वृपल, तै1 निवल (?), मुवें मुए वपिल (→वृकल), का2 पूर्व°, व3 दे2 3-6 न1 तै1 द1 प्र1 2 म1 मुब. वृक° (→वृष°)

६ -a) तै1 व1 प्र1 चादत्त (→राधत्त), दे8-10 मुवें मुए मुब. महिषी (→बृहती) -b) का1 व1-3 दे1-6 8-10 न1 तै1 म1 मुवें मुए चाक्षुष (→चक्षुष), म1 °देवत (→°तेजसम्) -c) का1 व1 3 दे1-6 न1 तै1 अजीजनत्, दे1 सोऽजीज● (→सोऽजीजनत्), व1 दे3 5 पुष्करिण्या (दे3 °ण्य, दे5 °ण्यो), दे10 पुष्करण्यां (→पुष्करिण्यां). -d) का1 व1 2 दे3 4 6 तै1 वैरिण्या, दे1 वैराय, दे8-10 मुवें मुए मुब मुख्य, न1 द1 प्र1 2 म1 मारुण्यां (→वैरण्यां), व3 चक्षुष, तै1 चाक्षुषो (→चाक्षुष), व3 मनु, दे4 मुनि (→मनु) -e) व1 प्रजायात्, दे1 म1 प्रात्मजाया (→ात्मजायां) -f) व1 2 दे3 5 6 8-10 न1 परण्यस्य, व3 वैरणस्य, द1 प्र1 2 प्रनलस्य (→वीरणस्य), का1 मरण्यायामहात्म ●, म1 नड्वलस्यात्ममात्मन

७ न1 ७a-९b ⊙ -a) का1 म1 यजायत (→जायन्त), प्र2 मनो ● जयन्त दश -b) का1 मदलायां, दे0-10 मुवें मुए सुतास्ते सु- (दे8 9 तु), म1 -शास्वलायां (→नड्वलायां), प्र2 महती °जस (→महौजस) -c) व3 कन्याय (→कन्यायां), प2 दे2 4 तै1 द1 प्र1 मुवें मुए मुब सु (तै1 स, द1 प्र1 सु) महावीर्या, दे2 प्र2 म1 सु महावीर्या (प्र2 °र्यो), दे8-10 सुमहद्वीर्या (दे10 °र्यो) (→सुमहावीर्या) -d) दे10 वैरजेस्य (→वैराजस्य), व3 दे3 6 प्रजापतेः (→प्रजापते)

८ न1 ⊙ -a) दे1 उरू, दे4 जनु, द1 ऊर (?) प1 जय (→ऊरु), दे1 5 पुरु, द1 पूरु, प्र2 पूरु (?) (→पूरु), म1 ऊरु पुरुशतद्युम्न -b) का1 व1 3 दे3-5 तै1 सत्यवाक् (→सत्यवाक्), व1 कवि (→शुचि) -c) का1 अग्निपुर-, व1-3 दे2 3 6 अग्निष्टुद-, दे1 अग्निष्टुद-, दे10 यज्ञोधुद- (→अग्निष्टुद-), व1 -राज (→-रात्र), दे4 अग्नि सुमरिदशच, तै1 अग्नि सुरभिरस्थच, द1 प्र1 म1 मुनिःसुरनि (म1 °नि) स्थ (म1 °न)श्च, प्र2 मुनिस्सुदरग्निमश्च -d) दे9 10 °ति मन्यु (दे10 °न्य)न, द1 प्र1 म1 °ति(म1 °हि)मन्युन (द1 °त), दे3 6 °भिमन्युज, दे4 °निरुद्धय (→°भिमन्युक)

९ न1 ab ⊙ -a) दे2 4 पूरो, दे5 नरो, प्र2 ऊरु (→ऊरो), प्र1 जरोरज ● यत् पुत्रान् -b) दे10 षडाग्नेयि, प2 षडग्नेयी (→षडाग्नेयी), दे2 महाप्रमल (→महाबलान्), प्र1 षडाग्नेयमहाबलात्. -c) दे3 6 मङ्गं (→मङ्ग), का1 व1-3 दे2 6 मुवें मुए मुब स्वाति, द1 प्र1 2 म1 नाम (→स्वाति) -d) दे8-10 मुवें मुए मुब क्रतुमाङ्गिरस (दे10 °ग), द1 प्र1 2 म1 उत्कर्ष (प्र2 °ग) गिरस (→क्रतुमङ्गिरस), दे5 10 शिव (→शिवम्) -cd) म1 मनोरगोऽभवत् पुत्र प्रथम सतत शिव

१० -a) का1 व1-3 दे1-3 5 6 मुए मुब वेणो (→वेनो) -b) का1 व1 3 दे2 3 5 6 मुए मुब वैण्यो (→वैन्यो), का1 व1-3 दे1-3 6 9 मुए मुब वेणाद्, दे5 वैश्याद्, द1 वेनाद् (?) (→वेनाद्), प्र2 वैन्य● वेनन्दजायत -c) तै1 यौनो, + वैन्ये (→योऽसौ), दे2 6 ख्याता (दे6 °ति) (→ख्यात)

११ -a) दे2 तेन (→येन), प्र2 पूर्वा (→पूर्व) -b) दे8-10 मुवें मुए मुब °कारणा (→°कारणात्). -d) दे3 4 6 प्र1 महौजस (दे4 °सा) (→महौजसा).

१२ -a) का1 व1 3 दे1-3 5 6 वेण-, व2 पुरा, द1 प्र1 2 म1 मन (→वेन-), द1 प1 2 म1 वैन्य(प2 °द) स्य (→°पुत्रस्य). दे10 विनेत, प्र2 वितते, म1 यज्ञे (→वितते) -b) दे3 पुरो (→पुरा), दे5 ● तामस्यो, तै1 पैतामहो, द1

वे १।४।११ प्रयक्ता सर्वशास्त्राणां धर्मज्ञो गुणवत्सलः ।
त मा वित्त मुनिश्रेष्ठाः पूर्वोद्भूतं सनातनम् ॥१३
अस्मिन् मन्वन्तरे व्यासः कृष्णद्वैपायनः स्वयम् ।
श्रावयामास मा प्रीत्या पुराणं पुरुषो हरिः ॥१४
मदन्वये तु ये सूताः संभूता वेदवर्जिताः ।
तेषां पुराणवक्तृत्वं वृत्तिरासीदजाज्ञया ॥१५
स तु वैन्यः पृथुर्धीमान् सत्यसंधो जितेन्द्रियः ।
सार्वभौमो महातेजाः स्वधर्मपरिपालकः ॥१६
तस्य बाल्यात् प्रभृत्येव भक्तिर्नारायणेऽभवत् ।
गोवर्धनगिरिं प्राप्य तपस्तेपे जितेन्द्रियः ॥१७
तपसा भगवान् प्रीतः शङ्खचक्रगदाधरः ।
आगत्य देवो राजानं प्राह दामोदरः स्वयम् ॥१८
धार्मिकौ रूपसंपन्नौ सर्वशास्त्रभृता वरौ ।
मत्प्रसादादसंदिग्धं पुत्रौ तव भविष्यतः ।
एवमुक्त्वा हृषीकेशः स्वकीयां प्रकृतिं गतः ॥१९
वैन्योऽपि वेदविधिना निश्चलां भक्तिमुद्वहन् ।
अपालयत् स्वकं राज्यं न्यायेन मधुसूदने ॥२०
अचिरादेव तन्वङ्गी भार्या तस्य शुचिस्मिता ।
शिखण्डिनं हविर्धानमन्तर्धाना व्यजायत ॥२१

प्र1 2 म1 चै (स1 बै) पामगह्ला (→पैतामहे) का1 मपे, दे5 सुत, दे6 राखे, तै1 मषे (→मखे), दे10 पुराखेना मह्रीमुखे –c) दे5 सुत (?), दे10 सूत (→सूत), –d) का1 मायारूपो, दे1 महामाया, दे5 म2 मायाख्या (म3 °पे) (→मायारूप)

१३ दे3 6 १३-१४ ○ (ह स), –a) प्र2 सर्प° (→सर्व°) –b) ब3 धर्मज्ञा (→धर्मज्ञो), म3 दे2 8 10 मुर्वं मुए मुव गुरु° (→गुण°), दे5 वत्सला (→वत्सल) –c) का1 दे2 5 विमु°, न1 वृत्त (→वित्त), दे1 तस्मात्त तु द्विजश्रेष्ठा, दे1 तस्माद्वित्त मुनि श्रेष्ठा –d) ब3 पुरोद्भूत, दे1 पूर्वोद्भूता, दे4 पूर्वोद्भूत, द1 प्र1 2 म1 पूर्वोत्पन्न (→पूर्वोद्भूत)

१४ दे3 6 ○ (द्र १३ पा वि) –a) ब2 एतस्मिन्नन्तरे, तै1 तस्मिन् मन्वन्तरे (→अस्मिन् मन्वन्तरे), का1 व्यास (→व्यास) –b) ब3 दे4 5 प्र1 म1 °द्वैपायन (→°द्वैपायन) –c) का1 दे2, तै1 मा नित्य, ब2 म1 सम्प्रीत्या (→मा प्रीत्या) –d) म1 दे8 10 म1 मुर्वं मुए मुव पुराण, व1 पुराणे (→पुराण), ब2 पुरुषोत्तम (→पुरुषो हरिः)

१५ –a) प्र2 च ते (→तु ये), दे1 मा देवैयेन संभूता (?) –b) का1 भूता, दे10 पूता (→भूता) –c) का1 ब1 दे3 °वक्तृत्व (ब1 °त्व) (→वक्तृत्व), दे1 तेषां पुरा च तत्कृत्य –d) दे8-10 मूरगु (→वृत्ति), दे5 अजायत (→अजाज्ञया)

१६ दे3 १६c-१७d ○ (द्र स) –a) का1 दे8-10 मुर्वं मुए मुव च (→तु), का1 ब1-3 दे1-3 5 6 मुए मुव वंश (→वैन्य), दे3 6 पुन, दे4 पशु (→पृथु), दे2 धीमान् (→धीमान्); म2 सवेष पृथिवी मन्य –c) दे10 द1 प1 महात्मना (?) (→महातेजा) –d) दे6 म2 °परिपालका (म2 °कान) (→°परिपालक)

१७ दे3 ⊙ (द्र १६ पा वि) –a) का1 बाल, दे5 तै1 बाल्या (→बाल्यात्), दे4 प्रभुत्वेन, दे10 प्रभुत्वेव, न1 प्रभुत्वा च (→प्रभृत्येव) –b) दे1 नरायणि (?), दे3 5 6 10 द1 नारायणो (→नारायणे) –c) दे1 गोवर्धन, दे5 गौवर्धन-, दे6 नोवधन(?) दे8 10 सवधन-, न1 भगोर्वन (?) (→गोवर्धन-), ब1-3 दे8 9 मुर्वं मुए मुव. प्राप्तत् (→प्राप्य)

१८ –c) दे10 प्रागत्यो (→आगत्य), दे8 10 देव (→देवो) –d) द1 प्र1 2 म1 नारायण (→दामोदर)

१९ –a) दे5 6 म2 धार्मिको (प्र2 °क) (→धार्मिकौ), ब1 रूपमापन्नौ (→रूपसंपन्नौ) –b) का1 ब1 3 दे1 द1 प1 सर्वशास्त्र° दे2 सर्वशक्ति° (→सर्वशास्त्र°), ब2 सर्वशास्त्रस्व भागुरो, प्र2 सर्वशास्त्रविशारदौ –c) का1 दे2 8-10 मुर्वं मुए प्रसादिग्धौ, द1 प्र1 2 म1 प्रसिद्धध्नो (→प्रसादिग्ध) –e) दे1 उक्ता (→उक्त्वा) –f) दे3 6 स्वकीय (→स्वकीयां), द प्राकृतिं (→प्रकृतिं), प्र1 गतो (→गत).

२० दे3 6 a ○ –a) का1 दे1 5 वैष्णोऽपि, दे8 9 वैन्यो (दे10 °न्या) हि (→वैन्योऽपि), तै1 द1 प1 देव° (तै °वे) (→वेद°), ब2 3 मुव सोऽपि कृष्णे महाविद्या –b) दे1 निखिला, दे2 निष्कलां (→निश्चलां), द1 देव (→भक्ति), ब3 मावहन् (→उद्वहन्) –c) दे8-10 मुर्वं मुए मुव सोऽपालयत् (→अपालयत्), द1 दे1 स्वय (→स्वकं) –d) का1 नी(?)धेव, य1 दे8 10 मुर्वं मुए मुव पिालयन्, प्र2 न्याय च (→न्यायेन), दे8 10 मुर्वं मुए मुव. मधुसूदन (→मधुसूदने)

२१ –a) द1 प्र1, 2 म1 दत्त हि (→तन्वङ्गी), दे1 अचि रा देव तन्वङ्गी –b) प्र3 मायी (→भार्या), ब1 प1 2 म1 चैव (→तस्य), प्र2 °स्मिता (→°स्मिता) –c) दे3 6 शिवण्डिनी (→शिखण्डिन) –d) दे1 हमद्धानं, दे10 प्र2

शिखण्डिनोऽभवत् पुत्रः सुशील इति विश्रुतः ।
धार्मिको रूपसंपन्नो वेदवेदाङ्गपारगः ॥२२
सोऽधीत्य विधिवद् वेदान् धर्मेण तपसि स्थितः ।
मतिं चक्रे भाग्ययोगात् संन्यासं प्रति धर्मवित् ॥२३
स कृत्वा तीर्थसंसेवां स्वाध्याये तपसि स्थितः ।
जगाम हिमवत्पृष्ठे कदाचित् सिद्धसेवितम् ॥२४
तत्र धर्मपदं नाम धर्मसिद्धिप्रदं वनम् ।
अपश्यद् योगिनां गम्यमगम्यं ब्रह्मविद्विषाम् ॥२५
तत्र मन्दाकिनी नाम सुपुण्या विमला नदी ।
पद्मोत्पलवनोपेता सिद्धाश्रमविभूषिता ॥२६
स तस्या दक्षिणे तीरे मुनीन्द्रैर्योगिभिर्वृतम् ।
सुपुण्यमाश्रमं रम्यमपश्यत् प्रीतिसंयुतः ॥२७
मन्दाकिनीजले स्नात्वा संतर्प्य पितृदेवताः ।
अर्चयित्वा महादेवं पुष्पैः पद्मोत्पलादिभिः ॥२८
ध्यात्वार्कसंस्थमीशानं शिरस्याधाय चाञ्जलिम् ।
संप्रेक्षमाणो भास्वन्तं तुष्टाव परमेश्वरम् ॥२९
रुद्राध्यायेन गिरिशं रुद्रस्य चरितेन च ।
अन्यैश्च विविधैः स्तोत्रैः शांभवैर्वेदसंभवैः ॥३०
अथास्मिन्नन्तरेऽपश्यत् समायान्तं महामुनिम् ।
श्वेताश्वतरनामानं महापाशुपतोत्तमम् ॥३१
भस्मसंदिग्धसर्वाङ्गं कौपीनाच्छादनान्वितम् ।
तपसा कर्षितात्मानं शुक्लयज्ञोपवीतिनम् ॥३२ वं. १.१४.३२

पद्मोत्पलवनोपेता (ख2 °न) (→मन्तर्धाना), दे3 व्यजायत (→व्यजायत), का1 ब1-3 दे2 5 6 8 9 वै1 द1 मुर्वं मुए मुब. मन्तर्धानाद्व्यजायत, दे4 पुत्रद्वयमसूयत

२२ दे4. ab ⊙ -a) वै1 शिखण्डिनोऽभवत् पुत्र -b) म3 द1 स्वशील, दे1 कुशाली, वै1 सुनीत (→सुशील), दे10 विस्मृत (→विश्रुत) -c) दे1 धार्मिको (→धार्मिको), द1 °सम्पन्नो (→°सम्पन्नो), -d) दे1 °पारगो (→°पारग)

२३ म1 २३c-२४b ⊙ (द रा) -a) दे1 अधीत्य (→सोऽधीत्य), दे1 वेदान् विधिवद् (→विधिवद् वेदान्) -b) ब2 तपसा (→तपसि). -c) दे3 6 धर्मं° (→भाग्य°), दे4 भार्यायोगानातिथश (?) -d) ब1 2 दे4 सन्यास (→सन्यास), दे1 10 धर्मवत् (→धर्मवित्)

२४ ग1 ab ⊙ (द २३ पर वि) -a) दे4 तीर्थसत्सेवा, दे10 तीर्थससेव्या (→तीर्थसंसेवा) -c) ब3 हिम•द° (→हिमवत्°), दे1 °पार्श्वे (→°पृष्ठ)

२५ दे4 ab ⊙ -a) दे1 °धर, दे2 °पद, दे8 9 न1 द1 ध1 2 ग1 मुर्वं मुए °वन (→°पद) -b) ब3 दे10 परम, दे7 8 परम् (→वनम्), का1 दे5 °प्रदवन (→°प्रदं वनं) -c) दे3 अपश्य (→अपश्यद्), दे4 सुरासुरगणायुक्तम् -d) दे4 वै1 °विद्विष (→°विद्विषाम्)

२६ -a) दे1 •दाकिनी, वै1 मन्दाकिनीं (→ मन्दाकिनी); दे10 मन्दाकिनी नाम पुण्या -b) दे3 स्वपुण्या-, वै1 सुपुण्या, घ2 सुवहा (→सुपुण्या), वै1 विमला, द1 घ2 विपुला (→विमला), वै1 नदीं (→नदी), दे10•••••• नदी. -c) दे3 6 °वनोपेता, दे1 °वनोपेता (→°वनोपेता) -d) दे3 वै1 °विभूषित (वै1 °ताम्) (→°विभूषिता)

२७ -a) दे1 तस्यास्तु, दै2 •तस्या, दे9 स तस्य (→स तस्या), दे2 न1 दक्षिण (ख1 °णा) (→दक्षिणे), दे2 तीर (→तीरे). -b) का1 ब3 दे3 5 8 मुनीन्द्रो (→मुनीन्द्रै), ब2 वृत , दे1.8-10 द1 ध1.2 ग1 मुर्वं. मुए मुब मुनम (→ वृतम्). -c) दे1 3 6 स पुण्य (→सुपुण्य) -d) दे1 °सयुता (?) (→°संयुत).

२८. दे4. cd ⊙ -a) दे1 स्नाप्य (→स्नात्वा), -b) दे4 सेविते नारदादिभि . -d) दे10 पद्मोदलादिभि (→पद्मोत्पलादिभि)

२९ दे3 6 d ⊙ -a) दे4 ईशान (→ईशानं) -b) ब3 दे3 8 शिरसा (दे8 °शा) धार्य, दे1 शिरस्याध्याय (→शिरस्याधाय) -c) का1 दे1 2 4 5 10 संप्रेक्ष्यमाणो, दे3 6 तत (द6 °न) सप्रेक्ष्य (→सम्प्रेक्षमाणो)

३० -a) दे1 भक्त्या च, दे4 गिरीशं (→गिरिशं), द1 ग्र1 म1 रुद्रा (म1 °द्रो) देन गिरीशस्य, ग्र2 रुद्राध्यायी गिरीशस्य. -b) दे2 वा (→च) -d) ग्र2 ग्रां•र्वै , म1 छान्दसं (→शांभवै), दे10 न1 देव° (→वेद°).

ग्र2 b, c मध्ये अधिकम् :—
•ध्यात्वार्कं मंस्यमीशानं शिरस्याधाय चाञ्जलिम् (= २९ab).

३१ दे4 cd ⊙ -b) न1 ग्र2 महामुनिः (→महामुनिम्) -c) दे1 श्वेताश्व तर-, दे10 श्वेताश्वेतर-, न1 ग्र1 श्वेताश्वरस्य-, ग्र2 श्वेताश्वतरं (→श्वेताश्वतर-), दे1-ना (शा)मान, ग्र2 -ईशान (→-नामानं) -d) का1 °पशुपतो°, ब1 °पापतो° (→°पाशुपतो°)

३२. -a) द1 ग्र1 °संदग्ध°, ग्र1 °संदिग्ध° (→°सं-दग्ध°) -b) दे5 कौपीनोदकमा° (→

वे १.१४.३४ समाप्य संस्तवं शंभोरानन्दास्राविलेक्षणः ।
ववन्दे शिरसा पादौ प्राञ्जलिर्वाक्यमब्रवीत् ॥३३
धन्योऽस्म्यनुगृहीतोऽस्मि यन्मे साक्षान्मुनीश्वरः ।
योगीश्वरोऽद्य भगवान् दृष्टो योगविदा वरः ॥३४
अहो मे सुमहद्भाग्यं तपांसि सफलानि मे ।
किं करिष्यामि शिष्योऽहं तव मां पालयानघ ॥३५
सोऽनुगृह्याथ राजानं सुशीलं शीलसंयुतम् ।
शिष्यत्वे परिजग्राह तपसा क्षीणकल्मषम् ॥३६
सान्यासिकं विधिं कृत्स्नं कारयित्वा विचक्षणः ।
ददौ तदैश्वरं ज्ञानं स्वशाखाविहितं व्रतम् ॥३७
अशेषवेदसारं तत् पशुपाशविमोचनम् ।
अन्त्याश्रममिति ख्यातं ब्रह्मादिभिरनुष्ठितम् ॥३८
उवाच शिष्यान् संप्रेक्ष्य ये तदाश्रमवासिनः ।
ब्राह्मणान् क्षत्रियान् वैश्यान् ब्रह्मचर्यपरायणान् ॥३९
मया प्रवर्तिता शाखामधीत्यैवेह योगिनः ।
समासते महादेवं ध्यायन्तो निष्कलं शिवम् ॥४०
इह देवो महादेवो रममाणः सहोमया ।
अध्यास्ते भगवानीशो भक्तानामनुकम्पया ॥४१

कौरीनाच्छादना°) –c) का1 व2 3 दे3 6 दर्शिता°, दे5 ते1 द1 म1 र्शिता°, दे8 10 हर्षिता° (→र्शिता°) –d) वे1-2 शुक्ल°, ते1 गूढम° (→शुक्ल°), दे4 शुष्कयज्ञोपशोभित

३३ –a) दे6 10 समाप्य (दे10 °प्त), दे9 समीप्य ते1 सम्प्राप्य (→समाप्य), दे1 स(?) * व, दे3 ते1 सम्मव (→संस्तव), य2 समाप्येन स्तव शंभो –b) का1 दे10 द1 म1 2 म1 ह्यानन्दाश्रु, व3 दे1 3 4 8 9 ह्यानन्दाश्रवा- (→आनन्दास्रा), व2 ते1- विलेक्षण, द1 प्र1 म1 विलोचन (→-विलेक्षणः)

३४ दे3 4 6 cd ○ (द स) –a) दे4 धन्यास्मि दे8 9 धन्योस्म्य-, दे10 धर्मोस्य (→धन्योस्म्य-), का1 °गृहितोस्मि (→°गृहीतोऽस्मि) –b) ते1 यत्मे (→यन्मे), दे4 त्वमागत, ते1 प्र1 महेश्वर, प्र2 मुवें मुए मुनीश्वर (→मुनीश्वर) –c) ते1 योगीश्वरो* (→योगीश्वरोऽद्य), द1 प्र1 2 म1 दृष्टोऽसौ (→भगवान्) –d) व3 पृष्टो, द1 प्र1 2 म1 योगी (→दृष्टो), न1 वर (?), प्र3** (→वर)

३५ –a) दे2 4 ते1 द1 प्र1 म1 सुगहाभाग्य, प्र2 सुलभ भाग्य (→सुमहद्भाग्य) –b) प्र2 तापसा (→तपांसि), म1 फलितानि मे (→सफलानि मे) –c) प्र1 करिष्यसि (→करिष्यामि) –d) व2 श्रयमाणि, दे3 भव ना मा, दे6 भव मा, प्र2 तवाय (→तव मां) दे4 पालमानर, दे5 पालया न च, प्र3 पालयानघ (→पालयानघ)

३६ –a) व3 °गृह्याथ, दे8 °पृष्टाथ (→°गृह्याथ) –b) ते1 सुशील (?) (→सुशीलं) –c) दे6 शिष्यस्ते (→शिष्यत्वे), व1 दे1 2 4 8-10 प्र2 मुवें मुए मुव प्रति° (→परि°) –d) दे2 3 5 °कल्मषाम् (→°कल्मषम्)

३७ दे4 cd ○ –a) व1 ते1 सान्यासिक (ते1 °की), दे3-6 10 स(दे4 10 स)न्यासिक (→सान्यासिकं), प्र2 कृत्स्नाधिकन्तु विधिवत् (कृत्स्नं) –b) दे4 तु रा श्रु (→विचक्षणः) –c) ते1 तथेश्वर (→तदैश्वरं) –d) दे5 स्वशिक्षा-, दे5 स्वशायो- (→स्वशाखा), व1 दे8-10 वे1 मुवें मुए मुव -विहित- (→-विहितं), न1 द1 प्र1 2 म1 स्व (द1 स) शाखाभिहित (प्र1 °त) व्रतम्

३८ –a) दे8 9 न1 मुवें, मुए मुव अशेष (→अशेष), दे6 वेदपार, दे10 दंवसार (→वेदसारं), दे10 तम (→तत्), दे4 वेदान्तसारमार तत –c) व1 ते1 मुन्याश्रम°, दे10 अन्याश्रम° (→अन्त्याश्रम°)

३९ –a) ते1 शिष्य (→शिष्यान्), दे4 सभेक्ष्य (→संप्रेक्ष्य) –b) दे2 स (→ये), दे5 ये तदा*म°, दे8 ये तदाश्रय°, द1 म1 एकदाश्रम°, प्र2 ये यथाश्रम° (→ये तदाश्रम°) –c) व1 दे8 9 10 मुवें मुए मुव ब्राह्मणा (दे10 °णः) (→ब्राह्मणान्) दे8 9 10 मुवें मुए मुव क्षत्रिया (→क्षत्रियान्), का1 दे8 8-10 मुवें मुए मुव वैश्या, व1 3 न1 शूद्रान् (→वैश्यान्) –d) दे8-10 मुवें. मुए मुव परायण (→परायणान्)

४० दे4 cd ○ –a) दे4 माया (→मया), ते1 द1 °प्रवर्तिता (ते1 °त) (→°प्रवर्तिता) ते1 शाख्य (→शाखा) –b) व3 अधीत्य बहु, दे1 अ*त्यैवेह, दे3 6 अधीत्यैव हि दे4 अधीत्ये हैव, व1 अभ्यजिह्वैव, प्र1 म1 अध्येतीहैव, प्र2 अध्य (?) विहेव (→अधीत्यैवेह), दे4 योगिना (→योगिन) –c) दे7 समासत (→समासते), दे3 6 महात्मान (→महादेव) –d) दे1 प्र° ध्यायन्ते (→ध्यायन्तो), दे1 2 8 9 मुवें मुए विमलं (दे1 2 °मी) शरम् (→निष्कलं शिवम्), दे10 ध्याय विश्वमहेश्वरम्

४१ –a) दे4 वसरयत्र (→इह देवो) –d) दे1 भक्ता, दे10 भक्त मा (→भक्तानाम्), दे4 द1 अनुकम्पय (द1 °ग) प्र1 2 म1 अनुकम्पवा (→अनुकम्पया)

इहाशेषजगद्धाता पुरा नारायणः स्वयम् ।
आराधयन्महादेवं लोकानां हितकाम्यया ॥४२
इहैव देवमीशानं देवानामपि दैवतम् ।
आराध्य महतीं सिद्धिं लेभिरे देवदानवाः ॥४३
इहैव मुनयः पूर्वं मरीच्याद्या महेश्वरम् ।
दृष्ट्वा तपोबलाज्ज्ञानं लेभिरे सार्वकालिकम् ॥४४
तस्मात् त्वमपि राजेन्द्र तपोयोगसमन्वितः ।
तिष्ठ नित्यं मया सार्द्धं ततः सिद्धिमवाप्स्यसि ॥४५
एवमाभाष्य विप्रेन्द्रो देवं ध्यात्वा पिनाकिनम् ।
आचचक्षे महामन्त्रं यथावत् स्वार्थसिद्धये ॥४६
सर्वपापोपशमनं वेदसारं विमुक्तिदम् ।
अग्निरित्यादिकं पुण्यमृषिभिः संप्रवर्तितम् ॥४७
सोऽपि तद्वचनाद् राजा सुशीलः श्रद्धयान्वितः ।
साक्षात् पाशुपतो भूत्वा वेदाभ्यासरतोऽभवत् ॥४८
भस्मोद्धूलितसर्वाङ्गः कन्दमूलफलाशनः ।
शान्तो दान्तो जितक्रोधः संन्यासविधिमाश्रितः ॥४९
हविर्धानिस्तथाग्नेय्यां जनयामास सत्सुतम् ।
प्राचीनबर्हिषं नाम्ना धनुर्वेदस्य पारगम् ॥५०
प्राचीनबर्हिर्भगवान् सर्वशस्त्रभृतां वरः ।
समुद्रतनयायां वै दश पुत्रानजीजनत् ॥५१
प्रचेतसस्ते विख्याता राजानः प्रथितौजसः ।
अधीतवन्तः स्वं वेदं नारायणपरायणाः ॥५२
दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः ।
दक्षो जज्ञे महाभागो यः पूर्वं ब्रह्मणः सुतः ॥५३ वें.१.१४.५४

४२ द1 ⊙ (द ग) -a) का1 इहाशप (→इहाशेष) -b) द1 ग्र1 म1 नारायण स्वयम् (→नारायण स्वयम्)
४३ -a) व2 3 दे3 6 8 10 न1 ते1 मुवें मुए इहैन, दे4 इहैव मुव इह त (→इहैव) व1 ईशाना (→ईशान) -b) व3 यपि- (→अपि), दे4 5 दैवता (→दैवतम्) -c) दे5 महतो- (→महती) -d) दे1 3 °दानव दे° °गानवा (→°दानवा) -cd) दे4 आराध्य महदैश्वर्यमन्य देवास्तथेश्वर
४४ दे4 ab ○ -a) दे8 10 मुवें मुए मुव सर्वे (→पूर्वं) -b) दे10 मरीचाद्या (→मरीच्याद्या) -c) का1 बलात्, दे1 न1 बल (→बलात्), दे2 4 दान, द1 ग्र2 म1 स्थान (→ज्ञान) -d) का1 व2 3 दे1 3 5 6 ग्र2 सव कामिकम्, दे2 4 सार्वकामिकम्, दे10 सावकालकम् (→सार्वकालिकम्)
४५ दे3 6 cd ○ -c) का1 निष्ठन् व2 3 न1 द1 ग्र1 3 भास्व दे1 याम्, ते1 अर्घ्य (→तिष्ठ) ग्र1 स्वया (→मया), व1 आस्थायैन मया सार्द्धं, दे4 स नित्य मायया सार्द्धं, दे5 तिष्ठस्विह मया सार्द्धं, म1 आस्वातोऽथ मया सार्द्धं -d) दे9 मयाप्स्यसि (→मवाप्स्यसि)
४६ द3 6 ○ -a) ग्र1 म1 विप्रेन्द्रान् (→विप्रेन्द्रो) -b) दे2 महेश्वर (→पिनाकिन) -d) दे1 •थावत्, (→यथावत्), दे8-10 मुवं मुए मुव सव° (→स्वार्थ°), दे2 तथा तत्त्वार्थसिद्धय दे4 यथावद्विधिपूर्वक
४७ द3 4 8 ab ○ -a) दे2 °तापाप°(→°पापोप°) -b) दे10 देवसार (→वेदसार) -c) दे4 आग्नेरित्यादिक, दे9 10 अस्तिरि(दे10 °र्द)त्यादिक (→अग्निरित्यादिक) -d) दे4 सप्रकीर्तितम् (→सप्रवर्तितम्)
४८ -d) ते1 °परो (→°रतो)
४९ -a) दे4 तस्मा° (→भस्मो°) -b) दे5 °शना (→°शन) -d) दे3 5 9 द1 म1 स(?)न्यास- (→संन्यास-), व(1 दे7 -विधमास्थित दे10 विधनाश्रुत (→विधिमाश्रित)
५० दे4 ab ⊙ -a) दे8-10 हविर्धातुम् (→हविर्धानम्), ते1 तदा° (→तथा°), व1 मुवें [आ] ग्नेय्या द1 ग्र1 2 म1 [अ]ग्न्या (→[आ]ग्नेय्या) -b) दे10 जनयामासु (→जनयामास), का1 व1 ते1 द1 ग्र1 2 म1 तत्सुतम्, व3 चात्मजम्, व3 शाश्वतम्, दे1 2 सुव्रतम्, दे3 सत्सुतम्, न1 मुवें मुए मुव वै सुतम् (→सत्सुतम्) -c) न1 प्राचीन (→प्राचीन-)
५१ -b) व3 दे3-6 10 सर्वशास्त्र° (→सर्वशस्त्र°), ग्र2 सर्वभूतभृतां वरम्
५२ -a) दे1 प्रचे•स दे6 प्रचेतसस्ते, न1 ते1 प्राचेतस, ग्र2 प्रचेतना (→प्रचेतस), दे6 ह (→स्ते), न1 इति ख्याता, ग्र2 ते विख्यात (→त विख्याता) -b) दे3 राजान्न, दे4 प्राजान (→राजान) दे10 ग राजान् प्रतितौजस -c) द1 अधीततन्त, ग्र1 म1 अधीतवन्त(?) (→अधीतवन्त), दे1 त, दे2 ते (→स्व) -d) द1 °परा •ण, दे1 10 °परायण (→°परायणा)
५३ दे4 ab ○ -a) दे5 दशभ्यस्तु (→दशभ्यस्तु), दे1 3 5 6 10 द1 म1 प्रचेते(द1 °ता)भ्यो (→प्रचेतोभ्यो) -b) दे3 मोविषाया (?) (→मारिषाया) -c) ते1 दक्षो, + स्रष्टो (→दक्षो), का1 दे8 न1 यज्ञे, दे4 नाम (→जज्ञे), का1 तत्राभागो, न1 च विप्रेन्द्रा ग्र2 महाबाहो (→महाभागो)

कू.१.१४.५५ स तु दक्षो महेशेन रुद्रेण सह धीमता ।
कृत्वा विवादं रुद्रेण शप्तः प्राचेतसोऽभवत् ॥५४
समायान्तं महादेवो दक्षं देव्या गृहं हरः ।
दृष्ट्वा यथोचितां पूजां दक्षाय ददौ स्वयम् ॥५५
तदा वै तमसाविष्टः सोऽधिका ब्रह्मणः सुतः ।
पूजामनर्हामन्विच्छन् जगाम कुपितो गृहम् ॥५६
कदाचित् स्वगृहं प्राप्तां सतीं दक्षः सुदुर्मनाः ।
भर्त्रा सह विनिन्द्यैनां भर्त्सयामास वै रुषा ॥५७
अन्ये जामातरः श्रेष्ठा भर्तुस्तव पिनाकिनः ।
त्वमप्यसत्सुतास्माकं गृहाद् गच्छ यथागतम् ॥५८
तस्य तद्वाक्यमाकर्ण्य सा देवी शंकरप्रिया ।
विनिन्द्य पितरं दक्षं ददाहात्मानमात्मना ॥५९
प्रणम्य पशुभर्तारं भर्तारं कृत्तिवाससम् ।
हिमवद्दुहिता साऽभूत् तपसा तस्य तोषिता ॥६०
ज्ञात्वा तद्भगवान् रुद्रः प्रपन्नार्तिहरो हरः ।
शशाप दक्षं कुपितः समागत्याथ तद्गृहम् ॥६१
त्यक्त्वा देहमिमं ब्रह्मन् क्षत्रियाणां कुलोद्भवः ।
स्वस्या सुतायां मूढात्मा पुनमुत्पादयिष्यसि ॥६२

५४ ब3 ५४a-५६b ○ (ह स) -a) तै1 महासेन, द1 महेशान (→महेशेन) -b) व1 देवाः, ध4 धीमता, तै1 सदधे (→धीमता) -c) दे3 त्यक्ता, दे5 तै1 त्यक्त्वा (→कृत्वा), द2 विवाद, दे2 विरोध, दे10 विवाह (→विवाद) -d) का1 शब्द, दे3 शाम, तै1 ग्रात् (→शप्त), द1 प्रावेतसो, प्र2 प्रचेतसः (→प्राचेतसो), ब1 [अ]भवन्, ग्र2 **(→[अ]भवत्)

५५ ब3 ○ (द्र ५४ पा वि) -a) दे2 उमायान्त (→समायान्त), दे5 महादेवा (→महादेवो), -b) दे5 दत्त (→दक्षं), दे5 देवा, द1 देव्यौ (→देव्या), दे4 तत, द1 ग्र1 म1 गत्र (→हर), प्र2 दक्ष देव्याग्रगाग* -c) व1 द1 ग्र1 2 यथोचित (→यथोचिता) -d) ग्र3 दृष्ट्वा च (→दक्षाय) दे1 च ददौ, दे6 प्रययौ (→प्रददौ)

५६ ब3 ab ○ (द्र ५४ पा वि), दे4 bcd ○ -a) दे2 4 ग्र3 तथा, द1 ग्र1 म1 तया (→तदा), व1 तरसा°, दे3 रसमा°, न1 तसमा° (→तमसा°), द1 [प्रा]विष्ट (→[प्रा]विष्ट) -b) न1 सोऽधिक, वे1 द1 ग्र1 म1 ऽधिक (ग्र1 °ता, म1 °का), ग्र० ऽवधिका (→सोऽधिका) -c) न1 मन्विच्छ (→मन्विच्छन्) -d) ग्र3 च पितु (→कुपितो), दे3 गृहात् (→गृहम्) -cd) दे1 पूजामनोहरान्विच्छन् स दग्ध कुपितो गृहात्

५७ -a) दे4 ****, न1 कदाचित्तु (→कदाचित् स्व-), न1 दे4 6 प्राप्ता (→प्राप्तां), द1 ग्र1 2 म1 गृहं प्राप्ता सती दक्ष -b) व2 दे1 दृष्ट्वा (→दक्ष), दे4 ****, द1 ग्र1 2 ग1 कोपाविष्ट (→सती दक्ष), ब3 दे1 प्र2 सु(दे1 स) दुर्मना (प्र2 °न) (→सुदुर्मना) -c) दे2 3 6 भर्त्ता, दे5 भार्या (→भर्त्रा), का1 दे10 विनिन्द्यैना, दे2 5 विनिन्द्यैना, द1 विनन्द्यैना (?), ग्र2 विनिन्द्यंन (→विनिन्द्यैना) -d) न1 सभग्ना साम (?) (→भर्त्सयामास), दे1 2 चं तदा, ग्र2 पोथ्या (→वै रुषा)

५८ -a) का1 या मातर, द1 के पितर, ग्र० म1 च कातरा (→जामातर), व1 म1 सृष्टा, प्र1 शिष्टा, ग्र2 स्पृष्टा (→श्रेष्ठा) -c) दे10 °राद् गुता स्थाल, ग्र3 *सुताऽस्माक (→°सत्सुताऽस्माक) -d) व1 न1 द1 ग्र1 गृहान् (→गृहाद्), वे1 ग्रस्य (→गच्छ)

५९ दे4 cd ○ -b) दे4 सर्वदा देव वल्लभा -c) व1 विचिन्त्य (→विनिन्द्य), न1 दक्ष पितर (→पितरं दक्षं) -d) दे5 ददाहास्माममात्मना, न1 उदाहात्मानमात्मना

६० -a) दे2 प्रणम्य देवं सर्वज्ञ, दे4 उवाच पार्वती वाक्य -b) ब3 स्वपति, दे3 सर्तारं (→भर्तारं) -c) व1 दे4 न1 तै1 चाभूत, दे1 भूत्वा, म1 भूय (→साभूत्), द1 ग्र1 हिमवद् दुहिता साभूत -d) दे10 वत्तप्या, ग्र2 तपस्या (→तपसा), दे4 ग्र2 तोषित (→तोषिता)

६१ -a) द1 त, दे2 8-10 सुर्व, पुर ता, ग्र2 स, सुब तु (→तद) म1 शास्वाय (→ज्ञात्वा तद्), दे10 °भगवानीश (→°भगवान् रुद्र) -b) व2 दे1 ग्र2 प्रणतार्ति° (→प्रपन्नार्ति°), दे5 **हर (→°हरो हर) -c) ग्र2 पितर (→कुपित) -d) ग्र० समागम्याथ, म1 रामागस्यति (→समागत्याथ), दे1 सद्गृह (→तद्गृह).

६२ दे1 4 cd ○. -a) दे3 मुक्त्वा, दे1 त्यक्ता (→त्यक्त्वा), व2 न1 द1 ग्र2 इद (→इम), दे2.8 10 मुर्व मुए. मुब ब्राह्म, दे0 ब्रह्म, ग्र2 ब्रह्मा (→ब्रह्मन्)

एवमुक्त्वा महादेवो ययौ कैलासपर्वतम् ।
स्वायंभुवोऽपि कालेन दक्षः प्राचेतसोऽभवत् ॥६३
एतद् वः कथितं सर्वं मनोः स्वायंभुवस्य तु ।
विसर्गं दक्षपर्यन्तं शृण्वतां पापनाशनम् ॥६४

इति श्रीकूर्मपुराणे षट्साहस्र्या संहितायां पूर्वविभागे त्रयोदशोऽध्यायः ॥१३॥

१४

नैमिषीया ऊचुः ॥※

देवानां दानवानां च गन्धर्वोरगरक्षसाम् ।
उत्पत्तिं विस्तरात् सूत ब्रूहि वैवस्वतेऽन्तरे ॥१
स शप्तः शंभुना पूर्वं दक्षः प्राचेतसो नृपः ।
किमकार्षीन्महाबुद्धे श्रोतुमिच्छाम सांप्रतम् ॥२

सूत उवाच ॥※

वक्ष्ये नारायणेनोक्तं पूर्वकल्पानुषङ्गिकम् ।
त्रिकालबद्धं पापघ्नं प्रजासर्गस्य विस्तरम् ॥३ वै. १.१५.१

–b) दे10 दक्षिणाथा (→क्षत्रियाणां), दे4 कुलेभवत्, दे8 10 मुवें मुए मुव कुले भव, द1 प्र1 2 म1 कुलोद्वह (म1 °ह) (→कुलाद्भुत) –c) दे7 माहात्मा, न1 मूढात्मन् (→मूढात्मा)

६३ द1 ⊙ –a) दे4 इति (→एव), का1 व2 3 दे2-5 न1 ते1 द1 प्र1 2 म1 शप्त्वा, दे6 शप्तो, दे10 उक्तो (→उक्त्वा), दे4 महादेवो (?), ते1 (स) महादेवो, (→महादेवो) –b) व3 दे2 द1 कैलाश° (→कैलास°), न1 °मुत्तम (→°पर्वतम्) –c) व2 शापेन (→कालेन) –d) ते1 प्राचेतसा (→प्राचेतसः)

६४ –b) स्वयंभु° (→स्वायंभु°) –c) व1 3 दे1-4 6 8-10 न1 द1 प्र1 2 म1 मुवें मुए मुव निसर्गं (व1 °र्गं, दे6 °र्गो) (→विसर्गं) ते1 °सम्बन्ध (→°पर्यन्त) –d) ते1 श्रुत्वा ता (→शृण्वतां) दे4 °शन (→°शनम्)

पुष्पिका—

पुराणनाम—का1 व1 दे1 3 इति कू(व3 °कौ)र्मपुराणे, व1 इत्यादिमहापुराणे कौर्म्मे, व2 दे6 व2 इति कूर्मपुराणे दे2 5 8-10 द1 प्र1 म1 मुवें मुए इति श्रीकूर्मपुराणे, दे4 ते1 इत्यादि महापुराणे श्रीकू (ते1 ° कौ)र्मे, न1 इति श्रीकौर्मे, मुव इति श्रीकौर्मे महापुराणे पूर्वभागे अध्यायनाम—व2 दे4 न1 ते1 द1 प्र1 2 म1 ○, का1 व1 3 दे1 3 5 6 8 10 मुवें मुए राज (दे3 °म ?) वंशानुकीर्तने (दे8 °न), मुव स्वायम्भुवमनुसर्गकथन नाम अध्याय संख्या—दे6 ○, का1 दे1 त्रयोदशोऽध्याय, व1 3 दे3 न1 ते1 द्वादशोऽध्याय, व2 ॥१२॥, दे1 2 6 8 द1 प्र1 2 म1 चतुर्दशोऽध्याय, दे4 द्वादशोऽध्याय ॥१२॥, दे10 मुवें मुए मुव चतुर्दशोऽध्याय ॥१४॥

१४

※ प्र1 2 ○, दे1 2 8-10 मुवें मुए मुव नैमिषीया ऊचु, दे4 शौनक उवाच, ते1 श्रीशिव, + ऋषय, द1 श्रीऋषय, म1 ऋषय

१ –b) का1 व3 दे1 4 °राक्षसा (→°रक्षसाम्), प्र2 गन्धर्वाणांगराक्षसा –c) म1 मुवें मुए मुव ब्रूहि, न1 सूत (→सूत) –d) म1 मुवें मुए मुव सूत (→ब्रूहि), दे5 वैवस्वतेन्तर, दे10 वैवस्वतान्तरे, प्र2 वैवस्वतोऽन्तरे (→वैवस्वतेऽन्तरे)

अत परं अधिकम्—द1 श्रीसूत, प्र1 म1 सूत

२ का1 २a-३d ⊙, दे3 म1 २c-३d ○, दे6 प्र1 2- २c-४b ○ (इ म) –a) न1 सशप्त (→स शप्त) –b) म1 भवत्, + नृप (→नृप) –c) व2 दे8 10 ते1 महाबुद्धि (→महाबुद्धे) –d) का1 व2 3 दे2 4 10 न1 इच्छामि (→इच्छाम)

※ का1 दे3 6 प्र1 2 म1 ○, दे5 सूत उ, न1 ते1 द1 सूत

३ व1 दे3 6 प्र1 2 म1 ○ (इ २ पा वि), द1 ३a-४b ○ –a) दे10 °चोक्त (→°नोक्तं) –b) व1 पूर्वसर्गानुषङ्गिक, व3 पूर्वं पानुषङ्गित, दे2 पूर्वकल्पानुषङ्गिका, दे4 पूर्वकल्पा मवातन –c) का1 त्रिकालबद्धं, व2 दे1 त्रिकाल-

देवाश्च सर्वे भागार्थमाहूता विष्णुना सह ।
सहैव मुनिभिः सर्वैरागता मुनिपुंगवाः ॥५

दृष्ट्वा देवकुलं कृत्स्नं शंकरेण विनागतम् ।
दधीचो नाम विप्रर्षिः प्राचेतसमथाब्रवीत् ॥६

दधीच उवाच ।❀

ब्रह्मादयः पिशाचान्ता यस्याज्ञानुविधायिनः ।
स देवः सांप्रतं रुद्रो विधिना किं न पूज्यते ॥७

दक्ष उवाच ।❀

सर्वेष्वेव हि यज्ञेषु न भागः परिकल्पितः ।
न मन्त्रा भार्यया सार्द्धं शंकरस्येति नेज्यते ॥८

विहस्य दक्षं कुपितो वचः प्राह महामुनिः ।
शृण्वतां सर्वदेवानां सर्वज्ञानमयः स्वयम् ॥९

दधीच उवाच ।❀

यतः प्रवृत्तिर्विश्वेषां यश्चास्य परमेश्वरः ।
संपूज्यते सर्वयज्ञैर्विदित्वा किल शंकरः ॥१० वँ. १.१५.१०

इत्येते भगवान् विष्णुर्देवानामपि चेश्वर ।
होतारो वं मुनिश्रेष्ठा सपूर्ण शक्लंगुणै. ।
क्रतोर्विनाशोऽभिभव. केन वा हेतुना मुने ।

दधीच —

ईप्सोविनाशे यज्ञास्य श्रद्दधानस्य मे वच । [72]
विनाशहेतव सर्वे देवाना तव च क्रतो ।
न चेह रक्षिता कश्चित् विद्यते विबुधेश्वर ।
क्रतो वापि स्वय विष्णु सर्वे वा सुरदानवा ।
येनेह न भवेन्नाशस्तवासमूढचेतस । [76]
न स सूर्यं जगत्सर्वं तमहागच्छ मधुन ।
सद्यो तेन भवानेत प्रकाशयितुमिच्छति ।

दक्ष —

कैनेह नाशो भविता क्रतोर्मम महामुने ।
दृष्ट चेत्कृदशा तन्मे ब्रूहि त नाशयाम्यह । [80]

दधीच —

य सर्वदेवनतनु सर्वं वेदाश्च त सदा ।
तस्यैतदखिल विश्व स्वशपरया धार्यते जगत् ।
यो यज्ञ स्वयमीशानो यजमानश्च शकर ।
इत्येते विविधैर्यज्ञैर्यश्च यज्ञफलप्रद । [84]
यस्य चैतदखिल हिसप्तभवनात्मक ।
शक्त्यात्मक जगत् सर्वं मोहित यस्य मायया ।
यस्य प्रज्ञापतिर्ब्रह्माविष्णुर्विश्वजगत्पति ।
गन्धर्वयक्षरक्षासि लोका वेदा महं[र्ष]य ॥ [88]
विविधा सनकश्चैव यस्यैवाज्ञाविधायिन ।
स देव साम्प्रत रुद्रा विधिना किं न पूज्यते ॥

५ न1 ५.a cd ⊙ –b) का1 श2 आगता, य1-3 to द1 मुवँ मुए माहूना (ब3 °तो), दे8 आहना (→आहूता) –c) म1 मनिभि (→मुनिभि)

६. न1 ⊙ –a) मा1 ते दृष्ट्वा देवकृत्स्न तु, दे2 दृष्ट्वा देवगण सर्वं, प्र2 स त दृष्ट्वा देवकुलं –b) दे5 विनागत (→विनागतम्) –c) दे2 दधीचिर् (→दधीचो), प्र1 2 म1 ब्रह्मर्षि (→विप्रर्षि) –cd) दे4 यो दधीच इति प्रोक्तो मुनिरनमभ्यभाषत.

❀ दे3 4 न1 द1 प्र1 2 म1 ⊙, ते1 दधीच.

७ न1 ⊙; दे4 ab ⊙ –a) दे8-10 मुवें मुए ब्रह्मा-द्यास्तु म1 प्राचेतस (→ब्रह्मादय) –b) दे2 यस्यानुज्ञा°, दे3 यस्याज्ञार्थ°, दे5 यस्याज्ञान°, दे8 यज्ञाज्ञार्थ°, द1 यज्ञास्यानु°, म1 यज्ञस्यानु° (→यस्याज्ञानु°), दे10 यज्ञा तु विविधायिन –c) प्र2 तदेव (→स देव), दे2 रुद्रो, + यज्ञे (→रुद्रो) –d) दे4 पूजयेत् (→पूज्यते), का1 विधानात् किं न युज्यते

❀ दे4 म1 ⊙, दे8 9 दक्ष उ, न1 ते1 द1 प्र1 2 दक्ष

८ –a) दे5 सर्वेश्चैव, दे10 सर्वेष्वेव (→सर्वेष्वेव) –b) प्र1 2 म1 विभाग (→न भाग), दे3 द1 प्र1 म1 परि-कीर्तित, प्र2 कल्पिता मया (→परिकल्पित) –c) का1 दे1 5 न मन्त्रो, दे1 नमन्त्रो (→न मन्त्रा), द1 प्र1 2 नमन्त्रो-क्वार्यया सार्द्धं –d) द1 शकरस्येय (→शंकरस्येति); प1 दे2 8-10 द1 नेष्यते, दे4 नेशते, प्र2 इज्यते (→नेज्यते)

९ प्र2 bcd ⊙, दे4 cd ⊙ –a) प्र2 दक्ष (→दक्ष) –b) का1 वर, म1 वाच (→वच); दे4 °मति (→°मुनि) –d) ब1 सर्वयज्ञ° (→सर्वज्ञान°); का1 पद, ब2 3 दे3 5 6 पर, दे10 स्वय, + शिवं (→स्वयम्)

❀ दे1 ⊙, दे1.2 द1 दधीचिरुवाच; दे8 9 दधीच उ, दे10 दधीची उवु, न1 ते1 प्र1 2 म1 दधीच (प्र2 °चि).

१० –a) ब1 प्रसूतिर् (→प्रवृत्तिर्), ब1 दे2 विश्वस्य, ब2 3 दे1 8-10 न1 ते1 द1 प्र1 2 म1 मुवें मुए मुव विश्वात्मा, दे1 सर्वेषा (→विश्वेषा), दे4 कोऽन्योरिवृत्तिविश्वात्म. –b) ब1 यश्चात्मा, दे1 यथास्य, दे2 यश्चात्मा, दे1 परोऽस्य, दे8-10 मुवें मुए मुव यश्चात्मो, प्र1 यश्चापि, प्र2 यश्चाप्या (→यश्चास्य). –c) द1 प्र1 म1 °यज्ञे (→°यज्ञैर्) –d) न1 दे8-11 य1 मुवें मुए मुव विश्व, प्र2 शिव (→विज्ञ).

दक्ष उवाच ।*

७१ –a) प्र2 स एवा(त्मा)-(→स एव) –b) दे10 वासुदेवे, न1 वासुदेवान, प्र2 वसुदेवो (→वासुदेवो), दे1 जगन्मया (→जगन्मय) –c) दे1 ** युधा (→हलायुध), म1 स्वक (→स्वयं), ते1 हलायुधस्य भगवान् –d) दे3 6 देव, दे10 मश (→शेष).

वें १ २४ ७३ भृगुशापच्छलेनैव मानयन् मानुषीं तनुम् ।
बभूव तस्यां देवक्यां रोहिण्यामपि माधवः ॥७२
उमादेहसमुद्भूता योगनिद्रा च कौशिकी ।
नियोगाद् वासुदेवस्य यशोदातनया ह्यभूत् ॥७३
ये चान्ये वसुदेवस्य वासुदेवाग्रजाः सुताः ।
प्रागेव कंसस्तान् सर्वान् जघान मुनिपुंगवाः ॥७४
सुषेणश्च तथोदायी भद्रसेनो महाबलः ।
ऋजुदासो भद्रदासः कीर्तिमानपि पूर्वजः ॥७५
हतेष्वेतेषु सर्वेषु रोहिणी वसुदेवतः ।
असूत रामं लोकेशं बलभद्रं हलायुधम् ॥७६
जातेऽथ रामे देवानामादिमात्मानमच्युतम् ।
असूत देवकी कृष्णं श्रीवत्साङ्कितवक्षसम् ॥७७
रेवती नाम रामस्य भार्यासीत् सुगुणान्विता ।
तस्यामुत्पादयामास पुत्रौ द्वौ निशठोल्मुकौ ॥७८
षोडशस्त्रीसहस्राणि कृष्णस्याक्लिष्टकर्मणः ।
बभूवुरात्मजास्तासु शतशोऽथ सहस्रशः ॥७९
चारुदेष्णः सुचारुश्च चारुवेषो यशोधरः ।
चारुश्रवाश्चारुयशाः प्रद्युम्नः शंख एव च ॥८०

७२ –a) व1 भृगुशापात् छलेनैव, दे1 भृगुशापात् क्षलेनैव, दे4 भृगुच्छायोच्छलेनैव, दे5 द1 प्र1 2 म1 भृगुशापबलेनैव –b) दे4 चारयन् (→मानयन्), दे3 मानवी (→मानुषी) –c) न1 तस्या, प्र2 तत्र, म1 तस्य (→तस्यां)

७३ का1 d ○ –a) व1-3 दे2 3 5 8 उमा देवी, दे1 उमादेहे (→उमादेह-) व2 -समुत्पन्न। (→ समुद्भूता) –b) दे4 °निद्राश्च (→°निद्रा च) –d) प्र2 तनयाभ्यभूद्, मुवें मुए मुव °तनया ह्यभूत (→°तनया ह्यभूत्)

७४. का1 a ○ –a) प्र2 वासु° (→वसु°) –b) व3 वासुदेवा प्रजा सुता, दे4 वसुदेवप्रजा पुन –c) दे3 8 कस (→कंस) –d) दे4 प्र2 °पुङ्गव, दे8-10 न1 ते1 मुवें मुए मुव °सत्तमा (→°पुंगवा)

७५ –a) दे8 सुखेण (→सुषेण), दे1 तु (→च), का1 तथोदायीर्, व1 3 तथोदापि, व2 दे3 5 6 मुव तथोदायिर्, दे1 तदादीयं, दे4 तथा द सो, दे8 10 मुवें मुए ततोदायी, न3 तथोदाया, द1 प्र1 म1 तथा दासो, प्र2 ततो दायो (→तथोदायी), ते1 सुषेण सुनसो द्रोहो –b) न1 भेदसेनो, म1 भद्रिसेनो (→भद्रसेनो), प्र2 महायशा (→महाबल) –c) व3 एश्वदासो, दे1 रुद्रदासो, दे2 न1 ऋजुदासो, दे4 ऋतुदासो, दे6 ऋतुकामो, दे8 10 मुवें मुए यज्ञदम्भो, न1 ह्रदो दासो, प्र1 ऋजुस्यासा, प्र2 ऋजुस्समो, म1 ऋजुस्सोमो (→ऋजुदासो), दे1 रुद्रसेन, दे2 8 10 न1 ते1 मुवें मुए भद्रसेन, म1 भद्रिदास (→भद्रदास) –d) वे1 इति (→अपि), दे8 10 प्र2 मुवें मुए मुव पूर्विन, ते1 म1 पूर्वजा (→पूर्वज)

७६ दे3 ७६ ७७ ○ –a) प्र2 ते1 हतेषु तेषु सर्वेषु –b) दे5 प्र2 वासु° (→वसु°), व2 °देवयो (→°देवत)

७७ दे3 ○ (द्र ७६ पा वि) –a) दे2 5 जातेथा, ते1 जाते तु, द1 प्र1 म1 जातीय, प्र2 जातीउ (→जातेऽथ); द1 प्र1 2 म1 राम (→रामे) –b) व3 प्रथिमा°, दे2 मदिना°, दे5 मादित्या°, दे10 माजिता° (→मादिमा°), दे1 अच्युय (→मच्युत) –c) दे2 4 द1 प्र1 2 म1 पुत्र (→कृष्ण) –d) व1 3 °लक्षण (→°वक्षसम्), का1 व1 दे5 6 न1 श्रीवत्सकृत (व2 °ति) लक्षणम्, दे4 कृष्ण श्रीवत्सलक्षणम् द1 प्र1 2 म1 कृष्ण श्रीवत्सलाञ्छितम् (द1 °लाञ्छनम्)

७८ –a) व3 रेवती (→रेवती) –b) दे8 भार्याया, ते1 भार्याभूत्, प्र2 भार्या सा (→भार्यासीत्), का1 दे5 स्वगुणा°, व2 दे10 सद्गुणा°, वे6 सगुणा°, न1 द्वा गुणा° (→सुगुणा°), दे1 भार्या सीता गुणान्विता, द1 प्र1 म1 भार्या साधुगुणान्विता –d) न1 पुत्रद्वौ, दे3 6 द्वौ पुत्रौ (→पुत्रौ द्वौ), व1 निपाणको, व3 निशिचोल्मुकौ, दे1 निशपुल्कौ, दे5 प्र1 मुवें मुए निशितोल्मुकौ, दे8 10 निशतो (दे10 °पथो) ल्मुकौ, द1 निशठोलुकौ, प्र2 निशरेलुकौ (→निशठोल्मुकौ)

७९ –b) दे10 कृष्ण स्यात् (→कृष्णस्य) –c) दे8 10 न1 मुवें मुए मुव °स्त्वात्मजास्, वे1 °रात्मजा, व1 °रात्मजस् (→°रात्मजास), ते1 वासुदेवात्मजास्तासु

८० –a) व1 चारुदेव, दे1 वासुदेश, दे5 8 9 चारदेष्णु, ते1 चारुवेष्ण, +चारुदेष्ण, प्र2 चारुदोष्ण (→चारुदेष्ण), दे3 4 सुदेष्णश्च, द1 प्र1 सुदेष्णस्तु, प्र2 सुदोष्णस्तु, म1 सुदेष्णाश्च, +सुदेष्णस्तु (→सुचारुश्च) –b) का1 व1-3 दे1 3 5 न1 चारुवेशो, दे8 10 चारुदेशो, ते1 चारुदेहस्, म1 चारुदेष्ण (→चारुवेषो), का1 व1 दे5 10 यशोधन, दे1 सुयोधन, दे4 द1 प्र2 म1 कुशोदर, ते1 धरापर, प्र1 कृशोदर (→यशोधर) –c) का1 चारुश्च चारुयाक चारु, प्र2 श्रावश्चात्मवास यशा –d) दे1 6 8-10 ते1 मुवें मुए सांब, दे5 ** (→शंख), का1 दे4 यथा (दे4 येथ) प्रद्युम्न एव च, द1 प्र1 2 म1 साम्ब प्रद्युम्न एव च

रुक्मिण्या वासुदेवस्य महाबलपराक्रमाः ।
विशिष्टाः सर्वपुत्राणां संबभूवुरिमे सुताः ॥८१
तान् दृष्ट्वा तनयान् वीरान् रौक्मिणेयाञ्जनार्दनम् ।
जाम्बवत्यब्रवीत् कृष्ण भार्या तस्य शुचिस्मिता ॥८२
मम त्वं पुण्डरीकाक्ष विशिष्टं गुणवत्तमम् ।
सुरेशसदृशं पुत्रं देहि दानवसूदन ॥८३
जाम्बवत्या वचः श्रुत्वा जगन्नाथः स्वयं हरिः ।
समारेभे तपः कर्त्तुं तपोनिधिररिंदमः ॥८४
तच्छृणुध्वं मुनिश्रेष्ठा यथाऽसौ देवकीसुतः ।
दृष्ट्वा लेभे सुतं रुद्रं तप्त्वा तीव्रं महत् तपः ॥८५ वें १२४८८

इति श्रीकूर्मपुराणे षट्साहस्त्र्यां संहितायां पूर्वविभागे त्रयोविंशोऽध्याय ॥२३॥

---

८१ –a) व1 रुक्मिण्याद्, दे1 रुक्मिण्या, द1 रुक्मिणी (→रुक्मिण्या), दे10 वासुदेवस्व (→वासुदेवस्य) –b) दे1 4 5 प्र2 °पराक्रम (→°पराक्रमा) –c) का1 वसिष्ठा, दे1 विशिष्ट, द1 वशिष्ठा, प्र1 म1 वरिष्ठा, प्र2 वरिष्ट (→विशिष्टा) –d) ते1 इनि (→इमे), दे1 सुत, न1 सुता: (→सुता)

८२ –a) प्र1 वीरा (→वीरान्) –b) दे4 9 ते1 जनादन, दे5 म1 जनादना, दे8 10 द1 प्र1 2 मुवें मुए मुव जनार्दनात् (→जनार्दनम्) –c) प्र2 म1 वाक्य (→कृष्ण), दे3 6 जाम्बवत्य (दे6 °त्या) ब्रवीत् कृष्ण –d) प्र2 म1 कृष्ण भार्या (→भार्या तस्य), व3 शुचि (→शुचि~), दे6 °स्मिता (→°स्मिता)

८३ –a) दे1 समत्व, दे5 तान् दृष्ट्वा, व1 न मेत्व (→मम त्व), व1 दे4 5 न1 पुण्डरीकाक्ष (→पुण्डरीकाक्ष) –b) का1 दे3 8 न1 मुवें मुए मुव विशिष्ट (→विशिष्ट), का1 व1-3 दे1 3 6 8-10 म1 मुवें मुए मुव गुणवत्तरम् (दे5 °रो) (→गुणवत्तमम्) –c) दे3 6 सुदेश, न1 सुदेश- (→सुरेश), दे1 6 न1 मुवें मुए मुव -सन्निभं, दे9 10 सन्निभं (→सदृश), ते1 सुरेश्वरेप्सित पुत्र, द1 प्र1 2 म1 पुत्र परमधर्मिष्ठ –d) दे5 °सूदन (→°सूदन)

८४ –b) दे4 5 प्र1 2 म1 जगन्नाथ (→जगन्नाथ), दे1 हरि स्वय (→स्वयं हरि) –c) दे10 जप (→तप), द1 प्र1 2 म1 चतु (→कर्तुं) –d) दे4 6 °रिन्दम (दे6 °म) (→°रिं-दम)

८५ –a) दे3 6 त श्रृ (दे6 तु)णुध्व, म1 तच्छ्रुत्वा तु (→तच्छृणुध्व), दे4 5 8 10 °श्रेष्ठ (?), प्र2 °श्रेष्ठ (→°श्रेष्ठा) –c) दे1 कृष्णो, दे8 दृष्ट्वा,+दृष्ट्वा (→दृष्ट्वा) –d) का1 तथा, प्र1 तप्त्वा (→तप्त्वा), व3 दे5 तीव्र- (→तीव्र), दे10 महातप (→महत्तप)

पुष्पिका –

पुराणनाम—का1 इत्यादिमहापुराणे कौर्मे, व1-3 दे2 3 6 प्र1 इति कूर्मपुराणे, दे1 4 8-10 द1 प्र2 म1 मुवें मुए इति श्रीकूर्मपुराणे, दे5 इति श्रीमहापुराणे कौर्मे, न1 इति श्रीकौर्मे, ते1 इत्यादिमहापुराणे श्रीकौर्मे, मुव इति श्रीकौर्मे महापुराणे पूर्वभागे अध्यायनाम—दे4 न1 ते1 द1 प्र1 2 म1 ○, का1 व1-3 दे1 3 5 8 10 मुए यदुवंशानुकीर्त्तने, दे6 मुवें यदुवंशानुकीर्त्तन नाम, मुव सोमवंशे यदुवंशानुकीर्तने अध्यायसंख्या— दे6 ○, का1 व1 3 दे3 5 न1 ते1 द1 प्र1 द्वाविंशोऽध्याय, व2 ॥२२॥ व1 चतुर्विंशतमोऽध्याय ॥२४॥, दे2 8 9 प्र2 म1 चतुर्विंशोध्याय, दे10 चतुर्विंशतितमोऽध्याय ॥२४॥ श्रीराम, मुवें मुए मुव चतुर्विंशोऽध्याय ॥२४॥

२४

सूत उवाच ।❀

वें १.२५.१ अथ देवो हृषीकेशो भगवान् पुरुषोत्तमः ।
तताप घोरं पुत्रार्थं निदानं तपसस्तपः ॥१
स्वेच्छयाऽप्यवतीर्णोऽसौ कृतकृत्योऽपि विश्वधृक् ।
चचार स्वात्मनो मूलं बोधयन् भावमीश्वरम् ॥२
जगाम योगिभिर्जुष्टं नानापक्षिसमाकुलम् ।
आश्रमं तूपमन्योर्वै मुनीन्द्रस्य महात्मनः ॥३
पतत्त्रिराजमारूढः सुपर्णमतितेजसम् ।
शङ्खचक्रगदापाणिः श्रीवत्सकृतलक्षणः ॥४
नानाद्रुमलताकीर्णं नानापुष्पोपशोभितम् ।
ऋषीणामाश्रमैर्जुष्टं वेदघोषनिनादितम् ॥५
सिंहर्क्षशरभाकीर्णं शार्दूलगजसंयुतम् ।
विमलस्वादुपानीयैः सरोभिरुपशोभितम् ॥६
आरामैर्विविधैर्जुष्टं देवतायतनैः शुभैः ।
ऋषिकैर्ऋषिपुत्रैश्च महामुनिगणैस्तथा ॥७
वेदाध्ययनसंपन्नैः सेवितं चाग्निहोत्रिभिः ।
योगिभिर्ध्याननिरतैर्नासाग्रगतलोचनैः ॥८

२४

[दे$_{10}$ पुस्तके अध्यायारम्भे अधिकम्–श्रीगणेशाय नमः]

❀ न$_1$ ग्र$_{1\,2}$ सूत , तै$_1$ श्रीशिव ,+सूत , ब$_1$ म$_1$ श्रीसूत

१ –b) द$_1$ ग्र$_{1\,2}$ म$_1$ देवकीसुत (→पुरुषोत्तम) –c) न$_1$ त (पा) ताप (→ततापं), ब$_{2\,3}$ दे$_3$ ते$_1$ पुत्रार्थो (→पुत्रार्थम्), का$_1$ तेपे घोरं च पुत्रार्थं –d) का$_1$ ब$_{1\,3}$ दे$_{1\,3\,5\,6\,8\text{-}10}$ न$_1$ मुबं मुए मुम निधानं (→निदानं), का$_1$ ब$_3$ तपसा तप , दे$_4$ तपसत्तम (→तपसस्तप)

२ –a) दे$_4$ सोवतीर्णो, दे$_{8\,10}$ ह्यवतीर्णो, द$_1$ [अ]प्यवकीर्णो, ग्र$_1$ [अ]प्यवतीर्ण्णो (?) (→[अ]प्यवतीर्णो) –b) ब$_1$ दे$_{8\,9}$ न$_1$ मुबं मुए विश्वधृक्, ब$_2$ दे$_6$ तै$_1$ द$_1$ ग्र$_{1\,2}$ म$_1$ विश्वकृत्, दे$_3$ विश्वदृक् (→विश्वधृक्) –c) तै$_1$ जगाम (→चचार), ग्र$_2$ आत्मनो (→स्वात्मनो) –d) का$_1$ न$_1$ बोधयन्भावमीश्वर (न$_1$ °र), दे$_3$ भावयन् स्वात्मनीश्वरम्, दे$_{5\,6}$ योधयन् भावमीश्वर, दे$_4$ द$_1$ ग्र$_{1\,2}$ म$_1$ भावयन्भावमी (ग्र$_2$ °मी) श्वर, दे$_{8\,10}$ मुबं मुए मुम बोधयन् परमेश्वरम्, ते$_1$ वेदयन् भावमीश्वर

३ –a) का$_1$ युष्ट, दे$_{10}$ दृष्ट (→जुष्ट) –b) दे$_5$ °पक्ष–, ग्र$_2$ °पक्षिस् (→°पक्षि–) –c) ब$_1$ उपम • •र्योर्वै, दे$_1$ त्रिपमन्योर्वै, दे$_3$ चापमन्योर्वै, दे$_{4\,10}$ रूपमन्योर्वै, दे$_5$ स्तूपमन्यार्वै, दे$_6$ –द्रूपमन्योर्वै, द$_1$ उपमन्योर्वै (→तूपमन्योर्वै)

४ –a) दे$_{3\,6}$ पतन्ति (→पतत्त्रि–), दे$_{4\,8\,10}$ °मा (दे$_{10}$ सा) रुढ (→°मारूढ) –b) दे$_5$ ग्र$_1$ °तेजसा (ग्र$_2$ °स) (→°तेजसम्) –c) का$_1$ दे$_{5\,8\,9}$ ग्र$_{1\,2}$ म$_1$ °पाणिर (का$_1$ ग्र$_1$ म$_1$ °णि ?) (→°पाणि) –d) दे$_{1\,4\,8\,10}$ मुबं मुए श्रीवत्साङ्कित (→श्रीवत्सकृत–), दे$_1$ –वक्षस , दे$_{4\,8\,10}$ –लक्षणम् (→–लक्षण)

५ ग्र$_1$ १c–६d ○ (द्र ग्र) –a) दे$_4$ लता– (→नाना), दे$_1$ °सभाकीर्णं (→°लताकीर्णं) –b) दे$_5$ °शोभिता (→°शोभितम्) –c) तै$_1$ युक्त (→जुष्टं) –d) ब$_2$ वज्र° (→वेद°), दे$_3$ °घोषा° (→°घोष°), तै$_1$ ग्र$_2$ म$_1$ °विनादित (→°निनादितम्), दे$_4$ देवघोषसमाकुलम्

६ ग्र$_1$ ○ (द्र ५ पा टि) –a) दे$_5$ निनाद°, ग्र$_2$ गसिंहा° (→सिंहर्क्ष°), का$_1$ °शरशार्दूल, दे$_1$ °शलभाकीर्णं, दे$_{8\,9}$ °सरभाकीर्ण° (→°शरभाकीर्णं) –b) ब$_3$ शार्दूल (→शार्दूल–), ब$_{1\,3}$ दे$_{2\,4}$ द$_1$ ग्र$_2$ म$_1$ °संकुलम् (→°संयुतम्), का$_1$ बलवह्निपसाकुलम –c) दे$_{8\,10}$ विपल (→विमल–), दे$_{10}$ सुरभिश्च शोभितम्

७ –a) का$_1$ युष्ट (→जुष्ट) –b) का$_1$ शुभ (→शुभैः) –c) दे$_{8\,10}$ ते$_1$ म$_1$ मुबं मुए मुम ऋषिभिर् (→ऋषिकैर्), दे$_5$ °पुत्रैश्च (→°पुत्रैश्च) –d) का$_1$ म$_1$ महामणि°, दे$_4$ सह मुनि° (→महामुनि°)

८ –b) दे$_1$ °होत्रभि (?) (→°होत्रिभि) –d) दे$_1$ नासाग्रे न्यस्त, दे$_4$ नासाग्र•त° द$_3$ मा(?)साग्रगत°, दे$_6$ नासा-ग्रगत°, दे$_{8\text{-}10}$ न$_1$ ते$_1$ द$_1$ ग्र$_1$ म$_1$ मुबं मुए मुम नासाग्र न्यस्त°, ग्र$_2$ सा नासान्यस्त° (→नासाग्रगत°)

उपेतं सर्वतः पुण्यं ज्ञानिभिस्तत्त्वदर्शिभिः ।
नदीभिरभितो जुष्टं जापकैर्ब्रह्मवादिभिः ॥९
सेवितं तापसैः पुण्यैरीशाराधनतत्परैः ।
प्रशान्तैः सत्यसंकल्पैर्निःशोकैर्निरुपद्रवैः ॥१०
भस्मावदातसर्वाङ्गैः रुद्रजाप्यपरायणैः ।
मुण्डितैर्जटिलैः शुद्धैस्तथान्यैश्च शिखाजटैः ।
सेवितं तापसैर्नित्यं ज्ञानिभिर्ब्रह्मचारिभिः ॥११
तत्राश्रमवरे रम्ये सिद्धाश्रमविभूषिते ।
गङ्गा भगवती नित्यं वहत्येवाघनाशिनी ॥१२

स तानन्विष्य विश्वात्मा तापसान् वीतकल्मषान् ।
प्रणामेनाथ वचसा पूजयामास माधवः ॥१३
ते ते दृष्ट्वा जगद्योनिं शङ्खचक्रगदाधरम् ।
प्रणेमुर्भक्तिसंयुक्ता योगिनां परमं गुरुम् ॥१४
स्तुवन्ति वैदिकैर्मन्त्रैः कृत्वा हृदि सनातनम् ।
प्रोचुरन्योन्यमव्यक्तमादिदेवं महामुनिम् ॥१५
अयं स भगवानेकः साक्षान्नारायणः परः ।
आगच्छत्यधुना देवः पुराणपुरुषः स्वयम् ॥१६
अयमेवाव्ययः स्रष्टा संहर्ता चैव रक्षकः ।
अमूर्तो मूर्तिमान् भूत्वा मुनीन् द्रष्टुमिहागतः ॥१७ दे.१.२४.१८

---

९ –a) दे3 उपत, दे5 उपते (→उपेत), दे4 सर्व त (→सर्वत) –b) का1 ज्ञानिभि, म2 मुनिभिस् (→ज्ञानिभिस्), दे4 द1 प1 2 म1 सर्व° (→तत्त्व°) –d) दे3 8 जा(दे8 या) परै[ ], दे10 जापकैर्, न1 तापकैर् (→जापकैर्), का1 व1 दे2 4 5 ब्रह्मचारिभि (→ब्रह्मवादिभि)

१० द1 प1 2 म1 १०a–११f ⊙ (द म) –a) का1 शोभित (→सेवित), दे1 पुण्य (→पुण्यै) –b) दे4 ईश्वराधन°, दे1 शिवाराधन° (→ईशाराधन°) –c) व2 प्रशान्तै(श्च), ते1 स्वाचारै (→प्रशान्तै), दे2 सर्व° (→सत्य°), दे1 °संकल्पैर् (→°संकल्पैर्) –d) व1 दे1 2 4 ते1 विशोकैर् (→निःशोकैर्) द1 निरुपप्लवै, व2 3 दे3 4 6 8-10 ते1 निरु पद्रवै (→निरुपद्रवै)

११ द1 प1 2 म1 ○ (दे, १० पा वि) –a) का1 °वदातै, दे5 वदा॰(→°वदात-), व3 दे10 सर्वाङ्ग (→सर्वाङ्गै) –b) व2 3 दे2 3 5 न1 ते1 जप्य°, दे1 जाप° (→जाप्य°) –c) दे1 रौविभवैर्, द2 मुण्डितै (→मुण्डितैर्), दे2 विविधै (→जटिलै), दे2 सिद्धै (→शुद्धै) –d) ते1 °जुटै (→°जटै), दे4 तथान्यैश्चाशिखाजटै –e) दे2 तापसैर् (→तापसैर्) –b) व1 3 दे3 4 6 त्या(दे3 ना)मि (दे4 °नि)भिर्, दे10 ज्ञानिभिर् (→ज्ञानिभिर्), दे1 2 4-8-10 न1 ते1 मुवँ मुए मुब ब्रह्मवादिभि (→ब्रह्मचारिभि), का1 सन्यासिभिब्रह्मचारिभि

१२ –a) दे10 °वरे, न1 °वर, द1 प1 2 म1 °पदे (→°वरे), न1 रम्य (→रम्ये) –b) म1 सिद्धा° (→सिद्धा°) दे1 प1 विभूषित (→विभूषिते) –c) दे4 नित्य(म) (→नित्य) –d) का1 दे5 वहते (दे5 °रवे) पापनाशिनी, व1 वहत्येवाघना-शिनी, दे1 वहत्येवौघनाशिनी, दे10 वहत्येवाघनाशनी (दे4 °नी), ते1 ग(व)हत्यघनाशिनी, द1 प1 2 म1 वहत्यघ-विनाशिनी

१३ –a) का1 तान्विमृशित(?) व1 तान्नि॰क्ष्य, व2 मुवँ मुए तत्र वीक्ष्य, व3 मुब तन्वीरीक्ष्य, दे1 तान्वावीक्ष्य, दे8-10 द1 प1 तामन्वीक्ष्य, न1 तानन्वीक्ष्य, प2 म1 तान्वीक्ष्य च (→तानन्विष्य), दे4 स तान्वीक्ष्य विशालात्मा, ते1॰॰॰॰॰ विश्वात्मा –b) प1 तपसान्, म1 तपसा (→तापसान्), व2 नष्ट°, दे3 5 हीन°, दे10 वीत°, न1 क्षीण° (→वीत°), व1 3 दे1 6 म1 तापसा (व3 °सान्) वीतकल्मषान् (दे6 °ष) –c) दे3 प्रमाणनाथ, ते1 प्रणम्य चाथ (→प्रणामेनाथ)

१४ –a) का1 व2 3 दे3 5 8 ते तु ते1 तेऽपि (→ते ते), व2 जगन्नाथ (→जगद्योनिं), दे4 त दृष्ट्वा च जगद्योनिं –c) दे5 पुण्यगुर् (→प्रणेमुर्) –d) द1 योगिनी, व2 योगानां, म1 साकाना (→योगिनां), दे5 6 परमा (→परमं)

१५ –a) प2 स्तुवन्तु (→स्तुवन्ति), ते1 वैष्णवैर्वि-निर्मन्त्रै –b) द1 प1 2 म1 दृष्ट्वा (→कृत्वा) –c) दे5 मध्यगम्, न1 सव्यक्तम्, ते1 मध्यमा, प2 मयुक्त (→मव्यक्तम्) –d) ते1 वासुदेवम् (→मादिदेवं)

१६ –a) ते1 मथ च (→मयं स) –b) द1 8-10 न1 मुवँ मुए मुब मार्गा (→साक्षान्), दे4 नारायणाः (→नारायण), द1 प1 2 म1 हरि (→नर) –d) मुरे मुए मुब प्रधान° (→पुराण°), दे1 द1 प1 2 म1 °पुरुष[?] (→°पुरुष)

१७ –a) द1 म1 सृष्टा (→स्रष्टा) –c) दे3 भूतान्, दे6 भूत्वा (→भूत्वा) –d) व2 मुनीन्द्रस्त्व (→मुनीन् द्रष्टुं), द1 प1 उपागत (→इहागत), प2 म1 मुनीन्द्रान् द्रष्टुमागत.

वें.१ २५ १८ एष धाता विधाता च समागच्छति सर्वगः ।
अनादिरक्षयोऽनन्तो महाभूतो महेश्वरः ॥१८
श्रुत्वा श्रुत्वा हरिस्तेषां वचांसि वचनातिगः ।
ययौ स तूर्णं गोविन्दः स्थानं तस्य महात्मनः ॥१९
उपस्पृश्याथ भावेन तीर्थे तीर्थे स यादवः ।
चकार देवकीसूनुर्देवर्षिपितृतर्पणम् ॥२०
नदीना तीरसंस्थानि स्थापितानि मुनीश्वरैः ।
लिङ्गानि पूजयामास शंभोरमिततेजसः ॥२१
दृष्ट्वा दृष्ट्वा समायान्तं यत्र यत्र जनार्दनम् ।
पूजयाञ्चक्रिरे पुष्पैरक्षतैस्तत्र वासिनः ॥२२
समीक्ष्य वासुदेवं तं शार्ङ्गशङ्खासिधारिणम् ।
तस्थिरे निश्चलाः सर्वे शुभाङ्गं तन्निवासिनः ॥२३
यानि तत्रारुरुक्षूणां मानसानि जनार्दनम् ।
दृष्ट्वा समाहितान्यासन् निष्क्रामन्ति पुरा हरिम् ॥२४
अथावगाह्य गङ्गायां कृत्वा देवादितर्पणम् ।
आदाय पुष्पवर्याणि मुनीन्द्रस्याविशद् गृहम् ॥२५
दृष्ट्वा तं योगिनां श्रेष्ठं भस्मोद्धूलितविग्रहम् ।
जटाचीरधरं शान्तं ननाम शिरसा मुनिम् ॥२६
आलोक्य कृष्णमायान्तं पूजयामास तत्त्ववित् ।

१८ –b) ग्र2 °गच्छति (?) (→°गच्छति), का1 दे5 10 सर्वग, ते1 सर्वद (दा), द1 सर्वदा (→सर्वग) –c) का1 व1 दे4 न1 ते1 द1 ग्र1 म1 °रक्षरोऽनन्तो (द1 °न्दो), व3 दे1 5 °रक्षकानन्तो, दे9 °रक्षरोऽनन्तो, ग्र2 °रक्षयो म त्रो (→°रक्षयोऽनन्तो) –d) दे1**भूतो, दे0 ग्र2 म1 महादेवा (→महाभूतो)

१९ –a) दे1 8-10 न1 मुर्वें मुए मुव श्रुत्वा, दे3 श्रुतो, दे4 द1 ग्र1 2 म1 स्मृत्वा, ते1 मुदा (→श्रुत्वा); ग्र2 ग्र2 म1 वचस्तेषां (→हरिस्तेषां) –b) दे1 वचमा (?) तिग°, द1 म1 वचनादिक (ग्र1 °क), ग्र2 वचनागुम (→वचनातिग.) –c) द1 ग्र1 स तुष्णीं, ग्र2 म1 तूष्णी स (→स तूर्णं), दे8 गोविन्द, द1 गोविन्दे, दे10 ग्र1 2 म1 गोविन्द(?) (→गोविन्द) –d) का1 व1-3 दे3 6 महामुने, ग्र1 महात्मना (→महात्मन)

२० –b) दे1 ते1 द1 ग्र1 2 म1 माधव (→यादव), दे1 6 तीर्थे तीर्थतमादर –c) ग्र2 चचार (→चकार), दे5 *नुर्, ग्र2 सुनो (→सूनुर्) –d) दे1 दशवर्ष, दे5 (देवा)देवर्षि° (→देवर्षि°)

२१ व1 २१-२१ h ○ –a) न1 तीर्थ° (→तीर°), दे10 *स्थानि, म1 मुर्वें मुए °सस्थाने (→°संस्थानि), दे1 नदीनां नीरसंस्थानि –b) दे1 * पितानि (→स्थापितानि), का1 दे5 गुरेश्वरैः, दे4 मुनीश्वर (→मुनीश्वरैः)

२२ व1 ○ (द्र २१ पा वि) –b) का1 व2 3 दे1-6 न1 द1 ग्र1 2 म1 मुव तत्र दे10 तत्र यत्र, ते1 तत्र दृष्ट्वा (→यत्र यत्र) –c) ग्र2 दैवैं [ ] (→पुष्पं), दे3 पूजया(मासे)श्चक्रिरे पुष्पैर् –d) द5 स्नातैम्, ग्र2 रजतैम् (→क्षतैम्), दे8 10 तत्रवासिभि, ते1 तपस्विन, मुर्वें मुए मुव तन्निवासिन (→तत्र वासिन)

२३ दे1 ○, व1 ab ○ (द्र २१ पा वि) –a) ग्र1 2 म1 समाज्य (ग्र2 °ज्य) (→समीक्ष्य), वे1 तु (→त) –b) दे5 ग्र2 म1 शङ्खचक्रासि°, ते1 शङ्खशार्ङ्गासि°, द1 ग्र1 शार्ङ्गचक्रासि° (→शार्ङ्गशङ्खासि°) –c) ते1 दधिरे (→तस्थिरे), दे1 निखिला (→निश्चला) –d) का1 शुभागन-स्तन, व1 शुभ्रागस्ते, दे2 शुद्धाङ्ग त, दे3 0 शुभ्राङ्गान्त, ते1 सिद्धास्तत्र (→शुभाङ्ग तन्), दे5 शुभ्रा वसीरवासिन, दे8 शुभागमतानना, दे9 शुभागावननानना, दे10 शुभागा च नतानना, मुर्वें मुए शुभाङ्गावनमानना

२४ –a) ग्र2 तानि (→यानि), का1 तत्र दिदृक्षूणां, व2 दृष्ट्वा रुरुक्षूणां, दे10 तत्र तदरुक्षाणां, ग्र1 तत्र मुमुक्षूणां, ग्र2 यत्रारुरुक्षाणां (→तत्रारुरुक्षूणां) –b) ग्र2 म1 मनांसीति (→मानसानि) –c) व3 समाहितोऽन्यासन्, दे8 10 समाहुता (दे10 °ता) न्यासन्, म1 समाहित न्यासन् (→समाहितान्यासन्), ग्र2 दृष्ट्वा हितान्तु स न्यासन् –d) व2 3 निष्क्रामन्ति चाद्भुत दे1 द1 म1 निष्कामन (म1 द1 °न्त) पुरो हरि°, ते1 भक्तिमन्ति पुरा हरिम्, ग्र1 निष्क्रामन्ति न तापस, ग्र2 निष्कात त्रिपुरो हरि, मुव न निष्कामन्ति चाद्भुत.

२५ –a) ते1 प्रयाव गैर्थ (→प्रथावगाह्य) –b) दे8 10 न1 मुर्वें मुए मुव देवर्षि° (→देवादि°) –c) का1 व1 दे2 3 मुव पुष्पवर्याणि, दे10 पुष्पचर्यापु (?) (→पुष्पवर्याणि) –d) का1 व1-3 दे1-8 ते1 द1 ग्र1 2 म1 मुनीशस्य (→मुनीन्द्रस्य), का1 [प्रा]विशद् गृह, + प्रविशद् गृह, व1 ग्र1 [प्रा]विशत् गृह (→[प्रा]विशद्गृह)

२६ व1 दे4 10 ab ○ –a) ग्र2 तद्, ते1 तु (→त) –b) दे5 भस्मोद्धूलितविग्रहं –c) ते1 जटाजिनधर, ग्र2 म1 जटाजिनधर (→जटाचीरधर) –d) का1 दे1 10 ननाम (→ननाम), का1 व1-3 दे3 6 मही, दे1 नमद् (→मुनिम्)

आसने चासमायामास योगिना प्रथमातिथिम् ॥२७
उवाच वचसा योगिं जानीमः परमं पदम् ।
विष्णुमव्यक्तसंस्थानं शिष्यभावेन संस्थितम् ॥२८
स्वागतं ते हृषीकेश सफलानि तपांसि नः ।
यत् साक्षादेव विश्वात्मा मद्गेहं विष्णुरागतः ॥२९
त्वां न पश्यन्ति मुनयो यतन्तोऽपि हि योगिनः ।
तादृशस्याथ भवतः किमागमनकारणम् ॥३०
श्रुत्वोपमन्योस्तद् वाक्यं भगवान् केशिमर्दनः ।
व्याजहार महायोगी वचनं प्रणिपत्य तम् ॥३१

श्रीकृष्ण उवाच ॥ॐ

भगवन् द्रष्टुमिच्छामि गिरीशं कृत्तिवाससम् ।
संप्राप्तो भवतः स्थानं भगवद्दर्शनोत्सुकः ॥३२
कथं स भगवानीशो दृश्यो योगविदां वरः ।
मयाऽचिरेण कुत्राहं द्रक्ष्यामि तमुमापतिम् ॥३३
इत्याह भगवानुक्तो दृश्यते परमेश्वरः ।
भक्त्या चोग्रेण तपसा तत्कुरुष्वेह यत्नतः ॥३४
इहेश्वरं देवदेवं मुनीन्द्रा ब्रह्मवादिनः । बॅ १ २५ ३५

२७ –b) दे$_{10}$ तत्वत (→तत्त्ववित्) –c) का$_1$ च$_{1\,3}$ दे$_{2\,4\,8\,10}$ न$_1$ मुवॅ मुए मुव वासयामास, ब$_2$ ते$_1$ स्थापयामास, दे$_1$ ग्र$_1$ भोजयामास, ग्र$_2$ भोजमास म$_1$ भास*मास (→चासयामास) –d) दे$_{8\,10}$ योगिन म$_1$ भागाना (→योगिना), दे$_{3\,6}$ प्रथमा तिथिम्, ग्र$_2$ प्रमगातिथि (→प्रथमातिथि)

२८ –a) दे$_5$ द$_1$ ग्र$_1$ म$_1$ वचसा (→वचसा), द$_1$ ग्र$_1$ म$_1$ योगी (→योगिं), ग्र$_2$ उवाच वामयोगी (?) –b) ब$_{1\,3}$ दे$_{3\,5\,6}$ जानाम, बे$_1$ जगा*, दे$_2$ जागत दे$_4$ तावान, न$_1$ अजानाम, ते$_1$ भूताना (→जानीम), द$_1$ ग्र$_1$ म$_1$ जानन्नपि पर पदम् ग्र$_2$ जानतपि पर पदम् –c) ते$_1$ यद्युत° (→अव्यक्त°)

२९ –a) व$_1$ आगान्ते (→स्वागत ते), दे$_5$ ग्र$_2$ हृषीकेश (→हृषीकेश) –b) दे$_2$ द$_1$ ग्र$_{1\,2}$ म$_1$ तपांसि (ग्र$_2$ °पसा) सफलानि न, दे$_4$ सकलानि तपसा सित –c) न$_1$ य (→यत्), व$_3$ दे$_{4\,10}$ न$_1$ ग्र$_{1\,2}$ म$_1$ देव (→एव), ते$_1$ यत्स्तेदेवो विश्वात्मा –d) का$_1$ दे$_5$ मद्गेहम, व$_{1-3}$ दे$_{3\,6}$ मद्देश दे$_8$ मद्गेहे दे$_4$ तद्गेहो (→मद्गेह), न$_1$ °गत (→°गत), ते$_1$ गृह विष्णुरुपागत

३० –a) दे$_{3\,6}$ त्वा नमस्यन्ति, न$_1$ त न पश्यन्ति, ते$_1$ य न पश्यन्ति (→त्वा न पश्यन्ति) –b) दे$_{1\,5\,9}$ न$_1$ मुवॅ मुए मुव [इ]ह (→हि), ग्र$_1$ योगिनाम् (→योगिन), ते$_1$ यत्नेनापीह योगिन –c) ब$_1$ मादृशस्याथ, दे$_1$ न$_1$ मुवॅ मुए मुव तादृशस्यात्र, दे$_3$ तादृशस्यापि, दे$_4$ तादृशस्यापित, दे$_{8\,9}$ मादृशस्यास्य, दे$_{10}$ मादृशस्या(?)च, ते$_1$ मादृशस्याथ, द$_1$ ग्र$_1$ म$_1$ तादृशस्यापि (→तादृशस्याथ), दे$_1$ [भ्र]भवत, दे$_{8\,10}$ भगवन् (→भवत)

३१ –a) दे$_4$ °म मुस्नद् (→°न योरतद्) –b) दे$_{1\,2\,8-10}$ ते$_1$ मुवॅ मुए मुव देवकीसुर (→केशिमर्दन) –d) दे$_{8\,10}$ मुवॅ, मुए मुव प्रसन्न, ग्र$_2$ भवन्त (→वचन), दे$_{7\,8}$ ता, न$_1$ क (→तम्)

ॐ द$_1$ ग्र$_{1\,2}$ म$_1$ ○, व$_{1\,2}$ दे$_{2\,5\,6}$ मुवॅ मुए कृष्ण उवाच, दे$_{3\,8\,9}$ कृष्ण उ, न$_1$ कृष्ण, ते$_1$ श्रीकृष्ण

३२ –b) का$_1$ गिरिश व$_1$ गिरूश, द$_1$ ग्र$_{1\,2}$ म$_1$ ईश्वर (→गिरीश), व$_1$ कृत्ति°, + कीर्ति° (→कृत्ति°) –c) ग्र$_1$ सप्राप्ते (→संप्राप्तो), व$_1$ भगवत, ग्र$_2$ भगवान् (→भवत), दे$_4$ स्थाने (→स्थान) –d) दे$_{1\,9\,10}$ न$_1$ ग्र$_1$ भगवन् (दे$_{10}$ वान्) (→भगवद्), दे$_{3\,6}$ °नोत्सुक (→°नोत्सुक)

३३ –a) ते$_1$ च (→स) –b) ग्र$_2$ विश्व॰ (→दृश्यो), दे$_2$ ब्रह्म° (→योग°) का$_1$ तत् कुरुष्वेह यत्नत –c) द$_1$ ग्र$_1$ म$_1$ यथा, ग्र$_2$ यदा (→मया), दे$_4$ कुत्वाह, दे$_5$ ग्र$_1$ कुत्राह, ते$_1$ कुशाल ग्र$_2$ म$_1$ तत्राह (म$_1$ °ह्) (→कुत्राह), का$_1$ मायाविरहत कुत्र –d) दे$_{10}$ प्रक्ष्यामि (→द्रक्ष्यामि) दे$_{10}$ तद् (→तम्)

३४ –a) न$_1$ मुवॅ मुए मुव भत्याह (→इत्याह), दे$_2$ गुप्तो, दे$_7$ रुद्रो (→उक्तो) –b) दे$_7$ दृश्यते भगवान् हर –c) का$_1$ व$_{1-3}$ दे$_{3\,4\,6\,8-10}$ न$_1$ मुवॅ मुए मुव भक्त्यैवोग्रेण, दे$_5$ तपस्वा चोग्रेण, ग्र$_1$ भक्त्यानुग्रेण (→भक्त्या चोग्रेण), का$_1$ मनसा, म$_1$ महता (→तपसा) –d) दे$_1$ कुरुष्वैव (→कुरुष्वेह), का$_1$ दे$_{10}$ सयुत, दे$_{8\,9}$ मुवॅ मुए मुव सयना, न$_1$ यतत (→यत्नत), दे$_2$ तत् कुरुष्व प्रयत्नेन

३५ –a) दे$_{5\,6}$ ग्र$_2$ म$_1$ महेश्वर, ते$_1$ दहेश्वर (→इहेश्वर), दे$_4$ ईश्वर देवदेव त –b) दे$_5$ मुनीन्द्रान् (→मुनीन्द्रा) –c) व$_{1\,2}$ दे$_5$ ध्यायन्तोप्पा(?)सते (दे$_3$ °तो) देव, दे$_1$ ध्यायन्ते

वें. १ २५ ३१ ध्यायन्तोऽत्रासते देवं जापिनस्तापसाश्च ये ॥३५
इह देवः सपत्नीको भगवान् वृषभध्वजः ।
क्रीडते विविधैर्भूतैर्योगिभिः परिवारितः ॥३६
इहाश्रमे पुरा रुद्रात् तपस्तप्त्वा सुदारुणम् ।
लेभे महेश्वराद् योगं वसिष्ठो भगवानृषिः ॥३७
इहैव भगवान् व्यासः कृष्णद्वैपायनः प्रभुः ।
दृष्ट्वा तं परमं ज्ञानं लब्धवानीश्वरेश्वरम् ॥३८
इहाश्रमवरे रम्ये तपस्तप्त्वा कपर्दिनः ।
अविन्दत् पुत्रकान् रुद्रात् सुरभिर्भक्तिसंयुता ॥३९
इहैव देवताः पूर्वं कालाद् भीता महेश्वरम् ।
दृष्टवन्तो हरं श्रीमन्निर्भया निर्वृतिं ययुः ॥४०
इहाराध्य महादेवं सावर्णिस्तपतां वरः ।
लब्धवान् परमं योगं ग्रन्थकारत्वमुत्तमम् ॥४१
प्रवर्तयामास शुभां कृत्वा वै संहितां द्विजः ।
पौराणिकीं सुपुण्यार्थां सच्छिष्येषु द्विजातिषु ॥४२

तपसा देवो, दे2 ते1 ध्यायन्ति साधवो देव, दे4 ध्यायन्त्युपासते देव, दे5 ध्यायन्तो ध्यायते देव, दे8 10 न1 मुवें मुए मुव ध्यायन्त्याराधयन्त्येन, द1 प्र1 2 म1 ध्यायन्त्युपासते देव –d) दे1 2 8 10 न1 ते1 मुवें मुए मुव योगिनस् दे4 जापितम् (→जापिनस्), दे8 ते1 द1 प्र1 2 म1 तपसा स्व(ते1 त्व)थम् (→तापसाश्च ये)

३६ –a) प्र2 देव (→देव), प्र2 सपत्नीक (→सपत्नीको) –b) दे3 6 गोवृषध्वज (→वृषभध्वज) –c) द1 क्रीडन्ते (→क्रीडते) –d) दे8 परिवारिते, प्र2 परमाद्रित (→परिवारित)

३७ –a) प्र2 रुद्रास्, दे1 रुद्रो, दे1 5 न1 द1 रुद्रा(?), दे8-10 मुवें मुए मुव रुद्र ते1 रौद्र, प्र2 म1 रौद्रे (→रुद्रात्) –c) व1 महेश्वरो, दे4 प्र1 2 महेश्वर, द1 म1 माहेश्वर (→महेश्वराद्), न1 लेभिरे चेश्वराद्योग

३८ –a) प्र2 इहैव (→इहैव). –b) दे8-10 मुवें मुए स्वयम् (→प्रभु) –c) दे8-10 तम् (→तं), दे1 मुवें मुए मुव दृष्ट्वा वै परमेशान, दे2 दृष्ट्वा परम ईशान, ते1 दृष्ट्वान् परमेशान –d) दे1 2 ते1 मुवें मुए मुव ज्ञानमैश्वरम्, दे. ईश्वरेश्वरा, न1 इदमीश्वरान्, प्र1 ईश्वरेश्वर (→ईश्वरेश्वरम्), प्र2 लब्ध्वा वानीश्वरेश्वर

३९ ते1 ३९–४१ ○, दे1 ३९a–४०b ○ –a) दे4 प्र1 इहाश्रमे, दे5 इहाश्रम, प्र2 शुभाश्रम (→इहाश्रम-), दे8-10 द1 प्र1 2 म1 मुवें मुए मुव पदे (→ वरे) –b) न1 कपर्दिन (→कपर्दिन) –c) दे2 3 6 मुवें मुए मुव प्रविन्दन् (→अविन्दत्), का1 पुत्रान् रुद्रान्, व2 सम्पदा रुद्रात्, दे1 5 6 द1 प्र2 पुत्रकात् रुद्रात्, न1 पुत्र•••, म1 पुत्रकान् पुत्रान् (→पुत्रकान् रुद्रात्) –d) दे8-10 सुरेश, मुवें मुए मुव सुरवो (→सुरभिर्), दे8-10 °संयुतान्, न1 मुवें मुए मुव °सयुता, प्र2 °सयुत (→संयुता)

४० दे1 ○ (द्र ३९ पा टि), दे1 ab ○ –a) का1 व1 द1 प्र1 2 म1 देवता (?) (→देवता), व2 मुव सर्वा, द1 [श्रा]नीत, प्र1 [प्र]नीका, व2 [प्र]धीव, म1 [प्र]तीत (→पूर्वं), दे8-10 इहैव ते महादेवी, मुवें मुए इह देवा महादेवी –b) व1 द1 प्र1 2 म1 कालातीतो (व1 °ता, प्र2 म1 °ता), दे8-10 मुवें मुए भवानीञ्च, मुव कालाद्भीत्या (→कालाद्भीता), दे4 महेश्वर, मुवें मुए महेश्वरीम् (→महेश्वरम्) –c) व2 मुव दृष्टवन्तो, दे1 दृष्टवत, दे8-10 मुवें मुए सस्तुवन्तो, न1 इष्टवन्तो (→दृष्टवन्तो), का1 दे5 हर श्रीमान्, व1 दे4 द1 प्र1 2 म1 हरे श्रीमान्, दे1 3 8-10 न1 मुवें मुए महादेव (→हरं श्रीमन्) –d) दे1 निभय, दे5 भयार्थं, न1 निभया (→निर्भया), व1 3 निर्वृत, दे8 निर्वृति (→निर्वृतिं)

४१ ते1 ○ (द्र ३९ पा टि) –a) दे4 महादेव (→महादेव) –b) व3 दे3 8-10 न1 म1 तपसा (→तपतां) –c) म1 अब्रवीत् (→लब्धवान्), दे1 ज्ञानं (→योगं), प्र2 स लब्धवानीश्वर योग –d) प्र2 ग्रन्थ° (→ग्रन्थ°), दे8 10 °कारित्वम् (→°कारत्वम्), दे4 द1 प्र1 2 म1 एव च (→उत्तमम्)

४२ दे8 10 मुए ४२c–४४d ○, मुवें cd ○ –a) दे3 6 °मासु (→°मास), दे8 10 मुवें मुए सतां (→शुभां) –b) दे3 6 सहिता (दे3 °तान्) (→संहितां), व3 दे1 3 5 6 ते2 द1 प्र1 2 म1 मुव द्विजा, दे8-10 मुवें मुए शुभाम् (→द्विज) –c) दे4 प्र1 2 पौराणिका (→पौराणिकीं), का1 दे3-6 सुपुण्यास्मा, व1 दे1 प्र2 मुव सुपुण्यार्थं, व2 सुपुण्यानां, दे2 सुपुण्यार्थां (→सुपुण्यार्थां), ते1 पौराणीम् पुराव्यास, मुए द्विज पौराणिकी पुण्या –d) का1 दे4 सच्छिष्येषु, व1 सहिष्येषु, दे2 न1 तच्छिष्येषु, दे5 वशिष्ठेषु, ते1 प्र1 2 स शिष्येषु, व1 महिष्यषु, (→सच्छिष्येषु), का1 व1-3 दे3-6 न1 द1 प्र1 म1 मुव

इहैव संहितां बुद्ध्वा कापेयः शांशपायनः ।
महादेवं चकारेमां पौराणीं तन्नियोगतः ।
द्वादशैव सहस्राणि श्लोकानां पुरुषोत्तम ॥४३
इह प्रवर्तिता पुण्या द्व्यष्टसाहस्रिकोत्तरा ।
वायवीयोत्तरं नाम पुराणं वेदसम्मितम् ।
इहैव स्थापितं शिष्यैः शांशपायनभाषितम् ॥४४
याज्ञवल्क्यो महायोगी दृष्ट्वाऽत्र तपसा हरम् ।
चकार तन्नियोगेन योगशास्त्रमनुत्तमम् ॥४५
इहैव भृगुणा पूर्वं तप्त्वा वै परमं तपः ।
शुक्रो महेश्वरात् पुत्रो लब्धो योगविदां वरः ॥४६
तस्मादिहैव देवेशं तपस्तप्त्वा महेश्वरम् ।
द्रष्टुमर्हसि विश्वेशमुग्रं भीमं कपर्दिनम् ॥४७
एवमुक्त्वा ददौ ज्ञानमुपमन्युर्महामुनिः ।
व्रतं पाशुपतं योगं कृष्णायाक्लिष्टकर्मणे ॥४८
स तेन मुनिवर्येण व्याहृतो मधुसूदनः ।
तत्रैव तपसा देवं रुद्रमाराधयत् प्रभुः ॥४९ वें.1.35.46

द्विजोत्तमा, ब2 द्विजोत्तमात् (→द्विजातिषु), मुए प्रसादेन द्विजोत्तमै

४३ दे1 ४३-४४ O, दे8 10 मुए O -a) श1 सहिता, श3 दे3 प्र1 2 संहितान्, दे4 6 मंहिथता (दे1 °ता), म1 सहित (→संहिता), ब2 भृत्वा (→दृष्ट्वा) -b) श1 2 कापेय, दे2 क (क) वय, दे4 कौपेय, दे5 कार्य मत् मुवें कामो य (→कापेय), का1 दे3 8 मासपायन, दे2 शासया पुन, दे5 साक्ष्यतत्पर, म1 शिशपायिन, मुवें शांशिपायिन (→शांशपायन), ते1 कृष्णद्वैपायनो मुनि, द1 प्र1 2 म1 कापे (प्र1 °ये) यस्यशुपायिन -c) दे3 4 द1 श1 म1 मुवें महादेवश, प्र2 महादेवा (→महादेव), द1 प्र1 2 म1 चका (प्र2 °कं) रेका (→चकारेमां) -d) ते1 °नियोजित (→°नियोगत) -e) का1 सहस्राणा (→सहस्राणि) -b) का1 श1.2 दे3 4 6 वें1 नं1 प्र2 पुरुषोत्तम (→पुरुषोत्तम)

४४ दे1 8-10 मुए ad O -a) प1 2 द1 प्र1 प्रवर्तिता (द1 प्र1 °ता) दे2 सकीर्तिता (→प्रवर्तिता), द1 प्र2 पुण्या, प्र1 पुण्यात् (→पुण्या) -b) श1 द1 ष्यष्ट, ब2 3 मुवें मष्ट, दे3 ष्यष्ट, दे4 द्व्याष्ट (→द्व्यष्ट), ब2 3 कोत्तरा दे4 -कान्तर, द1 प्र1 2 -कोत्तरा (→कोत्तरा), दे5 व्यष्ट-साहस्रिकोत्तर (?), म1 द्व्यष्टसाहस्रकोत्तर -c) प्र2 नाम (→नाम) -d) प्र2 देव° (→वेद°), मुवें सम्मतम् (→°सम्मितम्) -c) दे8 9 प्र2 इहैव (→इहैव), श1 स्थापिता, नं1 स्थापित (→स्थापित) -f) का1 दे3 5 सामपायन, वें1 8 10 ते1 वैशम्पायन, दे8 साम्पसपायन-, द1 प्र1 2 म1 शा (प्र2 शां) सपाय च (→शांशपायन-)

४४ श्लोकस्य d चरणानन्तर दे8 10 मुवें पुस्तके अधिकम्-
* द्विज पौराणिकी पुण्या प्रभावेन द्विजोत्तमै
(= ८२ cd)

४५ -a) दे3 याज्ञवल्क्यो, दे5 याज्ञवल्क्या, प्र2 याज्ञवल्क्यो (→याज्ञवल्क्यो), -b) दे2 4 दृष्ट्वा च, दे3 6 तप्त्वा त (→तप्त्वात्), दे3 तपसा, द1 तपसो (→तपसा), दे5 हर (→हर), ते1 हष्टवानथ भास्करम् -c) द1 स (→तत)

४६ दे8 9 ४५c-४६b O (द म) -a) द1 प्र1 2 म1 भो (प्र1 भो) भृगु (→भृगुणा) -b) दे1 मुवें मुए मुव तप्त्वा पूर्वं महातप, दे2 तप्त्वा चैव महत्तप, दे8-10 तपस्तप्त्वा सुदुश्च (दे10 °श्च) र, म1 तप्त्वावीवमहत्तप, ते1 तपस्तप्त्वा महातप -c) का1 दे4 5 द1 प्र1 म1 शुक्र (दे5 °क) दे8 सुक्रो(?) प्र2 सुक्रम् (→शुक्रो), का1 पूर्वं, दे5 द1 प्र1 2 म1 पुत्र (→पुत्रो) -d) का1 दे4 5 द1 प्र1 2 म1 लब्धवा (दे5 °ब्ध ?) (→लब्धो) का1 दे4 5 प1 वर (→वरः)

४७ दे8 9 ab O -a) दे1 6 मुवें मुए मुव देवेश (→देवेश) -b) दे5 तप्त्वो, दे10 तप्ता (→तप्त्वा) का1 ब1 3 दे3 6 द1 प्र1 2 म1 कपर्दिन मुवें मुए मुव सुदुश्चरम् (→महेश्वरम्) -c) प्र2 द्रष्टुमाम् (→द्रष्टुम्), ते1 अर्हति (→महसि) ब2 विश्वात्मा, दे2 लोकेश (→विश्वेशम्) -d) का1 ब2 दे2 रुद्र (→उग्र) का1 दे4 5 द1 प्र1 2 म1 महेश्वर, ते1 त्र्यम्बकम् (→कपर्दिनम्)

४८ -a) दे3 उक्ता (→उक्त्वा) का1 ययौ, दे10 तु तौ (→ददौ) का1 शीघ्र (→ज्ञान) नं1 उपमन्यु (→उपमन्युर), श3 °मति (→°मुनि) -c) दे4 5 पाशुपति (दे5 °ता) (→पाशुपत), दे2 धीर, दे4 योगी (→योग) -d) का1 कृष्णाय, दे4 कृष्णायां (→कृष्णाया), वे1 कृष्टकर्मणे, दे4 °क्लिष्टकर्मणा (→°क्लिष्टकर्मणे)

४९ -a) प्र2 तत्तेन (→स तेन), ब2 3 °वाक्येन, द1 °वीर्येण (→°वर्येण) -b) दे8 ते1 मुवें व्याहृतो (?) (→व्याहृतो) -c) श1 2 म1 तथैव (→तत्रैव), दे10 द1 तपसो (→तपसा) प्र1 2 द1 देवो (→देव) -d) दे8 10 माराधयन् (→माराधयत्), का1 ब1 2 दे2 3 5-6 8-10 प्रभु (→प्रभुः)

क. १ २५ ३६ ध्यायन्तोऽत्रासते देवं जापिनस्तापसाश्च ये ॥३५
इह देवः सपत्नीको भगवान् वृषभध्वजः ।
क्रीडते विविधैर्भूतैर्योगिभिः परिवारितः ॥३६
इहाश्रमे पुरा रुद्रात् तपस्तप्त्वा सुदारुणम् ।
लेभे महेश्वराद् योगं वसिष्ठो भगवानृषिः ॥३७
इहैव भगवान् व्यासः कृष्णद्वैपायनः प्रभुः ।
दृष्ट्वा तं परमं ज्ञानं लब्धवानीश्वरेश्वरम् ॥३८
इहाश्रमवरे रम्ये तपस्तप्त्वा कपर्दिनः ।
अविन्दत् पुत्रकान् रुद्रात् सुरभिर्भक्तिसंयुता ॥३९
इहैव देवताः पूर्वं कालाद् भीता महेश्वरम् ।
दृष्टवन्तो हरं श्रीमन्निर्भया निर्वृतिं ययुः ॥४०
इहाराध्य महादेवं सावर्णिस्तपतां वरः ।
लब्धवान् परमं योगं ग्रन्थकारत्वमुत्तमम् ॥४१
प्रवर्तयामास शुभा कृत्वा वै संहिता द्विजः ।
पौराणिकीं सुपुण्यार्थां सच्छिष्येषु द्विजातिषु ॥४२

तपसा देवो, दे2 ते1 ध्यायन्ति सान्तो देव, दे4 ध्यायन्त्युपासते देव, दे5 ध्यायन्तो ध्यासते देव, दे8 10 न1 मुवे मुए मुब ध्यायन्त्याराधयन्त्येन, द1 प्र1 2 म1 ध्यायन्त्युपासते देव –d) दे1 3 8 10 न1 ते1 मुवे मुए मुब योगिनस् दे4 जापितस् (→जापिनस्), दे2 ते1 द1 प्र1 2 म1 तपसा स्व(ते1 स्व)यम् (→तापसाश्च ये)

३६ –a) प्र3 देव (→देव), प्र2 सपत्नीक (→सपत्नीको) –b) दे3 6 गोवृषध्वज (→वृषभध्वज) –c) द1 क्रीडन्ते (→क्रीडते) –d) दे6 पारिवारितै, प्र2 परमाद्रित (→परिवारित)

३७ –a) ब3 रुद्रास्, दे1 रुद्रो, दे4 5 न1 द1 रुद्रा(?), दे8-10 मुवे मुए मुब रुद्र, ते1 रौद्र, प्र2 म1 रौद्रे (→रुद्रात्) –c) ब1 महेश्वरो, दे4 प्र1 2 महेश्वर, द1 म1 माहेश्वर (→महेश्वराद्), न1 लेभिरे चेश्वरायोग

३८ –a) प्र2 इहैव (→इहैव)· –b) दे8 10 मुवे मुए स्वयम् (→प्रभु) –c) दे8-10 तत् (→तं), ते1 मुवे मुए मुब दृष्ट्वा स परमेशान, दे2 दृष्ट्वा परम ईशान, ते1 दृष्टवान् परमेशान –d) दे1 2 ते1 मुवे मुए मुब ज्ञानमैश्वरम्, दे5 ईश्वरेश्वरा, न1 इदमीश्वरान्, प्र1 ईश्वरेशर (→ईश्वरेश्वरम्) प्र2 लब्ध्वा वागीश्वरेश्वर

३९ ते1 ३९–४१ ○, दे1 ३९a–४०b ○ –a) दे4 प्र1 इहाश्रमे, दे5 इहाश्रम, प्र2 शुभाश्रम- (→इहाश्रम-), दे8-10 द1 प्र1 2 म1 मुवे मुए मुब पदे (→वरे) –b) न1 कपर्दिन (→कपर्दिन) –c) दे2 3 6 मुवे मुए मुब अविन्दन् (→अविन्दत्), का1 पुत्रान् रुद्रान्, ब2 तन्मया रुद्रात्, दे2 5 6 ब1 प्र2 पुत्रकान् रुद्रान्, न1 पुत्र***, म1 पुत्रकान् पुत्रान् (→पुत्रकान् रुद्रात्) –d) दे8-10 सुरेश, मुवे मुए मुब सुरभो (→सुरभिर्), दे8-10 °संयुतान्, न1 मुवे मुए मुब °संयुता, प्र2 °भयुत (→भद्रता)

४० ते1 ○ (द्र ३९ पा टि), द1 ab ○ –a) का1 ये1 द1 प्र1 2 म1 देवता (?) (→देवता), ब2 मुब सर्वा, द1 [प्रा]नीत, प्र1 [प्र]नीका, प्र2 [प्र]धीत, म1 [प्र]नीत (→पूर्वं), दे8-10 इहैव वे महादेवी, मुवे मुए इह देवा महादेवी –b) ब1 द1 प्र1 2 म1 कालातीतो (ब1 °ता, प्र2 म1 °त), दे8-10 मुवे मुए भवानीञ्च, मुब कालाद्भीत्या (→कालाद्भीता), दे4 महेश्वर, मुवे मुए महेश्वरीम् (→महेश्वरम्) –c) ब2 मुब दृष्टवन्तो, दे1 दृष्टवत, दे8-10 मुवे मुए सस्तुतवन्तो, न1 इष्टवन्तो (→दृष्टवन्तो), का1 दे5 हर श्रीमान्, ब1 दे4 द1 प्र1 2 म1 हरे श्रीमान्, दे1 2 8-10 न1 मुवे मुए महादेव (→हर श्रीमन्) –d) दे1 निर्भय, दे5 मयार्थं, म1 निभया (→निर्भया), ब1 3 निर्वृत, दे8 निवृति (→निर्वृतिं)

४१ ते1 ⊙ (द्र ३९ पा टि) –a) दे4 महादेव (→महादेव) –b) ब3 दे3 8-10 न1 म1 तपसा (→तपता) –c) म1 समधीत (→लब्धवान्), दे1 ज्ञान (→योग), प्र2 स लब्धवानीश्वर योग. –d) प्र2 ग्रन्थ° (→ग्रन्थ°), दे8-10 °कारित्वम् (→°कारत्वम्), दे4 द1 प्र1 2 म1 एव च (→उत्तमम्)

४२ दे8-10 मुए ४२c–४५d ○, मुवे cd ○ –a) दे3 6 °मासु (→°मास), दे8 10 मुवे मुए शुभा (→शुभा) –b) दे3 6 संहिता (दे3 °तान्) (→संहिता), ब3 दे1 3 5 6 ते1 द1 प्र1 2 म1 मुब द्विजा, दे8 10 मुवे मुए शुभाम् (→द्विज) –c) दे4 प्र1 2 पौराणिका (→पौराणिकीं), का1 दे3-6 सुपुण्यात्मा, ब1 दे1 प्र2 मुब सुपुण्यार्थं, ब3 सुपुण्यानां, दे2 सुपुण्यार्थी (→सुपुण्यार्थां), ते1 पौराणीस्म पुराण्यास, मुए द्विज पौराणिकी पुण्यां –d) का1 दे4 सच्छिष्येषु, ब1 महिष्येषु, दे2 न1 तच्छिष्येषु, दे5 शशिष्येषु, ते1 प्र1 2 स शिष्येषु, म1 महिष्येषु (→सच्छिष्येषु), का1 ब1-3 दे3-6 न1 दे1 प्र1 म1 मुब

इहैव संहितां दृष्ट्वा कापेयः शांशपायनः ।
महादेवं चकारेमां पौराणीं तन्नियोगतः ।
द्वादशैव सहस्राणि श्लोकानां पुरुषोत्तम ॥४३

इह प्रवर्तिता पुण्या द्व्यष्टसाहस्रिकोत्तरा ।
वायवीयोत्तरं नाम पुराणं वेदसंमितम् ।
इहैव ख्यापितं शिष्यैः शांशपायनभाषितम् ॥४४

याज्ञवल्क्यो महायोगी दृष्ट्वाऽत्र तपसा हरम् ।
चकार तन्नियोगेन योगशास्त्रमनुत्तमम् ॥४५

इहैव भृगुणा पूर्वं तप्त्वा वै परमं तपः ।
शुक्रो महेश्वरात् पुत्रो लब्धो योगविदां वरः ॥४६

तस्मादिहैव देवेशं तपस्तप्त्वा महेश्वरम् ।
द्रष्टुमर्हसि विश्वेशमुग्रं भीमं कपर्दिनम् ॥४७

एवमुक्त्वा ददौ ज्ञानमुपमन्युर्महामुनिः ।
व्रतं पाशुपतं योगं कृष्णायाक्लिष्टकर्मणे ॥४८

स तेन मुनिवर्येण व्याहृतो मधुसूदनः ।
तत्रैव तपसा देवं रुद्रमाराधयत् प्रभुः ॥४९ कू.१.२५.४८

द्विजोत्तमा , प्र2 द्विजोत्तमात् (→द्विजातिषु), मुए प्रसादेन द्विजोत्तमे

४३ दे1 ४३–४४ ⊙, दे8-10 मुए ⊙ –a) व1 संहिता, व3 दे3 प्र1.2 संहितान्, दे4.8 संस्थिता (दे1 °ता), म1 संहित (→संहितां), व2 कृत्वा (→दृष्ट्वा) –b) व1.3 कापेय , दे2 क (क) वश , दे4 कोपेय, दे5 कार्यं वर, मुवें कामो य (→कापेय), का1 दे3.8 सासपायन , दे2 शासिया पुन , दे5 सास्यवरपर , न1 शिशपायिन , मुवें शशिपायिन (→शांशपायन), दे1 कृष्णद्वैपायनो मुनि , द1 प्र1.2 म1 कापे (प्र1 °ब्ये)यस्याशुपायिन –c) दे3.4 द1 प्र1 म1 मुवें महादेवश्, प्र2 महादेवा (→महादेव), द1 प्र1.2 म1 चका (म2 °कें) रेका (→चकारेमां) –d) ते1 °नियोजित (→°नियोगतः) –e) का1 सहस्राख्य (→सहस्राणि) –b) का1 व1.2 दे3.4.6 ते1 न1 प्र2 पुरुषोत्तम (→पुरुषोत्तम)

४४ दे1.8-10 मुए ad ◯ –a) व1.2 द1 प्र1 प्रवर्तिता (द1 प्र1 °ता), दे2 यकोनिता (→प्रवर्तिता), द1 प्र2 पुण्या, प1 पुण्यान् (→पुण्या) –b) व1 द1 व्यष्ट , व2.3 मुव ष्टष्ट॰, दे3 ष्यष्ट , दे4 द्व्यष्ट- (→द्व्यष्ट-), व2.3 कोत्तरा दे4 -कान्तर, द1 प्र1.2 -कोत्तरा (→कोत्तरा), दे5 व्यष्य-साहीसकोदर (?), ग1 द्व्यष्टसाहस्रकोत्तर –c) प्र3 माम (→नाम) –d) प्र2 देव° (→वेद°), मुवें सम्मतम् (→°संमितम्) –e) दे6.9 प्र2 इहैव (→इहैव), व1 स्थापिता, न1 ख्यानित (→ख्यापित) –f) का1 दे3.5 सासपायन-, दे1.8-10 दे1 वैशम्पायन , दे8 वाप्तपायन-, द1 प्र1.2 म1 शा (प्र2 हा) तपाय च (→शांशपायन-)

४४ श्लोकस्य d चरणानन्तरं दे8.10 मुवें. पुस्तके अधिकम्–
• द्विज पौराणिकी पुण्या प्रसादेन द्विजोत्तमे
(= ४२ cd)

४५ –a) वे3 याज्ञवल्क्यो, दे5 याज्ञवल्क्यो, प्र2 याज्ञवल्को (→याज्ञवल्क्यो). –b) दे1.4 दृष्ट्वा च, वे3.6 दृष्ट्वा त (→दृष्ट्वात्र), दे8 तपसा, द1 तपसो (→तपसा), दे5 हर (→हरम्), ते1 दृष्टवानत्र भास्करम् –c) द1 स (→तत्)

४६ दे8.9 ४५c–४६b ⊙ (ह ग) –a) द1 प्र1.2 म1 भो (प्र1 भो) भृगु (→भृगुणा) –b) दे1 मुवें मुए मुव तप्त्वा पूर्वं महातप , दे2 तप्त्वा चैव महत्तप , दे8-10 तपस्तप्त्वा सुदुष्क (दे10 °ष्क) र, न1 तप्त्वातीवमहत्तप , ते1 तपस्तप्त्वा महातर –c) का1 दे4.5 द1 प्र1 म1 शुक्र (दे5 °क), दे6 सुक्रो(?) प्र2 सुतस्य (→शुक्रो), का1 पूर्वं, दे5 द1 प्र1.2 म1 पुत्र (→पुत्रो) –d) का1 दे4.5 द1 प्र1.2 म1 लब्ध्वा (दे5 °ब्ध ?) (→लब्धो), का1 दे4.5 प्र1 वर (→वर)

४७ दे8.9 ab ⊙ –a) दे1.6 मुवें मुए मुव. देवेश (→देवेशं) –b) दे5 तप्त्वो, दे10 तप्त्वा (→तप्त्वा), का1 प्र1-3 दे3.8 द2 प्र1.2 म1 कपर्दिन मुवें मुए मुव सुदुश्चरम् (→महेश्वरम्) –c) प्र2 दृष्टवान् (→द्रष्टुम्), ते1 अर्हति (→अर्हसि), व2 विश्वात्मा, दे3 लोकेश (→विश्वेशम्) –d) का1 व2 दे1 रुद्र (→उग्रं), का1 दे4.5 द1 प्र1.2 म1 महेश्वर, ते1 भयङ्करम् (→कपर्दिनम्)

४८ –a) दे3 उक्ता (→उक्त्वा), का1 ययौ, दे10 तु तौ (→ददौ) का1 शीघ्र (→ज्ञान) न1 उपमन्यु (→उपमन्युर्), व2 °मति (→°मुनि) –c) दे4.5 पाशुपति (दे5 °ता) (→पाशुपत), दे2 घोर, दे4 योगी (→योग) –d) का1 कृष्णाय, दे4 कृष्णाय (→कृष्णाया-), दे2 -कृष्टकर्मणे, दे4 °क्लिष्टकर्मणा (→°क्लिष्टकर्मणे)

४९ –a) प्र3 [illegible] (→स तेन), व2.3 °वाक्येन, द1 °वीर्येण (→°वर्येण) –b) दे8 ते1 मुवें व्याहृतो (?) (→व्याहृतो) –c) प्र1.2 म1 तत्रैव (→तत्रैव), दे10 द1 तपसो (→तपसा), प्र1.2 द1 देवो (→देव) –d) दे8-10 माराधयन् (→माराधयत्), का1 व1.2 दे3.5.6 8-10 प्रभु (→प्रभु)

वें १.२५.४६ भस्मोद्धूलितसर्वाङ्गो मुण्डो वल्कलसंयुतः ।
जजाप रुद्रमनिशं शिवैकाहितमानसः ॥५०
ततो बहुतिथे काले सोमः सोमार्धभूषणः ।
अदृश्यत महादेवो व्योम्नि देव्या महेश्वरः ॥५१

किरीटिनं गदिनं चित्रमाल
पिनाकिनं शूलिनं देवदेवम् ।
शार्दूलचर्माम्बरसंवृताङ्गं
देव्या महादेवमसौ ददर्श ॥५२
परश्वधासक्तकरं त्रिनेत्रं
नृसिंहचर्मावृतसर्वगात्रम् ।
समुद्गिरन्तं प्रणवं बृहन्तं
सहस्रसूर्यप्रतिमं ददर्श ॥५३
प्रभुं पुराणं पुरुषं पुरस्तात्
सनातनं योगिनमीशितारम् ।
अणोरणीयासमनन्तशक्तिं
प्राणेश्वरं शंभुमसौ ददर्श ॥५४
न यस्य देवा न पितामहोऽपि
नेन्द्रो न चाग्निर्वरुणो न मृत्युः ।
प्रभावमद्यापि वदन्ति रुद्रं
तमादिदेवं पुरतो ददर्श ॥५५
तदान्वपश्यद् गिरिशस्य वामे
स्वात्मानमव्यक्तमनन्तरूपम् ।
स्तुवन्तमीशं बहुभिर्वचोभिः
शङ्खासिचक्रार्पितहस्तमाद्यम् ॥५६

---

५० –a) द1 भस्माद्धूलित° (→भस्मोद्धूलित°) –b) दे4 द1 प्र1 2 म1 जटी, तै1 कृष्णो (→मुण्डो), का1 ब1-3 दे2-6 न1 तै1 द1 प्र1 2 म1 °संयुत (→°संयुतः) –c) का1 तताप (→जजाप), दे1 तै1 मनसा, द1 प्र1 2 म1 ईशान (→मनिशं) –d) वे8 शिवोरहित°, प्र1 शिवैकाहित°, प्र2 शैविकाहित° (→शिवैकाहित°)

५१ –a) दे2 तथा, प्र2 गते (→ततो) –b) दे10 सौम्य, द1 सा म, मुब सोम (→सोमः) –c) ब3 मदश्यते (→अदृश्यत) –d) दे2 8 देव्यो, दे5 सोम्नि (→व्योम्नि), ब2 प्र1 देव (→देव्या), द1 प्र1 समन्वित, प्र2 समाहित, म1 सहायात (→महेश्वर)

५२ –a) तै2 त्रिशूलिन (→किरीटिन), दे10 (च) गदिन, प्र1 म1 जटिनं (→गदिनं), का1 शोभमान, ब2 3 चित्रमाल्य, दे4 द1 प्र1 2 म1 सा (दे4 शा) श्रमाल, दे5 विश्वमाल (→चित्रमाल) –b) दे10 देवदेवेश (→देवदेवम्) –c) तै1 रुद्राक्ष° (→शार्दूल°), का1 द1 प्र1 2 म1 °चर्मावृतसर्वगात्र, दे5 °चर्माम्बरसवृताङ्ग (→°चर्माम्बरसंवृताङ्गम्)

५३ दे8-10 प्र1 2 म1 मुबें मुए मुब पुस्तकेषु अयं श्लोकः ५४ श्लोकानन्तरं वर्तते –a) ब1 दे1 2 4 6 परश्वधा (→परश्वधा-), का1 दे4 -शक्तकर (→सक्तकरं), दे1 परश्वध खिलशकर त्रिणेत्र –b) दे1 °भस्मगात्र (→°सर्वगात्रं), तै1 नृसिंहचर्मान्वितसर्वगात्रम् –c) तै1 समुद्गिरन्तं प्रणवं च हृद्गतम् –d) तै1 °प्रति सदर्श (→°प्रतिमं ददर्श)

मत पर दे8 पुस्तके अधिकम्—
न यस्य देवा न पितामहोऽपि नेन्द्रो न चाग्निर्वरुणो न मृत्यु ।
प्रभावमद्यापि विदन्ति रुद्र तमादिदेव पुरतो ददर्श ॥
(=५५)

५४ दे3 प्र1 2 म1 ○ –a) ब3 पुरुष (→पुरुषं) –c) द1 °भूति (→°शक्ति) –d) दे4 °मसो (→°मसौ)
दे8-10 मुबें मुए मुब. ग्रन्थेषु अधिकम्—
परश्वधासक्तकर त्रिनेत्र नृसिंहचर्मावृतसर्वगात्रम् ।
समुद्गिरन्त प्रणव बृहन्त सहस्रसूर्यप्रतिम ददर्श ॥
(=५३)

५५ दे8 ○ पूर्वमागतम् –a) प्र2 म1 तस्य (→यस्य), दे10 देवो (→देवा), दे4 पितामहोऽपि, द1 पितासिनरुच, प्र1 2 म1 पितामहश्च (→पितामहोऽपि) –b) तै1 न चा (→न चा-) –c) ब1-3 दे3 न1 तै1 द1 प्र1 म1 विदन्ति (→वदन्ति), न1 रुद्रात् (→रुद्रं), का1 प्रभावमाद्या न विदन्ति रुद्र, ब3 प्रभावमस्यापि विदन्ति रुद्र –d) का1 नमामि (→तमादि-), का1 परतो, दे1 4 द1 प्र1 2 म1 पुरुषो (दे4 °प) (→पुरतो)
मत पर दे3 पुस्तके अधिकम्—
प्रभु पुराण पुरुष पुरस्तात् सनातन योगिनमीशितारम् ।
अणोरणीयां समनन्त शक्ति प्राणेश्वर शम्भुमसौ ददर्श ॥
(=५४)

५६ द1 cd ○ –a) का1 ब3 दे2 3 6 तदानु (का1 °न) पश्यद्, दे4 द1 प्र1 2 म1 ततोऽन्वपश्यद्, तै1 तदा ह्यपश्यद् (→तदान्वपश्यद्) ; दे8 वामा, दे10 वासे (→वामे), दे5

कृताञ्जलिं दक्षिणतः सुरेशं
हंसाधिरूढं पुरुषं ददर्श ।
स्तुवानमीशस्य परं प्रभावं
पितामहं लोकगुरुं दिविस्थम् ॥५७

गणेश्वरानर्कसहस्रकल्पान्
नन्दीश्वरादीनमितप्रभावान् ।
त्रिलोकभर्तुः पुरतोऽन्वपश्यत्
कुमारमग्निप्रतिमं सशाखम् ॥५८

मरीचिमत्रिं पुलहं पुलस्त्यं
प्रचेतसं दक्षमथापि कण्वम् ।
पराशरं तत्परतो वसिष्ठं
स्वायम्भुवं चापि मनुं ददर्श ॥५९

तुष्टाव मन्त्रैरमरप्रधानं
बद्धाञ्जलिर्विष्णुरुदारबुद्धिः ।
प्रणम्य देव्या गिरिशं सभक्त्या
स्वात्मन्यथात्मानमसौ विचिन्त्य ॥६०

श्रीकृष्ण उवाच ॥*

नमोऽस्तु ते शाश्वत सर्वयोने
ब्रह्माधिपं त्वामृषयो वदन्ति ।
तपश्च सत्त्वं च रजस्तमश्च
त्वामेव सर्वं प्रवदन्ति सन्तः ॥६१

त्वं ब्रह्मा हरिरथ विश्वयोनिरग्निः
संहर्ता दिनकरमण्डलाधिवासः ।
प्राणस्त्वं हुतवहवासवादिभेद-
स्त्वामेकं शरणमुपैमि देवमीशम् ॥६२ वं १ २२.६१

स्तुवानमीशस्य तदानुपश्यद् –b) दे5 गिरीश (→स्वात्मानम्), दे5 °रूपा (→°रूप) –c) म1 बहुशो (→बहुभिर्), दे10 विचार्यिण (→यतोभि) –d) तै1 सहूगासि° (→शाङ्गासि°), दे1 तै1 मुवँ मुए मुब °चक्राङ्कित°, प्र1 2 म1 °चक्राकित° (→°चक्रायिध°)

५७ द1 ab ○ –a) ब3 दे1 कृताञ्जलि, दे10 कृताञ्जली (→कृताञ्जलि), का1 दे3 5 सुवेश (→सुरेश) –b) प्र2 सन्द साधि° (→हंसाधि°) –c) का1 गुणाश(?), ब2 सर्वायेम्, दे1 द1 म1 स्तुवन्त दे5 स्तवाश, प्र2 पुरन्त (→स्तुवानम्), तै1 [प्र]श्यस्य, द1 ईशान- (→ईशस्य), ब1 प्रधान, + प्रभाव, दे5 प्रभाया (→प्रभाव) –d) का1 दे3 दिगीश, ब1 3 दे3 दिविष्ठम्, दे2 दिवास्थ, दे6 निविष्ट, तै1 विविक्ते (→दिविस्थम्)

५८ –a) ब2 दे9 10 गणेश्वरा(दे10 °रो)नेक° (→गणेश्वरानर्क°), तै1 °कान्तीन् (→°कल्पान्) –b) दे6 नदीश्वरा° (→नन्दीश्वरा°) –c) न1 °भर्तु (→°भर्तुः), का1 का2 3 दे2 3 5 8 तै1 प्र1 2 म1 पुरस्सपद् (दे3 8 °पान्) (→[पु]रतोऽन्वपश्यत्) –d) दे10 प्र2 चाग्नि (→मग्नि-), ब1 • मार्स, ब2 3 दे2.8 द1 प्र1 2 म1 मुब विशाख, दे1.2 तै1 मुवँ मुए गणेशम, दे8-10 शशाके, म1 शिशिरस्य (→सशाखम्)

५९ –b) का1 दे2 4 तै1 द1 प1 प्रचेतस (→प्रचेतसं), दे1 प्रथादि (→प्रथापि) –c) दे8 पराशरं (→पराशरं), दे4 द1 प1 2 म1 स्वायम्भयो (ब2 °सम) (→तत्परतो) –d) ब1 स्वायंभूवम् (→स्वायम्भुवं), ब1 मुनिद् (→मनुं).

६० –a) दे8-10 °प्रधाने (दे10 °नं), म1 °प्रभाव (→°प्रधान) –b) ब1 बद्धाञ्जलि (→बद्धाञ्जलिर्), का1 दे8 10 विष्णुश्च (→विष्णुर्), दे10 °बुद्धि (→°बुद्धिः) –c) का1 प्रणनाम (→प्रणम्य), ब1 देव्यां, ब2.3 देवो (→देव्या), दे8 10 मुवँ मुए मुब स्वभक्त्या, तै1 च तस्मिन् (→सभक्त्या) –d) दे8 स्वात्मान्यथा°, प्र2 स्वात्मानमा° (→स्वात्मन्यथा°), प्र3 म1 मयो (→मसौ), दे5 न1 तै1 विचिन्त्य (दे5 °न्त्या) (→विचिन्त्य)

* ब1 2 दे1 मुवँ मुए कृष्ण उवाच, दे8 10 कृष्ण उ., म1 कृष्ण, तै1 प्र1 2 म1 श्रीकृष्ण, द1 श्रीविष्णु

६१ –a) दे8-10 द1 मुवे मुए सर्वयाग, तै1 सर्वमूर्ते (→सर्वयोने) –b) दे8-10 ब्रह्मादयो ये, प्र2 म1 ब्रह्मा गिर (म1 °र) स्तव, मुवँ मुए ब्रह्मादयस्त्वां (→ब्रह्माधिपं त्वाम्), द1 प1 2 म1 मुनयो (→ऋषयो) –c) दे1 2 3-10 तै1 मुवँ मुए तमश्च दे3 तप च, द1 प्र1 2 म1 स्वमेव (→तपश्च), दे8 10 रजश्च सत्त्वं, मुवँ मुए रजस्तमश्च (→रजस्तमश्च), दे1 तमश्च सत्त्व रजस्तथैव, दे1 तै1 तप(तै1 °म)श्च सत्त्व रजस्तमश्च

६२ –a) दे3 हरिरथ, दे4 हरि(हे)थ, दे5 हरिरथ-, दे8 9 हरिरथ, दे10 हरिरथ-, द1 प्र1 2 हरिश्च (→हरिरथ), दे1 विश्वयोनि ब्रह्मा, दे4 विश्वयोनिरथ, दे3 विश्वकर्ता गहर्ता(?), दे8 विश्व •• कर्मा, दे10 मुए •• विश्वकर्मा, म1 विश्वयोनि ••, मुवँ ए विश्वकर्ता (→विश्वयोनिरग्निः) –b) दे1 दि• दिन(क)र°, दे3 दिनदिनकर° (→संहर्ता

[225]

29

म १ १५ ६२ सांख्यास्त्वां त्रिगुणमथाहुरेकरूपं
योगास्त्वां सततमुपासते हृदिस्थम् ।
वेदास्त्वामभिदधतीह रुद्रमग्निं
त्वामेकं शरणमुपैमि देवमीशम् ।।६३

त्वत्पादे कुसुममथापि पत्रमेकं
दत्त्वासौ भवति विमुक्तविश्वबन्धः ।
सर्वाघं प्रणुदति सिद्धयोगिजुष्टं
स्मृत्वा ते पदयुगलं भवत्प्रसादात् ।।६४

यस्याशेषविभागहीनममलं हृद्यन्तरावस्थितं
तत्त्वं ज्योतिरनन्तमेकमचलं सत्यं परं सर्वगम् ।
स्थानं प्राहुरनादिमध्यनिधनं यस्मादिदं जायते
नित्यं त्वामहमुपैमि सत्यविभवं विश्वेश्वरं तं शिवम् ।।६५

ॐ नमो नीलकण्ठाय त्रिनेत्राय च रंहसे ।
महादेवाय ते नित्यमीशानाय नमो नमः ।।६६

नमः पिनाकिने तुभ्यं नमो मुण्डाय दण्डिने ।
नमस्ते वज्रहस्ताय दिग्वस्त्राय कपर्दिने ।।६७

नमो भैरवनादाय कालरूपाय दंष्ट्रिणे ।
नागयज्ञोपवीताय नमस्ते वह्निरेतसे ।।६८

दिनकर°) –c) म3 प्राणस्त्वा (→प्राणस्त्व), म3 न1 °भेदं (→°भेद) –d) दे2 त्वामीश (→त्वामेक), दे1 4 न1 उपैमि, द1 उपैहि (→उपैमि), ब2 रुद्र **, दे3 रुद्रमीशम्, दे4 ** मीशम् (→देवमीशम्)

६३ दे3 6 ○, प्र2 ६३d-६४b ⊙ –a) प्र1 2 म1 ख्यातस्त्वाम् (→याङ्ख्यास्त्वा), ब1 -द्विगुणम्, ब2 3 दे1 2 न1 मुब त्रिगुणम्, दे4 8-10 द1 प्र1 2 स1 मुबें मुए अगुणम् (→त्रिगुणम्), दे1 2 °योनि (→°रूप) –b) का1 दे1 द1 योगस्त्वा, दे2 8-10 ते1 मुबें मुए योगस्थ (ते1 °स्था), दे4 योगात्मा, म1 योगिनस्ता (→योगास्त्वा), दे5 उपासतेन्द्रा देस्था (→उपासते हृदिस्थ) –c) दे2 5 द1 प्र1 3 देवास्त्वाम् (→वेदास्त्वाम्), ते1 °वदतीह (→°दधतीह), दे1 रुद्ररूप, दे8 10 मुदें मुए मुब रुद्रमीड्य, म1 रूपनेत्रि (→रुद्रमग्नि) –d) ब1 दे10 त्वामेक, द1 त्वामेव, प्र1 शम्भोस्त्वा (→त्वामेक), दे4 उपैनि (→उपैमि), द1 प्र1 म1 रुद्रमीश (→देवमीश), म1 रुद्रयोनि त्वामेक शरणमुपैमि देवमीश

६४ प्र2 a ○ –a) ब3 पाद (→पादे) –b) दे1 विमुक्तसर्वबन्ध, न1 विश्वविमुक्तबन्ध, द1 विमुक्तिविश्वबन्ध –c) का1 सर्वाघ (?), ब1 दे3 9 10 सर्वा(दे9 10 °र्वो)घ, ब2 3 दे1 5 8 मुबें मुए सर्वाघ, दे4 सर्वार्थं न1 सर्वारिं, ब1 प्र2 म1 सर्वायत्, प्र1 सर्वांघद (→सर्वाघं), का1 प्र1 प्रण (?) दति, दे5 प्रणुहति दे8-10 प्रणमति (→प्रणुदति), का1 सिद्धयोगिविष्ट, ब1 दे8 10 न1 सिद्धयोगिजुष्टे, दे1 ** योगजुष्ट, दे2 विश्वयोनिर्युष्ट, दे4 द1 प्र1 3 म1 सिद्धयोगजुष्टे, ते1 सिद्धयोगिजुष्ट (→सिद्धयोगिजुष्ट) –d) ब3 दे3 6 वै (→ते), ब1 दे1 8 9 न1 द1 प्र1 2 म1 °युगले, दे10 मुबें °युगल (?) (→°युगल), दे8-10 °प्रमाथिमाने (→°प्रसादात्), दे3 6 स्मृत्वा वै तव भगवत प्रसादात्

६५ –a) म1 तस्या° (→यस्या°), का1 दे5 6 °हीन-, न1 °हीने, ते1 °हीनम् (→°हीनम्), का1 दे5 -विमल, ते1 अपर (→अमल), ब1 दे3 6 हृदयन्तरा°, दे1 हृद्यन्तरा° (→हृद्यन्तरा°) –b) का1 सत्त्व, ब1 तत्त्व, ब2 त्वं हि दे5 तत्त्वा, दे8 मुबें मुए ते त्वा, दे9 त त्वा, दे10 प्र2 * त्वा (प्र2 °त्व) (→तत्त्व), दे8 10 योनिम्, न1 ज्योतिम् (→ज्योतिर्), दे1 तत्त्वद्योत, दे4 तत्त्व द्य (?)तिर् (→तत्त्व ज्योतिर्), दे5 एकमचल, न1 द1 प्र1 म1 एकममल, ते1 अन्तररहित (→एकमचल), ते1 सत्त्व (→सत्य) –c) ते1 स्य च (→स्थान), दे8 10 प्रागमानादि (→प्राहुरनादि), ब1 °निधन, दे3 °निधने (→°निधन) –d) का1 नित्य त्वा समुपैति सत्य-विभव, ब1 दे1 2 5 प्र1 मुए मुब नित्य त्वाहमुपैमि (दे5 °ति) स(दे5 मि)त्यविभव, ब3 नित्य त्वमुपैमि सत्यविभव, दे8 द1 नित्य (दे8 °त्यां) चाहमुपैमि सत्यविभव, दे9 10 नित्य हि त्वमुपैमि सत्यविभव, ते1 नित्य त्वाहमुपैमि सत्यनिलय, प्र2 नित्यस्त्वा मुनयामि सिद्धविभव, म1 नित्य त्वामुपयामि सत्यविभव (→नित्यंत्वामहमुपैमि सत्यविभव)

६६ –a) दे2 * नमो (→ॐ नमो), दे4 नीलकण्ठायै (→नीलकण्ठाय) –b) दे1 सर्वेशाय (→त्रिनेत्राय), दे2 वरायैव, दे6 न देहसे, ते1 च शम्भवे (?) (→च रंहसे) –d) दे8 ईश्वराय (→ईशानाय)

६७ का1 ab ○ –a) दे3 पिनाकिन (→पिनाकिने), द1 प्र1 2 म1 नित्य (→तुभ्य) –b) ब2 प्र2 दण्डाय, दे1 तुण्डाय (→मुण्डाय), ब3 दे2,3 9 प्र2 मुण्डिने (→दण्डिने) –c) का1 ब1-3 दे3 5 बहुहस्ताय, दे1 चतुर्हस्ताय, दे6 बहुदंष्ट्राय, ते1 भिन्नहस्ताय (→वज्रहस्ताय) –d) ते1 दिगासाय, प्र2 दिवस्त्राय (→दिग्वस्त्राय)

६८ –a) दे4 द1 प्र2 म1 °नाशाय (→°नादाय) –b) दे1 हरायाथ त्रिपाणिने, द1 प्र2 म1 हराय च त्रिपाणिने, प्र1 कालाय च त्रिपाणिने –d) दे8-10 ब्रह्मरेतसे, म1 वह्निनेत्रिणे प्र2 म1 वह्नितेजसे (→वह्निरेतसे)

नमोऽस्तु ते गिरीशाय स्वाहाकाराय ते नमः ।
नमो मुक्ताट्टहासाय भीमाय च नमो नमः ॥६९
नमस्ते कामनाशाय नमः कालप्रमाथिने ।
नमो भैरववेषाय हराय च निषङ्गिणे ॥७०
नमोऽस्तु ते त्र्यम्बकाय नमस्ते कृत्तिवाससे ।
नमोऽम्बिकाधिपतये पशूनां पतये नमः ॥७१
नमस्ते व्योमरूपाय व्योमाधिपतये नमः ।
नरनारीशरीराय सांख्ययोगप्रवर्त्तिने ॥७२
नमो दैवतनाथाय देवानुगतलिङ्गिने ।
कुमारगुरवे तुभ्यं देवदेवाय ते नमः ॥७३
नमो यज्ञाधिपतये नमस्ते ब्रह्मचारिणे ।
मृगव्याधाय महते ब्रह्माधिपतये नमः ॥७४
नमो हंसाय विश्वाय मोहनाय नमो नमः ।
योगिने योगगम्याय योगमायाय ते नमः ॥७५
नमस्ते प्राणपालाय घण्टानादप्रियाय च ।
कपालिने नमस्तुभ्यं ज्योतिषां पतये नमः ॥७६
नमो नमो नमस्तुभ्यं भूय एव नमो नमः ।
मह्यं सर्वात्मना कामान् प्रयच्छ परमेश्वर ॥७७
एवं हि भक्त्या देवेशमभिष्टूय स माधवः ।
पपात पादयोर्विप्रा देवदेव्योः स दण्डवत् ॥७८
उत्थाप्य भगवान् सोमः कृष्णं केशिनिषूदनम् ।
बभाषे मधुरं वाक्यं मेघगम्भीरनिःस्वनः ॥७९ वें १ २५ ७९

६८ श्लोकात्पर क3 पुस्तके अधिकम्–
*नमो देवाय ते नित्य ईशानाय नमो नम ।
उम पिनाकिने नित्य ° ° ° ।
(= ६६cd–६७a)

६९. दे18 cd ○ –c) दे5 नमो मुक्ताय हासाय, दे8 नमुक्ताट्टहासाय, ने1 नमो मुक्ताट्टभासाय, ते1 नमोऽस्तु कामरूपाय

७० –a) प्र1 2 कालनाशा(प1 °शा)य (→काम-नाशाय) –b) व1 2 दे3 4 6 10 न1 काम- (न1 °म), द1 काल (→काल) –c) दे1 °वेषाय, दे2 द1 प्र1 2 म1 °रूपाय, दे8-10 °नाशाय (→°वेषाय), का1 ते1 नमोऽस्तु भैरवेशाय –d) व2 निपाङ्गिने प्र3 निसङ्गिणे, दे2 त्रिदण्डिने, दे5 शृङ्गिणे (→निषङ्गिणे), दे4 द1 प्र1 2 म1 कालरूपाय दंष्ट्रिणे, ते1 हराय च ज्ञानसाक्षिणे

७१ व1 ७१d–७५b ○ (द्र स) –a) दे5 त्र्यक्ष्मकाय (→त्र्यम्बकाय)

७२ व1 ⊙ (द्र ७१ पा वि) –c) दे4 नमस्तारी° (→नरनारी°)

७३ व1 ○ (द्र ७१ पा वि) –a) दे1 8 10 ते1 मुवें मुए मुव भैरव° (→दैवत°) –b) दे1 देवानुगति° (→देवानुगत°), व2 देव निर्गतलिङ्गिने, द1 प्र1 2 म1 नमो दैवतलिङ्गिने

७४ व1 ⊙ (द्र ७१ पा वि), म1 ७४a–७५b ○ (द्र. स) –a) दे8 यज्ञाधिपतये, व2 धर्माधिपतये (→यज्ञाधिपतये) –c) प्र3 मृगव्याधाधिपतये नम, म1 मृगव्याधाधिपतये नम

७५ व1 न1 ab ○ (द्र ७१ पा वि), म1 ७५a–७६d ○ (द्र स) –a) का1 ते1 हराय, व2 3 दे1 3 5 6 मोहाय, दे1 व1 प्र1 2 भवाय (→हंसाय), ते1 विश्वाय (→विश्वाय)

७६ म1 ⊙ (द्र ७५ पा वि.), व1 d ⊙ –a) ते1 °रूपाय (→°पालाय) –b) दे4 महता (?) द°, द1 प्र1 मन्दनाद°, प्र2 मन्त्रदान° (→घण्टानाद°)

७७ दे6 ab ○, म1 a ○ –a) दे1 2 नमस्तुभ्य नमस्तुभ्य, मुवें मुए नमो नमोऽस्तु ते तुभ्य –b) म1 भूयो भूयो नमो नम –c) व2 वरद्युस् (?) (→मह्यं), का1 व2 न1 काम, ते1 ज्ञान (→कामान्), दे3 8 मह्य सर्वार्थकामास्त्व. –d) दे4 पप्रच्छ (→प्रयच्छ), दे9 10 म1 परमेश्वर (दे9 °र) (→परमेश्वर)

७७ श्लोकात्पर दे8 10 मुवें मुव अधिकम्–सूत उवाच
[दे8 9 सूत उ]

७८ –a) का1 भक्त्या हि, व2 भक्त्या तु, दे3 तु भक्त्या, दे8-10 हि भक्तो प्र1 स भक्त्या (→हि भक्त्या) –b) का1 दे5 अभिस्तूय, दे8-10 अभि (दे10 °गि) स्तुत्य (→अभिष्टूय), का1 व1 दे3-5 द1 प्र1 2 च (→स), दे6 माधव (→माधव) –c) दे1 पनयोर् (→पादयोर्) –d) का1 दे10 °देवो स, व1 दे3 8 9 न1 °देव्या स, दे4 °देव स, ते1 °देवस्य (→°देव्यो स)

७९ –a) व2 दे4 ते1 उत्थाय, दे10 उप्यास्य (?) (→उत्थाप्य), दे1 यम् (→सोम) –b) व1 कृष्णा- (→कृष्ण). –c) दे5 स्पष्ट (→वाक्य) –d) दे1 6 न1 प्र1 2 म1 °नि स्वनम् (→°नि स्वन).

बं.१.२१.८० किमर्थं पुण्डरीकाक्ष तपस्तप्तं त्वयाऽव्यय ।
त्वमेव दाता सर्वेषां कामानां कामिनामिह ॥८०
त्वं हि सा परमा मूर्तिर्मम नारायणाह्वया ।
नानवाप्तं त्वया तात विद्यते पुरुषोत्तम ॥८१
वेत्थ नारायणानन्तमात्मानं परमेश्वरम् ।
महादेवं महायोगं स्वेन योगेन केशव ॥८२
श्रुत्वा तद्वचनं कृष्णः प्रहसन् वै वृषध्वजम् ।
उवाच वीक्ष्य विश्वेशं देवीं च हिमशैलजाम् ॥८३
ज्ञातं हि भवता सर्वं स्वेन योगेन शंकर ।
इच्छाम्यात्मसमं पुत्रं त्वद्भक्तं देहि शंकर ॥८४
तथास्त्वित्याह विश्वात्मा प्रहृष्टमनसा हरः ।
देवीमालोक्य गिरिजां केशवं परिषस्वजे ॥८५
ततः सा जगतां माता शंकरार्द्धशरीरिणी ।
व्याजहार हृषीकेशं देवी हिमगिरीन्द्रजा ॥८६
वत्स जाने तवानन्तां निश्चलां सर्वदाच्युत ।
अनन्यामीश्वरे भक्तिमात्मन्यपि च केशव ॥८७
त्वं हि नारायणः साक्षात् सर्वात्मा पुरुषोत्तमः ।
प्रार्थितो दैवतैः पूर्वं संजातो देवकीसुतः ॥८८
पश्य त्वमात्मनात्मानमात्मीयममलं पदम् ।
नावयोर्विद्यते भेद एकं पश्यन्ति सूरयः ॥८९

---

८० -a) ब1 पुण्डरीकाक्ष (→पुण्डरीकाक्ष) -b) क3 दे3 6 [प]व्यय, दे5 विभो, म1 [प]नय (→[प] व्यय), दे1 2 8-10 ते1 मुवँ मुए मुव तप्यते भवता तप -d) दे8-10 मुवँ, मुए कर्मणामिह, ते1 कामिनामसि (→कामिनामिह)

८१ -a) दे3 त्वयि, न1 यहि (→त्व हि), न1 परमो (→परमा), द1 मूर्ति (→मूर्तिर्) -b) द1 इमं (→मम), ते1 मम या प्रणवाभिधा -c) का1 ननवाप्त, दे1 6 प2 नात्मवाप्त (→नानवाप्त), दे5 नाप, दे6 ब1 तत, प2 म1 यसद् (→तात), दे3 10 मुवँ मुए मुव न विना त्वा जगत् सर्वं -d) दे4 प2 विद्यन्ते (→विद्यते), दे4 म1 पुरुषोतम (→पुरुषोत्तम)

८२ -a) दे1 ध्याय (→वेत्थ), दे5 नारायणात्मानम्, दे8-10 नारायणानन्त, प2 म1 नारायण देव (→नारायणानन्तम्) -c) ते1 महात्मानं, म1 महायोगिन् (→महायोगं) -d) ते1 स्वयं- (→स्वेन), दे5 केशव (→केशव)

८३ -b) दे8 9 स हसन् वै, न1 प्रणम्याथ (→प्रहसन् वै), ते1 प्रहस्य वृषभध्वजम् -c) का1 ब1-3 दे2 3 6-10 न1 मुवँ मुए मुव उवाचानन्दित, ते1 उवाच विर्या (→उवाच वीक्ष्य), दे5 विश्वं च, न2 देवेशं (→विश्वेशं)

८४ -a) दे3 द1 ज्ञात, दे10 प2 ज्ञानं (→ज्ञातं), दे8 10 प1 भवत (→भवता), ते1 ज्ञानासि भगवन् सर्वं -b) ते1 ज्ञान- (→स्वेन) -d) प1 -भक्तं (→ भक्तं), प1 देव (→देहि), ब1 दे10 भास्कर (→शंकर)

८५ -a) म1 तथास्त्वाह विश्वात्मा, ते1 तथेत्यस्त्वाह विश्वात्मा -b) दे5 प्रहृष्ट-, प्र2 म1 प्रहृष्ट- (→प्रहृष्ट-), दे6 प2 -मनसो (→-मनसा) -c) ते1 देव, + देवीं (→देवीम्), प्र1 गिरिजा- (→गिरिजां), न1 केशव (→केशवं), दे6 परिषस्वजे (→परिषस्वजे)

८६ -a) ते1 तु, प2 स (→सा), का1 जगतो (→जगतां), दे1 ततस्तस्मात्जगन्माता -b) दे6 भवराद्ध (→शंकरार्द्ध-) -c) दे3 5 व्याजहारा (दे3 °रे) (→व्याजहार), -d) दे1 6 देवा (→देवी), ते1 देवदेव गिरीन्द्रजा

या सा भक्ति प्रवृत्तो सीनरूपा ।
वेदेभूता कारण ब्रह्मयोनिः ।
तस्य एव परमेष्ठी परस्तात्
महेश्वर परमतत्त्वरूप ॥
ब्रह्मा योगी परमात्मा महीयान्
व्योमव्यापी वेदवेद्य परात्मा ।
(= द १३-१६ b)

१२ –d) का1 व2 3 दे2 3 6 न बिभेति कदाचन, व1 बिभेति च कदाचन, दे4 5 न1 ते1 द1 प्र2 म1 न बिभेति कुतश्चन

१३ –a) व2 ***, दे5 न1 पुराण (→महान्त) –b) दे8 मुवँ मुए पुरुष, दे9 तमस, + पुरुष (→तमस), दे8 9 मुवँ मुए पुरस्तात् (→परस्तात्) –c) व2 3 मुवँ मुए मुव त (→तद्), दे1 प्र2 परिमुच्यते, दे8 वि • मुच्यते, ते1 पर मुच्यते (→परिमुच्येत) –d) दे1 5 द1 प्र2 उ1 °भूत (→°भूत)

१४ दे1 5 ⊙, दे4 १४d १६c ○ –a) व1 दे1 ते1 तस्माद्, म1 मुवँ मुए अस्मान् (→यस्मात्), दे8 वापर°, दे4 नापर°, उ1 नोपर° (→नापर°), म1 यस्मात्परान्नापरमस्ति किञ्चिद्, ते1 तस्मात्परस्मादपरमस्ति किञ्चि –b) का1 व2 3 दे2 3 6 दिविष्ठ, म1 विविष्टं (→दिविष्टं), ते1 यज्ज्योतिरेव परम दिवि तिष्ठति –c) दे4 मन्यमानोऽथ (→मन्यमानोऽथ), दे4 धीर (→विद्वान्)

१५ दे1 ○ (द १४ या दि) –a) व1 दे4 तदाव्ययं, दे1 तदव्यय, दे3 8 9 तदव्ययं, मुवँ मुए तदव्ययं (→तदव्ययं) व1 कलिज, वे1 कलिलं (→कलिलं), दे1 °देय (→°देहं) –b) दे2 6 मुवँ मुए °धामा (→°धाम) –c) दे1 वदन्त्येव (→वदन्त्येवं) –d) म1 ते1 निवर्त्तन्ति (→निवर्त्तेत)

हिरण्मये परमाकाशतत्त्वे
यदर्चिषि प्रविभातीव तेजः ।
तद्विज्ञाने परिपश्यन्ति धीरा
विभ्राजमानं विमलं व्योम धाम ॥१६
ततः परं परिपश्यन्ति धीरा
आत्मन्यात्मानमनुभूयानुभूय ।
स्वयंप्रभः परमेष्ठी महीयान्
ब्रह्मानन्दी भगवानीश एषः ॥१७

एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा ।
तमेवैकं येऽनुपश्यन्ति धीरा-
स्तेषां शान्तिः शाश्वती नेतरेषाम् ॥१८
सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी च भगवान् न तस्मादन्यदिष्यते ॥१९
इत्येतदैश्वरं ज्ञानमुक्तं वो मुनिपुंगवाः ।
गोपनीयं विशेषेण योगिनामपि दुर्लभम् ॥२० वं ३.६.३०

इति श्रीकूर्मपुराणे षट्साहस्र्यां संहितायामुपरिविभागे (ईश्वरगीतासु) नवमोऽध्याय ॥ ९॥

---

१६ न$_1$ क$_2$ O; दे$_4$ abc O, ते$_1$ d O –a) दे$_2$ तत्त्व (→तत्त्वे), का$_1$ हिरण्मय परमेकोऽथतत्व, दे$_1$ हिरण्मय ब्रह्माकाशतत्वे –b) फा$_1$ यदर्चिमि ते$_1$ यज्ज्योतिषि (→यदर्चिषि), फा$_1$ प्रविभाति *, व$_2$ प्रविभातीह द$_1$ प$_1$ प्रतिभातीव, ते$_1$ म$_1$ प्रतिभातीह (→प्रविभातीव), दे$_8$ $_9$ मुवँ मुए मुव यद्वै दिवि विप्रतिभातीव तेज –c) व$_2$ उ$_1$ तद् विज्ञान दे$_1$ तद् विज्ञान-, दे$_2$ $_8$ $_9$ तद् विज्ञानेन (→तद् विज्ञाने) –d) व$_3$ विराज° (→विभ्राज°), दे$_1$ विपुल (→विमल)

१७ न$_1$ O, ते$_1$ a O –a) द$_1$ प$_2$ उ$_1$ ततस्तत (अतत पर), का$_1$ व$_3$ वे$_3$ परपश्यन्ति, व$_1$ म$_1$ यत्परिपश्यन्ति, व$_2$ तत् परिपश्यन्ति, दे$_1$ यत्प्रपश्यन्ति (→परिपश्यन्ति), दे$_6$ तत्पर यत्पश्यन्ति धीरा –b) व$_3$ दे$_5$ प$_3$ म$_1$ उ$_1$ °यानुभूय, दे$_8$ $_9$ मुवँ मुए मुव °य साक्षात् (→°यानुभूय), ते$_1$ आत्मन्यनुभूयानुभूय –c) का$_1$ व$_{1\,3}$ दे$_{2\,8}$ स्वय प्रभ, दे$_4$ स्वय **, द$_1$ स्वय प्रभु (→स्वयप्रभ) दे$_4$ ते$_1$ परमात्मा (→परमेष्ठी), द$_1$ प$_2$ म$_1$ प$_1$ °मात्मा महात्मा (→°मेष्ठी महीयान्) –d) प$_2$ ईश (→°नन्दी), दे$_5$ एव, प$_2$ (एक) एष (→एष) दे$_3$ भ*वानीश (→भगवानीश)

१८ –a) व$_3$ भूत ते$_1$ रुद्र (→देव) –c) दे$_4$ स्व (→त), व$_2$ त्वमेकं वै दे$_1$ मम चैक प$_2$ तामवेक (→तमेवैक), का$_1$ वे$_{2\,3\,6}$ यन, च$_1$ दे$_4$ द$_1$ येन, दे$_1$ ये तु (→येऽनु) –d) उ$_1$ मुक्ति (→शान्ति)

१९ –a) दे$_{3\,8\,9}$ मुवँ मुए मुव सर्वोक्ष° (→सर्वानन°), दे$_8$ °ग्रीवा, द$_1$ प$_2$ °ग्रीव- (→°ग्रीव) –b) म$_1$ °शय, ते$_1$ °लय (→°शय) –c) व$_{2\,3}$ *, दे$_{5\,8\,9}$ ते$_1$ द$_1$ प$_2$ उ$_1$ मुवँ, मुए मुव स (→च) –d) व$_2$ तस्मादन्यद्विविष्यते, दे$_{3\,8\,9}$ मुवँ मुए मुव तस्मादन्यन्न विद्यते

अत पर न$_1$ पुस्तके अधिकम्—
स्वयप्रभ* परमेष्ठी महीया ब्रह्मानन्दी भगवानीश एष ।
(= १७d)

२० –a) दे$_{8\,9}$ ईश्वर (→ऐश्वर) –b) का$_1$ उक्त यत्, व$_{1\,3}$ दे$_{2\,3\,5\,6}$ मुक्तये ते$_1$ उक्त हे, म$_1$ उक्त वै (→उक्त वो) –c) दे$_4$ °नीयो (→°नीय), म$_2$ प्रयत्नेन (→विशेषेण)

पुष्पिका—[द$_1$ पुस्तके अध्याय समाप्तिर्नास्ति]

पुराणनाम—का$_1$ दे$_4$ न$_1$ म$_1$ इति श्रीकूर्मपुराणे ईश्वरगीतासूपनिषत्सु व$_1$ इति कौर्मे ईश्वरगीतासूपनिषत्सु, व$_2$ दे$_6$ इति*मपुराणे ईश्वरगीतासूपनिषत्सु, व$_3$ दे$_{2\,3}$ इति कू (दे$_2$ कौ)र्मपुराणे ईश्वरगीतासूपनिषत्सु, दे$_1$ इति श्रीकूर्मपुराणे ईश्वरगीतासूपनिषत्सु उत्तरखण्डे, दे$_5$ मुवँ इति श्रीकूर्मेउत्तरार्द्धे ईश्वरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे, दे$_{8\,9}$ मुए इति श्रीईश्वरगीतासु, ते$_1$ इति श्रीकूर्मपुराणे उपरिभागे कूर्मपुराणे ईश्वरगीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे प$_2$ उ$_1$ इति श्रीकूर्मपुराणे उत्तरभागे ईश्वरगीतासूपनिषत्सु, मुव इति श्रीकौर्मे महापुराणे उपरिभागे श्रीमद्भगवदीश्वरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे

अध्यायनाम—का$_1$ व$_{1\,3}$ द$_1$ $_{8\,8\text{-}9}$ न$_1$ म$_2$ म$_1$ उ$_1$ मुए O, ते$_1$ ईश्वरनारायणमहर्षिसंवादे ईश्वरस्य विश्वरूपस्वरूपयोगो नाम, मुवँ महर्षिनारदसंवादे, मुव निर्गुणब्रह्मणो विश्वरूपकारणज्ञानयोगो नाम अध्यायसंख्या—का$_1$ दे$_1$ अष्टमोऽध्याय ॥८॥ व$_{1\,3}$ दे$_{2\,3\,6}$ षष्टमोऽध्याय, व$_2$ षष्टमोऽध्याय ॥६८॥, दे$_{4\,8\,9}$ ते$_1$ प$_2$ म$_1$ मुए मुव नवमोऽध्याय, दे$_5$ मुवँ नवमोऽध्याय ॥९॥, न$_1$ षष्ट (सप्त) पञ्चाशोऽध्याय, उ$_1$ नवमोऽध्याय ॥९॥

१०

ईश्वर उवाच ।❀

वं २१०१ अलिङ्गमेकमव्यक्तं लिङ्गं ब्रह्मेति निश्चितम् ।
स्वयंज्योतिः परं तत्त्वं परे व्योम्नि व्यवस्थितम् ॥१
अव्यक्तं कारणं यत्तदक्षरं परमं पदम् ।
निर्गुणं शुद्धविज्ञानं तद् वै पश्यन्ति सूरयः ॥२
तन्निष्ठाः शान्तसंकल्पा नित्यं तद्भावभाविताः ।
पश्यन्ति तत् परं ब्रह्म यत्तल्लिङ्गमिति श्रुतिः ॥३
अन्यथा नहि मां द्रष्टुं शक्यं वै मुनिपुंगवाः ।
नहि तद् विद्यते ज्ञानं यतस्तज्ज्ञायते परम् ॥४

एतत्तत्परमं ज्ञानं केवलं कवयो विदुः ।
अज्ञानमितरत् सर्वं यस्मान्मायामयं जगत् ॥५
यज्ज्ञानं निर्मलं सूक्ष्मं निर्विकल्पं यदव्ययम् ।
ममात्मासौ तदेवेदमिति प्राहुर्विपश्चितः ॥६
येऽप्यनेकं प्रपश्यन्ति तेऽपि पश्यन्ति तत्परम् ।
आश्रिताः परमां निष्ठां बुद्ध्वैकं तत्त्वमव्ययम् ॥७
ये पुनः परमं तत्त्वमेकं वानेकमीश्वरम् ।
भक्त्या मां संप्रपश्यन्ति विज्ञेयास्ते तदात्मकाः ॥८

१०

❀ द1 ○, दे1 ईश्वर * वाच, दे8 9 ईश्वर उ, प्र2 म1 उ1 ईश्वर

१. –a) द1 एव (→एकं), म1 मुवँ मुए मुव. अव्यक्त- (→अव्यक्त) –c) द1 पर तर, प्र2 उ1 परतर, (→पर तत्त्व) –d) व2 दे3 8 म1 पर, दे4 8 मुवँ मुए पूर्वं, दे9 परे + पूर्वं प्र2 पर- (→परे)

२ –a) व3 दे4 अव्यक्त- (→अव्यक्त), द1 परम (→कारण), म1 यत् तम् म1 तद्वद् (→यत्तद्) –c) दे8.9 मुवँ मुए सिद्धि° (→शुद्ध°) –d) दे2 3 6 त वै, द1 प्र2 उ1 सदा (→तद्वै), दे3 6 पश्यति (→पश्यन्ति), दे2 4 6 सूरय (→सूरय), दे9 ते1 तद् विपश्यन्ति सूरय

३ –a) का1 तन्निष्ठा सत्य°, दे4 मन्निष्ठा शांत°, दे8 तन्नष्ट शात°, ते1 व1 तन्निष्ठा शान्ति°, मुवँ मुए मुव तन्नष्ट स्वान्त° (→तन्निष्ठा शान्त°) –c) द1 प्र2 गत्पर, उ1 मत्पर (न) (→तत्पर), दे1 म1 श्रुत (→श्रुति).

४ –a) दे1 नैव (→नहि) –b) न1 म1 शक्य यो, ते1 शक्यते, प्र2 शक्यो वै (→शक्य वै), दे2 °पुंगव (→°पुंगवा) –d) का1 न1 ते1 म1 यतद्, व2 यतस्, दे1 8 9 मुवँ मुए मुव. येन (→यतस्), न1 यै जायते, म1 स ज्ञायते (→तज्ज्ञायते), ते1 पदम् (→परम्)

५ –a) व2 एते वत्, दे4 5 ते1 द1 प्र2 म1 उ1 इत्येतत् (प्र2 °त्) (→एतत् तत्), दे3 9 मुवँ, मुए, ध्यान (→ज्ञान), –c) का1 व2 3 दे8 9 द1 प्र2 मुवँ मुए मुव अज्ञान (→अज्ञान), का1 प्र2 मुवँ, मुए मुव -तिमिरं, व2 3 दे3 6 9 -तिमिर-, दे1 6 इतिर-, दे4 ज्ञान, दे5 ते1 इवितर, द1 प्र2 तिमिरात् (प्र2 °रत्) (→इतरत्), व2 3 दे1 3 5 6 8 9 न1 मुवँ मुए मुव ज्ञान (→सर्वं) –d) दे5 न1 तस्मात् (→यस्मान्), दे1 तस्मादेतन्मय जगत्, दे1 ते1 द1 प्र2 उ1 विज्ञानमिति मे मतिः

६ –a) व2 3 दे3 तद्ज्ञान, दे9 तद्ज्ञान, + यद् ज्ञान, ते1 य[द्य]ज्ञान (→यज्ज्ञान), दे1 4 5 8 9 न1 ते1 द1 प्र2 म1 उ1 मुवँ मुए मुव शुद्ध (→सूक्ष्म) –b) दे1 4 5 8 9 न1 ते1 द1 व3 न1 उ1 मुवँ मुए मुव. निरञ्जनम् (→यदव्ययम्). –c) दे9 ममात्मजस्, ते1 महात्मानो, द1 असौ * सौ, प्र2 मनात्मान, उ1 मनात्मासौ (→ममात्मासौ), दे8 9 मुवँ मुए. तदेवेन, द1 तदेवेद (→तदेवेद) –d) दे1 विपश्चिता ते1 विनिश्चितम्, प्र2 मनीषिण (→विपश्चित)

७ का1 ७c-१७a ○ –a) ते1 यथदेक (→येऽप्यनेक), म1 विपश्यन्ति (→प्रपश्यन्ति) –b) दे8 मुवँ मुए मुव तत्पर परम पदम् दे8 नात्पर परम पदम्, + तेपि पश्यन्ति तत्पदम् –c) दे4 न1 आश्रितो (→आश्रिता), द1 प्र2 उ1 परमा (→परमां) –d) व2 दे8 म1 मुवँ मुए मुव बुद्धैमक्य (→बुद्ध्वैकं)

८ का1 ○ –b) दे1 एकद्वयानेकम्, दे5 एक द्वानेक, न1 म1 एक धानेक- (→एक वानेक), प्र2 एकत्वान्येकमीश्वरः –c) दे8 मुए भक्ता (→भक्त्या), दे9 सप्रपश्यते, + संप्रपश्यन्ति (→संप्रपश्यन्ति) –d) न1 विज्ञायास्ते (→विज्ञेयास्ते), प्र2 न1 म1 मदात्मका (→तदात्मका)

साक्षादेव प्रपश्यन्ति स्वात्मानं परमेश्वरम् ।
नित्यानन्दं निर्विकल्पं सत्यरूपमिति स्थितिः ॥९
भजन्ते परमानन्दं सर्वगं यत्तदात्मकम् ।
स्वात्मन्यवस्थिताः शान्ताः परेऽव्यक्ते परस्य तु ॥१०
एषा विमुक्तिः परमा मम सायुज्यमुत्तमम् ।
निर्वाणं ब्रह्मणा चैक्यं कैवल्यं कवयो विदुः ॥११
तस्मादनादिमध्यान्तं वस्त्वेकं परमं शिवम् ।
स ईश्वरो महादेवस्तं विज्ञाय विमुच्यते ॥१२
न तत्र सूर्यः प्रविभातीह चन्द्रो
न नक्षत्राणि तपनो नोत विद्युत् ।
तद्भासेदमखिलं भाति नित्यं
तन्नित्यभासमचलं सद्विभाति ॥१३
नित्योदितं संविदा निर्विकल्पं
शुद्धं बृहन्तं परमं यद्विभाति ।
अत्रान्तरं ब्रह्मविदोऽथ नित्यं
पश्यन्ति तत्त्वमचलं यत् स ईशः ॥१४
नित्यानन्दममृतं सत्यरूपं
शुद्धं वदन्ति पुरुषं सर्ववेदाः । वें २१०१५

९ का1 O -a) ब2 दे3 8 9 ग्र2 मुवँ मुए मुब साक्षादेव, न1 साक्षादेन (→साक्षादेव) -b) दे1 ग्रात्मान (→स्वात्मान) -c) दे3 6 निरानन्द (→नित्यानन्द) -d) दे1 सत्य तप, दे3 6 नित्यरूप, ते1 सत स्वरूप (→सत्यरूप), दे5 स्थित, ग्र2 स्थिति, म1 श्रुति (→स्थिति)

१० का1 O -a) दे1 भजते, दे6 ते1 गच्छन्ति (→भजन्ते) -b) दे5 सर्वज्ञ (→सर्वग), ब2 3 दे2 3 6 9 यत् सदात्मक, दे8 मुवँ मुए मुब जगदात्मकम्, ते1 उत्तदात्मकम् (→यत्तदात्मकम्) -c) दे2 3 6 मात्म° (→स्वात्म°), ते1 एव (→°यव) -d) दे1 पर- (→परे), दे8 मुवँ मुए मुब °व्यक्ता, दे9 °व्यक्त, न1 °व्यक्तो (→°व्यक्ते) ते1 परेस्य (→परस्य)

११ का1 O -a) दे8 विद्या, ते1 म1 एषा, द1 ग्र2 येषा उ1 येषा (→एषा), म1 विमुक्ति (→विमुक्तिः), ग्र2 म1 परमा (→परमा) -b) ब2 मया (→मम), ग्र2 उत्तमा (→उत्तम) -c) दे1 निर्वाण- (→निर्वाणं), दे1 ब्रह्मणोरैक्य, दे8 ब्रह्मणोर्थैक्य-, न1 ब्रह्मणा चैक्य ते1 ब्रह्मणा चैव द1 ब्रह्मणो ह्यैक्य, ग्र2 ब्रह्मणास्त्वैक्य (→ब्रह्मणा चैक्य) -d) दे8 कैवल्य- (→कैवल्य)

१२ का1 O -b) ब3 वास्त्वक, द1 वस्त्वेक ग्र2 उ1 यत् वेक (→वस्त्वेक), ब2 3 दे1 3-9 ते1 द1 उ1 मुब परम शिव (→परमं शिवम्) -c) दे1 ईश्वरोऽथ महादेवस -d) ब2 3 दे1 8 ग्र1 तद्विज्ञाय (→तं विज्ञाय), दे4 न1 मुवँ मुए, मुब प्रमुच्यते, दे5 स मुच्यते (→विमुच्यते)

१३ का1 ⊙ -a) ते1 * (→न), दे1 8 म1 द1 उ1 मुवँ मुए प्रतिभातीह वे4 5 ते1 ग्र2 म1 मुब प्रतिभाति* (→प्रविभातीह) -b) दे5 8 ते1 न1 मुवँ मुए * (→न), दे8 मुवँ मुए नक्षत्राणां (→नक्षत्राणि), ब2 3 तपनोऽथ विद्युत्, दे3 तपनो विद्युत्, दे4 नापनो न विद्युत्, दे6 तपनो विद्युतस्, दे8 मुवँ मुए गणो नोत विद्युत, दे9 तपनोत विद्युत्, न1 न भनो नोत विद्युत् वे1 तपनो नोति विद्युत्, द1 तपनो नाह विद्युत्, म1 ज्वलतो नोत विद्युत् (→तपनो नोत विद्युत्) -c) दे3 तद्भासैव, दे4 उ1 तद्भासे (नै) व, दे6 * हासेद, दे8 9 मुवँ मुए तद्भासित ते1 तद्भासेनैव, द1 म*द्भासेनेद, ग्र2 सद्भासेनेद, म1 * भासा वेद (→तद्भासेद), दे8 9 मुवँ मुए ह्यखिल, म1 सस्थित (→अखिल) ते1 **, द1 ग्र2 उ1 (वि)भाति (→भाति), दे1 3 5 8 9 न1 म1 मुवँ मुए मुब विश्व, ग्र2 मध्य (→नित्य) -d) दे1 तन्निमसि, दे3 6 सनित्यभाम, दे5 नित्येमाव, दे8 9 मुवँ मुए सतीवभास, म1 द1 ग्र2 उ1 नित्याभास (→तन्नित्यभासं), दे3 4 8 9 मुब मुए मुव ममल, दे5 मवल दे8 ममा(?)ल (→मचल) दे० सद्विमेति दे8 9 न1 उ1 मुवँ मुए तद्विभाति (→सद्विभाति), ते1 तद्भासमखिल *** विभाति

१४ का1 O, दे1 द1 ग्र2 म1 उ1 ab O -a) दे1 सत्योदित दे4 नित्योदित, दे8 9 मुवँ मुए विश्वोदित (→नित्योदितं), ब2 3 सुविद, दे3 5 6 सिवत्त, दे4 सदिति, न1 *** मुवँ मुए मुब निष्कल (→संविदा) -b) ब2 3 शुभ्र (→शुद्ध), ब2 3 निशान्त, दे1 3-5 8 9 न1 मुवँ मुए मुब बृहत (→बृहन्त) -c) दे3 तत्रोत्तर, दे5 न1 दे1 मुवँ मुए मुब अत्रान्तरे, द1 ग्र2 उ1 तत्रान्तर (→अत्रान्तर), दे4 °विदोथ, न1 °विद्याम, उ1 °विदाम (→°विदोऽथ) -d) दे4 चविरल, दे5 चमल, दे8 चवल (→चचल), ग्र2 यस्, म1 यं (→यत्)

१५ का1 O -a) म1 अम त (→अमृत), द1 ग्र2 म1 उ1 नित्यरूप (→सत्यरूप) -b) दे6 °विदा (→°वेदा) -c) दे0 नमोभिति, दे8 मुवँ मुए मुब प्राणानिति, दे9 प्राणानिति, +तमोमिति (→तमोभिति), वे1 प्रणव पारसितार, द1 प्रणवेनी-

वे.३.१०.१५ तमोमिति　प्रणवेनेशितारं
ध्यायन्ति वेदार्थविनिश्चितार्थाः ॥१५

न भूमिरापो न मनो न वह्निः
प्राणोऽनिलो गगनं नोत बुद्धिः ।
न चेतनोऽन्यत् परमाकाशमध्ये
विभाति देवः शिव एव केवलः ॥१६

इत्येतदुक्तं परमं रहस्यं
ज्ञानामृतं सर्ववेदेषु गूढम् ।
जानाति योगी विजनेऽथ देशे
युञ्जीत योगं प्रयतो ह्यजस्रम् ॥१७

इति श्रीकूर्मपुराणे षट्साहस्र्यां संहितायामुपरिविभागे (ईश्वरगीतासु) दशमोऽध्यायः ॥१०॥

शितार, मुवँ मुए प्रणविनेशितार (→प्रणवेनेशितार) -d) दे4 म1 वेदात° (→वेदार्थ°), व3 °विपश्चितार्था, दे5 6 °विनिश्चितार्थं (दे8 °र्थं) (→°विनिश्चितार्थाः), दे8 9 मुवँ मुए मुव ध्यायन्ति वेदैरिति (दे9+वेदान्तवि) निश्चितार्था

१६ का1 ⊙. -a) दे1 बुद्धि, न1 न च, म1 वायु(रग्नि) (→वह्नि), ते1 न भूमिरापो न च वह्निरस्ति -d) न1 म1 प्राणानिलो, द1 प्रभानलो, प्र2 न चानिलो (→प्राणोऽनिलो), प्र2 गगनो (→गगन), व2 प्र3 न*, व3 नोभ्र, दे1 द1 नो न, दे3 लोल, दे6 लोभ, म1 तेन (→नोत), दे1 वह्नि (→बुद्धि), ते1 न चानिलो मेस्ति न चाम्बर च, उ1 प्रमाविलोके गगन न बुद्धि -c) व3 न चेतनोन्य, दे1 न चान्योन्यत्*, दे2 न चैतनोन्यत, दे4 न चेतनो य, द1 न चैतन्नै*, प्र2 न चैतन्ये*, उ1 न वेतन्यो* (→न चेतनोऽन्यत्) -d) दे8 न1 मुवँ मुए एक (→एव)

दे1 पुस्तके b चरणानन्तरमधिकम्—

31 * एव विदित्वा परमात्मरूप
गुहाशय निष्कलमद्वितीयम् ।
समस्तसाक्षि सदसद्विहीन
प्रयाति शुद्ध परमात्मरूपम् ॥

१७ ते1 ○, का1 a ○ -b) का1 ज्ञानामृते, दे1 ज्ञानेद्वित दे0 9 मुवँ मुए ज्ञानन्चेद (→ज्ञानामृत), दे1 3-5 8 9 न1 द1 प्र2 म1 उ1 गीतम् (→गूढम्) -c) न1 ज्ञात्वा च म1 ज्ञानेन (→जानाति), द1 प्र2 उ1 विजने च देशे, दे1 4 म1 विजन (म1 °ने) प्रदेशे, दे8 9 विजन च देव (दे9 °शे) (→विजनेऽथ देशे) -d) न1 युन्जीय (→युञ्जीत), द1 योगो, प्र3 योगे (→योग), दे8 परग, प्र2 प्रयते (→प्रयतो), दे3 ह्यजस्रं, दे0 दुर्लभ, द1 प्र2 उ1 ह्यजेय (द1 °य) (→ह्यजस्रम्)

अत पर दे6 पुस्तके अधिकम्—
येनात्मान प्रपश्यन्तो यता यतोऽप्यनस्र

पुष्पिका—[द1 पुस्तके अध्यायसमाप्तिर्नास्ति]

पुराणनाम—का1 दे4 8 न1 इति श्रीकूर्मपुराणे ईश्वरगीतासूपनिषत्सु, व2 3 इति कूर्मपुराणे ईश्वरगीतासूपनिषत्सु दे1 प्र2 म1 उ1 इति श्रीकूर्मपुराणे उत्तरभागे (दे1 °र्द्धे) ईश्वरगीतासूपनिषत्सु, दे5 8 9 मुए इति श्रीकूर्मपुराणे ईश्वरगीतासु, ते1 इति श्रीकूर्मपुराणे उपरिविभागे ईश्वरगीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे, मुवँ इति श्रीकूर्मपुराणे उत्तरार्द्धे ईश्वरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे, मुव इति श्रीकौर्मे महापुराणे उपरिभागे श्रीमद्भगवदीश्वरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे अध्यायनाम—का1 व2 3 दे1-6 8 9 न1 प्र2 म1 उ1 मुए ○, ते1 ईश्वरनारायणमहर्षिसंवादे, मुवँ ऋषिनारदसंवादे, मुव विज्ञाने ज्ञानयोगो नाम अध्यायसंख्या—का1 नवमोऽध्याय ॥९॥, प्र2 नवमोध्याय ॥५९॥, व3 दे2 3 6 नवमोऽध्याय, दे8 9 ते1 प्र2 म1 उ1 मुए मुव दशमोऽध्याय, दे5 मुवँ दशमोऽध्याय ॥१०॥, म1 महापञ्चाशोऽध्याय

ईश्वर उवाच ।*

अतः परं प्रवक्ष्यामि योगं परमदुर्लभम् ।
येनात्मानं प्रपश्यन्ति भानुमन्तमिवेश्वरम् ॥१

योगाग्निर्दहति क्षिप्रमशेषं पापपञ्जरम् ।
प्रसन्नं जायते ज्ञानं साक्षान्निर्वाणसिद्धिदम् ॥२

योगात्संजायते ज्ञानं ज्ञानाद् योगः प्रवर्त्तते ।
योगज्ञानाभियुक्तस्य प्रसीदति महेश्वरः ॥३

एककालं द्विकालं वा त्रिकालं नित्यमेव वा ।
ये युञ्जतीह मद्योगं ते विज्ञेया महेश्वराः ॥४

योगस्तु द्विविधो ज्ञेयो ह्यभावः प्रथमो मतः ।
अपरस्तु महायोगः सर्वयोगोत्तमोत्तमः ॥५

शून्यं सर्वनिराभासं स्वरूपं यत्र चिन्त्यते ।
अभावयोगः स प्रोक्तो येनात्मानं प्रपश्यति ॥६

यत्र पश्यति चात्मानं नित्यानन्दं निरञ्जनम् ।
मयैक्यं स महायोगो भाषितः परमेश्वरः ॥७

ये चान्ये योगिनां योगाः श्रूयन्ते ग्रन्थविस्तरे ।
सर्वे ते ब्रह्मयोगस्य कलां नार्हन्ति षोडशीम् ॥८ बं.२ ११.८

११

* द1 ○, ग्र2 म1 उ1 ईश्वर, दे9 ईश्वर उ, न1 ईश्वरीवाच, तै1 ॥श्रोम॥ ईश्वर उवाच

१ –a) द1 प्रवेक्ष्यामि (→प्रवक्ष्यामि) –c) व1 प्रपश्यन्ति, दे4 प्रपश्यति (→प्रपश्यन्ति) –d) दे1 इवापर, दे6 इविश्वर, न1 तै1 महेश्वरम् (→इवेश्वरम्)

२ दे6 9 तै1 २d-३a ⊙ (इ श) –a) दे1 योगोग्निर् (→योगाग्निर्), दे4 5 8 9 तै1 द1 ग्र2 म1 उ1 मुवें मुए मुव दहते (→दहति), न1 योगो निर्दहते क्षिप्र –c) दे3 6 प्रसन्न (→प्रसन्नं)

३ दे8 9 तै1 a ○ (इ २ पा वि), द1 ३b-७a ○ –a) ग्र2 योगास् (→योगात्), व1 सस्यायपेत (→संजायते) –b) दे5 योग, न1 योग (→योग) –c) दे6 -ज्ञानाभियुक्तस्य, म1 ज्ञानाभिमुक्तस्य, ग्र2 -ज्ञानाग्नियुक्तस्य, म1 -ज्ञानाभियुक्तस्य (→-ज्ञानाभियुक्तस्य) –d) दे1 न शकर, दे1 महेश्वरा (→महेश्वर)

४ दे5 द1 ⊙ –a) न1 त्रिकाल (→द्विकाल) –b) का1 ग्र1 दे1 4 8 उ1 मुवें मुए मुव च (→वा) –c) का1 दे3 उ1 मुवें मुए मुव ये युञ्जन्ति महायोग (उ1 °गाद), व1 ये युञ्जीह* मयोग, दे1 ग युञ्जते महादेव, तै1 ग्र2 म1 ये युञ्जन्ति महयोगं –d) का1 ते विज्ञेयो, म1 विज्ञायास्ते, तै1 ते विज्ञाय (→ते विज्ञेया), का1 दे10 महेश्वरः (→महेश्वराः)

५ द1 ⊙ (इ ३ पा वि) –a) दे4 5 8 9 तै1 उ1 प्रथमो, न1 विविधो (→द्विविधो), ग्र2 ज्ञेय (→ज्ञेयो); व2 योगस्तद्विधो ज्ञेयो –b) दे2 ग्वभावा (→ह्यभाव), दे4 8 ग्र3 म1 परमो (→प्रथमो), दे1 म(त)? (→मतः), दे5 ह्यभावो द्विजसत्तमा –c) दे6 अनुकामुनकायोग, दे9 अभावयोग सप्रोक्त + अनुकामुनकायोग

६ द1 ○ (इ ३ पा वि) –a) का1 व2 दे1 2 4 9 न1 उ1 सर्व (→सर्व-), का1 दे2 इवाभास, व3 इनात्माभ, तै1 -निराभान (→-निराभास) –b) न1 स्वरूप येन (→स्वरूप यत्र), दे8 उ1 विद्यते (→चिन्त्यते) –c) व3 स प्राप्तो, दे4 स प्रोक्ते, न1 स प्रोक्त, वे1 सप्रोक्तो (→स प्रोक्तो). –d) दे2 येनात्मन, दे8 सेनात्मान (→येनात्मानं), दे9 प्र (स) पश्यति (→प्रपश्यति)

७ द1 a ⊙ (इ ३ पा वि) –a) व1 ग्र2 उ1 यत्र (→यत्र), का1 दे1 तै1 ग्र3 उ1 पश्यन्ति, दे2 *श्यति (→पश्यति). –c) व1 मयैक व2 3 दे6 मयेक, दे1 मम स, दे2 गयेका, दे5 गयेव (?), न1 मायक, द1 अचैक्य (→मयैक्य), का1 द1 महायोगा, व1 महायोग, दे3 म1 मुवें. मुए मुव. ममायोगो, दे8 मयायोगो दे9 महायोगो, + मयायोगो (→महायोगो) –d) म1 भावित (→भाषित); दे1 5 8 9 मुवें. मुए मुव परम स्वय, न1 परम स्वय, तै1 परमेश्वरात्, म1 परमेश्वर (→परमेश्वर)

८ –a) दे8 दान्ये (→चान्ये) दे6 ग्र2 म1 योगा, द1 यागात (→योगा) –b) दे8 द1 श्रूयते (→श्रूयन्ते), व1 ग्रह-, दे5 म1 ग्रन्थ-, न1 ब्रह्म-, तै1 गूढ-, + ग्रन्थ-, द1 गध- (→ग्रन्थ-), दे7 -विस्तराद्, दे8 -विस्तरा, तै1 म1 -विस्तरे

वें.२ ११.६ यत्र साक्षात् प्रपश्यन्ति विमुक्ता विश्वमीश्वरम् ।
सर्वेषामेव योगानां स योगः परमो मतः ॥९
सहस्रशोऽथ शतशो ये चेश्वरबहिष्कृताः ।
न ते पश्यन्ति मामेकं योगिनो यतमानसाः ॥१०
प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा ।
समाधिश्च मुनिश्रेष्ठा यमो नियम आसनम् ॥११
मय्येकचित्ततायोगो वृत्त्यन्तरनिरोधतः ।
तत्साधनान्यष्टधा तु युष्माकं कथितानि तु ॥१२
अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ।
यमाः संक्षेपतः प्रोक्ताश्चित्तशुद्धिप्रदा नृणाम् ॥१३
कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा ।
अक्लेशजननं प्रोक्तं त्वहिंसा परमर्षिभिः ॥१४
अहिंसायाः परो धर्मो नास्त्यहिंसा परं सुखम् ।
विधिना या भवेद्धिंसा त्वहिंसैव प्रकीर्तिता ॥१५
सत्येन सर्वमाप्नोति सत्ये सर्वं प्रतिष्ठितम् ।
यथार्थकथनाचारः सत्यं प्रोक्तं द्विजातिभिः ॥१६
परद्रव्यापहरणं चौर्याद् वाऽथ बलेन वा ।
स्तेयं तस्यानाचरणादस्तेयं धर्मसाधनम् ॥१७

(→ विरतरे) –c) स1 शान° (→ब्रह्म°) –d) प्र2 कला (→कला), दे6 नार्हति षोडशी (→नार्हन्ति षोडशीम्)

९ –a) द1 प्र2 उ1 ये च, दे1 यत्र (→यत्र), ब3 प्रपश्यन्ति, दे1 प्रविश्यन्ति, उ1 पर ब्रह्म, +प्रपश्यन्ति (→प्रपश्यन्ति) –b) द1 विमुक्त्यो, प्र2 विमुक्तैर्, उ1 विमुक्त्यै (→विमुक्ता), द1 ईश्वा (→ईश्वरम्) –d) दे2 न1 सयोग (→स योग), दे1 परम स्मृत (→परमो मत)

१० –a) ब2 सहस्रशो वा, ब3 महस्रशो *, प्र2 सहस्रशोऽथ, उ1 सहस्रशोन्ये (→सहस्रशोऽथ), दे1 3 5 8 9 तै1 द1 प्र1 मुर्वे मुए, मुब बहुशो, दे6 भेवेद (→शतशो) –b) दे4 योगेश्वर° (→ये चेश्वर°), दे4 °कृत्त, दे6 °कृत (→°कृता) –c) दे8 8 नैते (→न ते), दे4 मामेव (→मामेक) –d) य1 मत, तै1 हित-, उ1 यत्र (→यत-), दे6 °गानसा (→°मानसा)

११ –c) दे8 समाधिश्च +समाधिना, दे9 समाधिना (→समाधिश्च) –d) उ1 थासन (→थासनम्), दे8 9 मुर्वे मुए मुब यमश्च नियमासने

अत्र परम् दे1 अधिकम्—
कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा । (= १४ad)

१२ का1 १२cd-१३ab ○ –a) दे1 ये च के, प्र2 मत्यक, उ1 द्वयेक (→मय्येक), ना1 द1 °चिनता, दे8 °चित्तया, दे8 9 °चित्ततां, प्र2 उ1 °चित्तता° (→°चित्तता°), दे1 योगे (→योगो) –b) ब2 दे4 5.9 द1 प्र2 उ1 मुब मुए, मत्यन्तर-, दे0 वृ(प्र)त्यन्तर-, तै1 प्रोत्यन्तर (→वृत्त्यन्तर-), ब3 -निरोधत, द1 प्र2 उ1 -निरोधन, दे8 9 मुर्वे मुए निरोधत (→-निरोधत), दे1 वृत्यनर निरोद्धत, दे2 वृत्येनर निरोधन, दे3 6 वृत्यन्तरनिरोधन, दे5 म1 वृत्यन्तरनिरोधक –c) दे4 द1 प्र2 म1 तत् साधनान्यष्टतस्तु, दे8 9 मुर्वे मुए तत्साधनानि चान्यानि, उ1 तत् साधनान्यथा तात –d) ब1-3 दे3 4 न1 वै (→तु), तै1 कथित मया (→कथितानि तु)

१३ का1 ab ○ (द्र १२ पा वि) –c) दे8 यम (→यमा), प्र2 सक्षेपिता (→संक्षेपतः), का1 प्रोक्तांश्चित्तता दा सा

१४ द1 १४-१७ ○ (द्र स) –a) का1 कर्मणा (→कर्मणा), दे2 ** (→वाचा) –c) प्र2 उ1 °वृत्तिदं (→°जनन), का1 ब1 दे1 4 8 9 न1 तै1 प्र2 म1 उ1 मुवे मुए मुब प्रोक्ता (→प्रोक्तं) –d) ब1 त्व हिंसा, दे8 त्व हिंसा (→त्वहिंसा)

१५ द1 ○ (द्र १४ पा वि), प्र2 उ1 cd ○ –a) दे1 8 9 अहिंसाया (→अहिंसायाः) –b) दे1 नास्त्यहिंसा, न1 नास्त्यहिंसात् (→नास्त्यहिंसा), प्र2 परमनोप, उ1 पर तप, (→पर सुखम्) –c) तै1 यो (→या), दे4 कृता हिंसा (→भवेद्धिंसा) –d) का1 दे2 5 तै1 म1 सा (दे5 स) त्वहिंसैव, दे4 न हिंसास्तैव दे8 यस्त्वेहिंसात्व- (→त्वहिंसैव प्र-)

१६ द1 ○ (द्र १४ पा वि) –b) ब3 सत्यधर्म, दे8 9 सर्वं सत्ये (→सत्ये सर्वं) –c) दे2 य*र्थ, दे3 यथात्मा, दे8 यथात्म- (→यथार्थ-) –d) का1 सत्ये (→सत्य)

१७ द1 ○ (द्र. १४ पा वि) –a) न1 परद्रव्या° (→परद्रव्या°), न1 °हरणम् (→°हरण) –b) दे1 मुवे मुए मुब यथ, दे9 चापि, + वाप्य- (→वाथ), तै1 बलेन (→बलेन), दे5 च (→वा), दे8 चौर्याद्वाद्यवा न वा –c) ब3 स्तेय तस्य, दे9 स्तेयस्तस्या-, न1 स्तेया तस्या-, तै1 स्तेय स्तस्या (→स्तेय तस्या) –c) ब1 °चरण, तै1 °वरण प2 म1 उ1 °चरणां (→°चरणात्) –d) ब1 धर्म° (→धर्म°)

कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा ।
सर्वत्र मैथुनत्यागं ब्रह्मचर्यं प्रचक्षते ॥१८
द्रव्याणामप्यनादानमापद्यपि यथेच्छया ।
अपरिग्रह इत्याहुस्तं प्रयत्नेन पालयेत् ॥१९
तपःस्वाध्यायसंतोषाः शौचमीश्वरपूजनम् ।
समासान्नियमाः प्रोक्ता योगसिद्धिप्रदायिनः ॥२०
उपवासपराकादिकृच्छ्रचान्द्रायणादिभिः ।
शरीरशोषणं प्राहुस्तापसास्तप उत्तमम् ॥२१
वेदान्तशतरुद्रीयप्रणवादिजपं बुधाः ।
सत्त्वशुद्धिकरं पुंसां स्वाध्यायं परिचक्षते ॥२२

स्वाध्यायस्य त्रयो भेदा वाचिकोपांशुमानसाः ।
उत्तरोत्तरवैशिष्ट्यं प्राहुर्वेदार्थवेदिनः ॥२३
यः शब्दबोधजननः परेषां शृण्वतां स्फुटम् ।
स्वाध्यायो वाचिकः प्रोक्त उपांशोरथ लक्षणम् ॥२४
ओष्ठयोः स्पन्दमात्रेण परस्याशब्दबोधकः ।
उपांशुरेष निर्दिष्टः साहस्रो वाचिकाज्जपः ॥२५
यत्पदाक्षरसङ्गत्या परिस्पन्दनवर्जितम् ।
चिन्तनं सर्वशब्दानां मानसं तं जपं विदुः ॥२६
यदृच्छालाभतो नित्यमलं पुंसो भवेदिति ।
या धीस्तामृषयः प्राहुः संतोषं सुखलक्षणम् ॥२७ कूर्म २.११.२७

१८ –a) दे3 6 सर्वभूतेषु (→सर्वावस्थासु) –c) का1 ब3 मैथुन, दे6 मैथुना(?) (→मैथुन-), म1 °त्यागो (→°त्याग)

१९ –b) का1 ब1 दे1 4 8 न1 द1 मुवें मुए मुब तथेच्छया, दे9 य (त)थेच्छया (→यथेच्छया). –c) का1 दे5 8 0 मुवें मुए मुब °ग्रह (→°ग्रह[ ]) –d) दे1 5 8 9 तत् (→तं), द1 ते य यत्नेन (→तं प्रयत्नेन), दे5 चालयेत, म1 वर्जयेत् (→पालयेत्)

२० –a) का1 उ1 मुवें मुए -सन्तोषौ, ब3 म1 सन्तोषा, दे1 4 5 8 9 तै1 सन्तोष, च1 ग्र2 सन्तोष (→-संतोषा) –b) का1 ऐश्वर्य°, दे1 9 ऐश्वर° (→ईश्वर°) –c) ब1 दे1 नियमा (→नियमाः), तै1 प्रोक्ता (→प्रोक्ताः) –d) न1 °शिद्धि, दे8 °शिद्ध (→°सिद्धि), तै1 ग्र2 °प्रदायका (→°प्रदायिन)

२१ –a) दे4 °प्रकारादि, न1 °परा केचित् (→°पराकादि) –b) दे1 कृच्छ्रचान्द्रा *** भि –d) दे9 -मुत्तमम् (→उत्तमम्), का1 तपसा वपमुत्तमम

२२ –a) दे3 वेध्य त° (→वेदान्त°), का1 ब3 दे8 9 °रुद्रीय (→°रुद्रीय-) –b) ब1 उ1 जप बुध, ब3 जप बुधा, दे1 जप बुधी, न1 जपेद्बुध (→जपं बुधाः) –c) का1 °शक्तिकर, दे1 8 9 मुवें मुए मुब °सिद्धिकर, दे4 °शुद्धिपर (→°शुद्धिकर), म1 सर्वशुद्धिकर पुसा,+चित्तशुद्धिकर पुसा –d) ब1 दे8 स्वाध्यायं (→स्वाध्याय)

२३ –a) दे2 स्वाध्यायेश्च (→स्वाध्यायस्य), उ1 भेदा,+भेदो (→भेदा) –b) तै1 वाचको° (→वाचिको°), दे4 °मानस (→°मानसा), दे8 वाचिकोऽशुपा मानसा –c) दे1 °वैशिष्य्या, दे4 °वैशिष्ट, दे5 मुए °वैशिष्य, म1 °वैपश्य, (→°वैशिष्ट्य) –d) दे3 न1 तै1 ग्र2 म1 °वादिन (→°वेदिन), दे8 °भेदानुवादिन (→°वेदार्थवेदिन)

२४ –a) दे1 न शब्द-, तै1 द1 यश्शब्दो (→य शब्द-), दे2 -जनना, दे4 द1 जनक, न1 -जनन (→-जनन), ग्र2 म1 गृह्यतो (°ह्णाति) यो विभागेन, उ1 उच्चैर्जपो वाचिकः स्यात् –b) म1 स्वय (→स्फुटम्) –c) दे3 वाचिक, दे1 ग्र2 वाचक (→वाचिक) –d) ग्र2 उपायोः (→उपांशोर्)

२५ तै1 २५b–२६a ⊙ –a) दे8 द1 ओष्ठ्यो (→ओष्ठयो), ब1 स्पर्श° (→स्पन्द°) –b) ग्र2 उ1 परस्याशब्द-दान, म1 परस्यावर (→परस्याशब्द-), दे1 8 9 म1 -बोधक, दे8 -बोधक (→ बोधक) –c) दे2 उपांशुरेषे, द1 उपांशुरधि-, ग्र2 उपांशोरथ उ1 उपांशुरद (→उपांशुरेष), उ1 निर्दिष्टा (→निर्दिष्[ ]) –d) ब3 सहस्र-, दे1 मुवें. मुए साऽवसो दे1 0 द1 ग्र2 उ1 सहस्रो (→साहस्रो), का1 वाचिकोऽज्जप, ब3 वाचिको जप, दे1 8 9 मुवें मुए वाचिकाज्जपात्, दे2 वाचिकान्तय, दे3 वाचकाज्जय, दे4 वाचिका जप, दे6 वाचका जप न1 वाचका जपात्, द1 ग्र2 उ1 वाचिकाद्‌पर, म1 वाचका परा (→वाचकाज्जप)

२६ तै1 a ⊙ (द्र २५ पा टि) –b) का1 ब1 3 दे3 3 8 °विवर्जित, ग्र2 °नर्वाजिता (→°नर्वाजितम्) –c) दे4 तै1 द1 ग्र2 म1 उ1 °वर्णानां, दे6 °सर्वाना (→°शब्दानां) –d) दे1 5 8 9 तै1 द1 ग्र2 म1 उ1 तज्जप विदु, न1 परिचक्षते (→तं जपं विदु)

२७ –a) दे1 4 यदिच्छा° (→यदृच्छा°); उ1 °• यदो (→°लाभतो), मुवें मुए वित्त (→नित्य) –b) दे5 पुंसा (→पुंसो), दे2 भवेदिति, दे4 द1 उ1 भवेद्यदा, तै1 भवेद्यदि, ग्र2 म1 लभेद्यदा (म1 °त) (→भवेदिति) –c) का1 तदेव,

वें. २.११.२८ बाह्यमाभ्यन्तरं शौचं द्विधा प्रोक्तं द्विजोत्तमाः ।
मृज्जलाभ्यां स्मृतं बाह्यं मनःशुद्धिरथान्तरम् ॥२८
स्तुतिस्मरणपूजाभिर्वाङ्मनःकायकर्मभिः ।
सुनिश्चला शिवे भक्तिरेतदीश्वरपूजनम् ॥२९
यमाः सनियमाः प्रोक्ताः प्राणायामं निबोधत ।
प्राणः स्वदेहजो वायुरायामस्तन्निरोधनम् ॥३०
उत्तमाधममध्यत्वात् त्रिधाऽयं प्रतिपादितः ।
स एव द्विविधः प्रोक्तः सगर्भोऽगर्भ एव च ॥३१
मात्राद्वादशको मन्दश्चतुर्विंशतिमात्रिकः ।
मध्यमः प्राणसंरोधः षट्त्रिंशन्मात्रिकोत्तमः ॥३२
अस्वेदकम्पनोत्थानजनकत्वं यथाक्रमम् ।
मन्दमध्यममुख्यानामानन्दादुत्तमोत्तमः ॥३३
सगर्भमाहुः सजपमगर्भं विजपं बुधाः ।
एतद् वै योगिनामुक्तं प्राणायामस्य लक्षणम् ॥३४
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते ॥३५

ब1 या धीरा, प2 3 दे1 6 या चेष्टा, दे3 4 0 मुबें मुए मुब प्राशस्त्य, दे5 या निष्टा, ता1 यमस्था (→या धीरता) –d) न1 प्र2 सन्तोष (→सन्तोष)

२८ –a) ब2 3 दे2 उ1 बाह्यमभ्यन्तर, दे1 बाह्यागाभ्यतर, प्र2 माह्यमाभ्यन्तर(?) (→बाह्यमाभ्यन्तर) –b) न1 प्रोक्ता, उ1 प्रोक्तो (→प्रोक्त), दे5 द्विजातय, दे6 द्विजालय (→द्विजोत्तमा) –c) दे4 जलभ्यां मृद्, द1 मृज्जालाभ्य (→मृज्जलाभ्यां), द1 प्र2 म1 उ1 वृत (→स्मृत) –d) न1 नम (→मन), दे3 6 शुद्धिम, दे1 म1 शुद्धिस् (→शुद्धिर्), दे1 म1 तथान्तरम् (→अथान्तरम्)

२९ –a) दे0 सुति, द1 स्थित (→स्तुति-), दे3 °पूजार्था, द1 °पूजार्थी, प्र2 °पूजाच(?), म1 °पूजा च, उ1 °पूजाभे (→°पूजाभिर्) –b) पा1 कर्मकायभि, ब1 वाक्-कायभि (→वाक्कर्मभि) –c) दे8 9 सुनिश्चिला (→सुनिश्चला), दे5 भवेद्, ते1 [श्र]मले (→शिवे) –d) का1 दे1 8 मुबें मुए मुब ईशस्य (→ईश्वर-)

३० दे1 cd ○ –a) प3 दे8 यमा सनियमा, दे1 4 8 9 ते1 द1 प्र2 म1 उ1 मुबें मुए मुब यमाश्च नियमा, दे5 नियमाश्च यमा (→यमाः स नियमा), का1 यमश्च नियम प्रोक्त –b) का1 प्राणायाम- ब1 प्राणायामं, म1 प्राणयाप (→प्राणायाम), दे1 निबोधन, दे6 निबोधता (→निबोधत) –c) का1 दे6 प्राण स्वदेह यो, दे8 9 म1 प्राणस्वदेहजो (म1 °ज), ते1 प्राणास्वदेहजो, प2 प्राणस्य देहजो, म1 प्राणश्च देहजो (→प्राण स्वदेहजो) –d) दे2 तत् निरो(रो)धनं, दे5 म1 तद् निबोधन, दे6 8 तु निबोधन, द1 तद् नियन्धन (→तन् निरोधनम्), दे8 आयामस्य निग्रह (+ प्राणायामनिबोधन(?)

३१. –a) का1 °गर्भ च, दे2 °मध्यादा, ते1 °मध्य(म)त्वात् (→°मध्यत्वात्) –b) प3 त्रिधाय (?), दे3 त्रिविध, प्र2 त्रिधाय, म1 दयाम (→त्रिधाऽय) –c) का1 दे1 मुबें मुए स (→प), ब2 द्वि॰ध (→द्विविध)

३२ –b) का1 ब1 दे1 2 6 8 9 न1 ते1 द1 प्र2 म1 मुबें मुए मुब मात्रक, दे1 मात्रका (→मात्रिक) –c) ते1 मध्यमप्राण°, प्र2 मध्य प्रणव° (→मध्यम प्राण°), का1 ब1 दे3 °सम्बोध, ते1 °सबोध (→°संरोध) –d) का1 दे3 षड्विशन् (→षट्त्रिंशन्), ब2 3 दे3 मुबें मुए मुब मात्रकोत्तक (दे3 °म), ते1 मात्रकित्तम, द1 प्र2 मात्रकोत्तम (→मात्रिकोत्तम)

अत्र पर दे1 अधिकम्—सगर्भोऽगर्भ एव च । (= ३१d)

३३ –a) दे1 8 मुबें मुए य, दे9 प्र +र (→प्र), दे4 °कम्पनोत्थान, दे8 °कम्पनोत्थान, प्र2 °कम्पोत्थान म1 °कम्पोत्थान, मुबें मुए °कम्पनोच्छ्वास (→°कम्पनोत्थान) –b) दे1 ज॰ मत्य, दे0 -जनकत्वे, प2 -जनकत्वा, मुबें मुए -जनकत्व (→-जनकत्वं) –c) का1 मदमध्यममुख्यान, दे1 8 मुबें मुए मथायदश्च (दे1 °ध्य) मुख्याना, प्र2 मद मध्यम मुख्यानां –d) ब1 आनन्दादुत्तमोत्तम, दे1 आनन्दाच्च ॰॰ तोत्तम, उ1 आनन्दा उत्तमोत्तम, दे4 8 ते1 द1 उ1 आन दाच्चोत्तमोत्तम, न1 आनदात्मोत्तमोत्तम, प्र2 आनन्द मोत्तमोत्तम, म1 मानन्दायुत्तमोत्तम

३४ –a) दे1 गुरुपाश्वेहित्वयोग, दे0 9 मुबें मुए मुब गुनराश्च हित्वा योग –b) का1 दे2 3 5 8 अगर्भ विजय बुध, प1 दे1 8 मुबें मुए गमर्भविजयबुधा, दे4 मगर्भविजयबुध, दे0 सगर्भसजप बुधा –c) प3 हि (→वै), दे1 8 9 मुबें मुए मुब प्राहु (→उक्त)

३५ –a) का1 सव्याहृति, दे2 सव्याहृति, म1 उ1 सव्याहृतीं (→सव्याहृतिं); दे5 सप्रणवा (→सप्रणवां) –c) का1 त्रिजपेत, म1 त्रि पठेत् (→त्रिर्जपेत्), ब1 मायतप्राण, प3 दे8 मायत प्राण, दे1 म1 ते1 उ1 मायत प्राण, ते1

रेचकः पूरकश्चैव प्राणायामोऽथ कुम्भकः ।
प्रोच्यते सर्वशास्त्रेषु योगिभिर्यतमानसैः ॥३६
रेचकोऽजस्रनिश्वासात् पूरकस्तन्निरोधतः ।
साम्येन संस्थितिर्या सा कुम्भकः परिगीयते ॥३७
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ।
निग्रहः प्रोच्यते सद्भिः प्रत्याहारस्तु सत्तमाः ॥३८
हृत्पुण्डरीके नाभ्यां वा मूर्ध्नि पर्वतमस्तके ।
एवमादिषु देशेषु धारणा चित्तबन्धनम् ॥३९
देशावस्थितिमालम्ब्य बुद्धेर्या वृत्तिसंततिः ।
वृत्त्यन्तरैरसंसृष्टा तद्ध्यानं सूरयो विदुः ॥४०
एकाकारः समाधिः स्याद् देशालम्बनवर्जितः ।
प्रत्ययो ह्यर्थमात्रेण योगसाधनमुत्तमम् ॥४१
धारणा द्वादशायामा ध्यानं द्वादश धारणाः ।
ध्यानं द्वादशकं यावत् समाधिरभिधीयते ॥४२
आसनं स्वस्तिकं प्रोक्तं पद्ममर्द्धासनं तथा ।
साधनानां च सर्वेषामेतत्साधनमुत्तमम् ॥४३
ऊर्वोरुपरि विप्रेन्द्राः कृत्वा पादतले उभे ।
समासीतात्मनः पद्ममेतदासनमुत्तमम् ॥४४ वे २ ११ ४४

प्रायते प्राण, म1 प्रायन प्राण (→प्रायतप्राण) –d) दे4 न1 ते1 श2 म1 उ1 प्राणायामोऽथ वा सव, दे1 8 9 मुवें मुए प्राणायामोऽथ मामत

३६ दे3 ३६c–३७c ○ (द्र म) –a) उ1 रेचक (→रेचक) –b) श1 य1 3 दे2 2 8 प्राणायामस्तु (→प्राणायामोऽथ), दे3 कुमका, न1 कुम्भक (→कुम्भकः) –c) द1 °शास्त्रे यो (→°शास्त्रेषु)

३७ दे2 abc ○ (द्र ३६ पा वि) ते1 ○ –a) का1 रेचको यत्र निश्वासात्, व2 रेचकोजस्रविश्वास, दे1 9 8 9 मुवें मुए मुव रेचको बाह्य निश्वास (दे3 मुव °सात्), दे4 रेचकोगस्रविश्वासात्, न1 रेचको ह्यस्वनिश्वासा उ1 रेचकोजस्रनिश्वासस्यात –b) न1 पूरकस्त द1 पूरकस्त्व-, म2 पूरकस्तु (→पूरकस्तन्), दे4 5 न1 व2 म1 उ1 निरोधक, दे8 निवोधत, दे8 मुव गुए निरोधन दे9 निरो-(बो)धन (→निरोधत) –c) का1 गस्य य2 यासौ व3 योसौ, दे5 योगात्, श2 या व उ1 या त (→या सा) –d) न1 कुम्भक (→कुम्भक)

३८ –a) द1 श2 विसरत (→विचरतां) –d) व3 प्रत्याहारास्तु, दे1 प्राणाहारस्तु (→प्रत्याहारस्तु), दे8 सत्तम न1 समगा, ते1 धारणा, श2 विसमा (→सत्तमा)

३९ ते1 ३९a ४१d ○, दे4 ३९a ४१b ○ –a) दे3 6 °पुण्डरीको (→°पुण्डरीके), दे5 नाभ्या वा, प2 नाविभ्या वा (→नाभ्यां वा) –b) व2 3 मुवें मुए मुव पवमु (→पर्वत-) –c) व1 देहेषु (→देशेषु) –d) म1 पारणा (→धारणा), दे1 चितवधने (?), दे8 चित्तवधन द1 चित्तबन्धना (→चित्तबन्धनम्)

४०. दे4 ते1 ○ (द्र ३६ पा वि) –a) व2 न1 देशावस्थित, द1 देवावस्थिति (→देशावस्थिति), दे6 देसावस्थिति मा तस्य –b) का1 बुद्धेर्या व3 द1 बुधैर्या, म1 बुद्धिर्या मुवें मुए उद्धर्ये या (→बुद्धेर्या), व2 बुद्धि° द1 वृत्त° (→वृत्ति°) –c) का1 वृत्यन्तरै न संसृष्टा, व3 वृत्यन्तरैरसंसृष्ट्वा, दे1 वृत्यन्तरैरसृष्टात्म, दे3 वृत्यन्तरैव संसृष्टा, दे8 वृत्यन्तरैव ससृष्ट्वा, दे8 प्रत्यन्तरैरसंसृष्टा, दे9 वृ (प्र)त्यन्तरैरसंसृष्टा, न1 वृत्यन्तरैरसंसृष्ट्वा, श2 वृत्यन्तरैसाराःसृष्टा, म1 वृत्यन्तरैरसंसृष्टा, मुवें मुए प्रत्यन्तरैरसृष्टा या

४१ वे1 ○ दे4 ab ○ (द्र ३९ पा वि) –a) दे8 समाधिस्या, म8 समाधीता (→समाधि स्यात्) –c) व2 ह्यनुमात्रेन दे4 ह्यर्थचात्मान, दे6 ह्यन्तमात्रेण, श2 ह्यर्थ चात्मान उ1 ह्यर्थ चात्मान (→ह्यर्थमात्रेण) द1 प्रत्याहारोऽथ चात्मान –d) व3 योग॰धन°, दे1 3 8 मुवें मुए मुव योगशास्त्र (दे2 3 °ध) न (→योगसाधन)

४२ –a) व1 ध्यामा (?), ते1 °यामो, उ1 °याग (→°यामा) –b) का1 दे6 ध्यान- (→ध्यान), का1 व1 दे1 3 4 5 9 ते1 धारणा, दे2 वारणा- दे8 धारण, द1 श2 म1 उ1 धारण (→धारणा) –c) का1 दे4 5 6 उ1 ध्यान (→ध्यान) –d) द1 श2 उ1 इति गीयते, म1 इति धीयते (→अभिधीयते)

४३ –a) दे2 आसने (→आसन) –b) व2 पद्ममूर्द्ध्या°, द1 श2 उ1 पद्मध्या° (→पद्ममर्द्धा°), ते1 पद्मासनमत परम् –c) दे1 साधनीना दे9 आसनानां साधनानां, न1 साधकाना (→साधनानां) –d) ते1 एतदासन° (→एतत्साधन°).

४४ दे4 ते1 ○ –a) व1 दे6 न1 विप्रेन्द्रा (→विप्रेन्द्राः). –b) व1 दे3 6 म1 शुभे (→उभे), न1 कृत्वोभिपादके शुभे (?) –c) का1 दे1-5 6 8 द1 श2 म1 मुवें मुए मुव समासीनात्मन, व1 समासीनात्मने, न1 समासीतस्य वा, उ1 समाधिनात्मन, (→समासीतात्मन).

वें २.१२.४६ एकं पादमथैकस्मिन् विन्यस्योरुणि सत्तमाः ।
आसीतार्द्धासनमिदं योगसाधनमुत्तमम् ॥४५
उभे कृत्वा पादतले जान्वोरन्तरेण हि ।
समासीतात्मनः प्रोक्तमासनं स्वस्तिकं परम् ॥४६
अदेशकाले योगस्य दर्शनं हि न विद्यते ।
अग्न्यभ्यासे जले वाऽपि शुष्कपर्णचये तथा ॥४७
जन्तुव्याप्ते श्मशाने च जीर्णगोष्ठे चतुष्पथे ।
सशब्दे सभये वाऽपि चैत्यवल्मीकसंचये ॥४८
अशुभे दुर्जनाक्रान्ते मशकादिसमन्विते ।
नाचरेद् देहबाधे वा दौर्मनस्यादिसंभवे ॥४९
सुगुप्ते सुशुभे देशे गुहायां पर्वतस्य तु ।
नद्यास्तीरे पुण्यदेशे देवतायतने तथा ॥५०
गृहे वा सुशुभे रम्ये विजने जन्तुवर्जिते ।
युञ्जीत योगी सततमात्मानं मत्परायणः ॥५१
नमस्कृत्य तु योगीन्द्रान् सशिष्यांश्च विनायकम् ।
गुरुं चैवाथ मां योगी युञ्जीत सुसमाहितः ॥५२

---

४५ दे189 म1 मुवें, मुग मुब पुस्तकेषु ४५-४६ श्लोकयोर्व्यत्यास ,द1 श्र2 उ1 ⊙. -a) का1 एवं (→एक), तै1 पाद तथै° (→पादमथै°) -b) का1 विन्यस्योरुणि, दे180 मुबें मुए विष्णुयोरसि (→विन्यस्योरुणि), दे2 सत्तम, दे4 सत्तमा (→सत्तमाः), तै1 विन्यस्योर्वाण सस्थित -c) का1 दे24089 मुवें मुए आसीनार्द्धा°, तै1 आसीतार्था°, म1 आसतार्द्धमा° (→आसीतार्द्धा°), व1 इति (→इद) -d) का1 योगासनमनुत्तमम्

४६ -a) व3 दे589 श्र2 म1 मुवें मुए मुब पातदले, दे3 तै1 उ1 पदतले, दे4 तु पादेन (→पादतले) -b) श्र2 उ1 ग्रन्तरेवहि (→अन्तरेण हि), दे8 जानुन्चारन्तरेण हि -c) व1 दे1388 द1 म1 मुवें मुए, समासीनात्मन , तै1 समाहितात्मन (→समासीतात्मन)

४७ -a) न1 आदेश-, श्र2 निदेशे (→अदेश-), उ1 °काल (→°काले), तै1 योगेऽप्य (→योगस्य), व3 आदेश-कालो योग्यस्य -b) दे45 तै1 मुवें मुए नहि, श्र2 हि स (→हि न) -c) दे1 अनभ्यासे, दे4 अग्नीभ्यास, दे8 श्र2 अन्याभ्यासे(श्र2 °शे), तै1 अस्याभ्यासे, द1 अग्रयाभ्यासे (→अग्न्यभ्यासे), व1 जले चापि, दे1 जलो वापि, न1 जलाभ्यासे (→जले वापि) -d) का1 श्र23 दे23 शुष्कपत्र-, उ1 शुष्कवर्ण-, दे6 शुक्लपर्ने, दे8 श्र2 मुवें मुए मुब शुक्लपर्ण-, न1 शुक्लपर्न-, व1 शुष्कपर्ण (→शुष्कपर्ण-), तै1 शुष्कपर्णमयेपि च.

४८ -a) का1 व्याप्त (→व्याप्ते), द1 म1 उ1 श्मशाने वा, श्र2 श्मशानान्ते (→श्मशाने च) -b) का1 जीर्णे गोष्ठ-, दे2 श्र3 जीर्णे गोष्ठे, तै1 जीर्णगोष्ठे, द1 जीर्णगोष्ठ- (→जीर्णगोष्ठे) -c) व1 दे18 मुवें मुए सचय, दे2 सतये(?), दे4 न1 समये, दे8 सन(भ) ये, श्र2 सभयो (→सभये), व1 दे5 चापि (→वापि) -d) उ1 चैत्य° (→चैत्य°), का1 °सचये, दे36 °राजये (→°सचये)

४९ का1 दे189 ४९c ५०b ⊙ -a) दे6 मशुभ (→अशुभे) -b) का1 दे0 मशकादि° (→मशकादि°), दे1 °समन्विता (→°समन्विते) -c) तै1 नारभेद्, श्र2 नाचारेद् (→नाचरेद्), न1 देश° (→देह°), तै1 द1 श्र2 उ1 °सबाधे दे4 °सवधे (→°बाधे वा)

अत परम् उ1 अधिकम्—

* एकपादमथैकस्मिन् विन्यस्योरुणसत्तमा ।
आसीतार्द्धासनमिद योगसाधनमुत्तमम् ॥ (=४५)

५० दे189 ab ⊙ (द्र ४९ पा टि) -a) का1 दे2 स्वगुप्ते सु-, दे4 सुगुप्तेषु (→सुगुप्ते सु-), दे6 सशुभशुभ देशे -b) श्र2 दे2 मुवें मुए मुब च (→तु), दे36 गुहाम्पर्वतमस्य तु -c) दे4 नदीतीरे (→नद्यास्तीरे) -d) व1 दे4 देवताय-तनेथवा

५१ -a) द1 श्र3 उ1 शुभे (→गृहे), म1 दे3489 वा शुशुभे, दे6 वाशुसुरे, श्र2 वाप शुभे (→वा सुशुभे), दे14589 न1 तै1 द1 श्र3 ग1 उ1 दशे (→रम्ये) -b) दे189 मुवें मुए मुब निर्जने (→विजने), उ1 °वर्जित (→°वर्जिते) -c) दे189 श्र2 मुवें मुए योग, द1 योग- (→योगी) -d) द1 श्र2 ग1 उ1 आत्मानो (→मात्मानं), व1 दे1389 न1 मुवें मुए यद्- (→मत्-), दे1 परायण ,+परा-यण (→परायण)

५२ -a) व1 नमस्कृत्य स, दे1589 न1 उ1 मुवें मुए नमस्कृत्याथ, दे4 तै1 द1 श्र2 नमस्कृत्वाथ (→नमस्कृत्य तु) -b) दे18 यशिष्यास्च, दे4 तै1 द1 श्र2 म1 उ1 तच्छिष्याश्च, मुवें मुए शिष्यास्तैव (→सशिष्यांश्च), श्र3 दे3 म1 विनायकान् (→विनायकम्) -c) श्र2 गुरु चैवाथ दे2 गुरु चैवेप, दे3 उ1 मुवें मुए मुब गुरुञ्चैव च (→गुरु चैवाथ), दे5 श्र2 मा योगी, द1 वा योगी (→मा योगी) -d) श्र2 युञ्जीतस्व, दे3 युञ्जीतसु (→युञ्जीत सु-).

आसनं स्वस्तिकं बद्ध्वा पद्ममर्द्धमथापि वा ।
नासिकाग्रे समां दृष्टिमीषदुन्मीलितेक्षणः ॥५३
कृत्वाऽथ निर्भयः शान्तस्त्यक्त्वा मायामयं जगत् ।
स्वात्मन्यवस्थितं देवं चिन्तयेत् परमेश्वरम् ॥५४
शिखाग्रे द्वादशाङ्गुल्ये कल्पयित्वाऽथ पङ्कजम् ।
धर्मकन्दसमुद्भूतं ज्ञाननालं सुशोभनम् ॥५५
ऐश्वर्याष्टदलं श्वेतं परं वैराग्यकर्णिकम् ।
चिन्तयेत् परमं कोशं कर्णिकायां हिरण्मयम् ॥५६
सर्वशक्तिमयं साक्षाद् यं प्राहुर्दिव्यमव्ययम् ।
ओंकारवाच्यमव्यक्तं रश्मिजालसमाकुलम् ॥५७
चिन्तयेत् तत्र विमलं परं ज्योतिर्यदक्षरम् ।
तस्मिन् ज्योतिषि विन्यस्य स्वात्मानं तदभेदतः ॥५८
ध्यायीताकाशमध्यस्थमीशं परमकारणम् ।
तदात्मा सर्वगो भूत्वा न किंचिदपि चिन्तयेत् ॥५९
एतद् गुह्यतमं ध्यानं ध्यानान्तरमथोच्यते ।
चिन्तयित्वा तु पूर्वोक्तं हृदये पद्ममुत्तमम् ॥६०
आत्मानमथ कर्त्तारं तत्रानलसमत्विषम् ।
मध्ये वह्निशिखाकारं पुरुषं पञ्चविंशकम् ॥६१
चिन्तयेत् परमात्मानं तन्मध्ये गगनं परम् ।
ओंकारबोधितं तत्त्वं शाश्वतं शिवमच्युतम् ॥६२
अव्यक्तं प्रकृतौ लीनं परं ज्योतिरनुत्तमम् ।
तदन्तः परमं तत्त्वमात्माधारं निरञ्जनम् ॥६३ बे २।११।६३

५३ –b) ते1 पद्मवार्ध° प्र2 पद्ममध्य° (→°द्ममर्ध°) –c) का1 ध1 3 दे2 3 5 प्र2 उ1 नासिकाग्र-, द1 नासिकाग्रेथ (→नासिकाग्रे), द1 प्र2 उ1 समादृष्टिर्, दे4 समादृष्टि (→समां दृष्टि) –d) दे9 °क्षण, + °क्षय (→°क्षणः)

५४ –a) दे4 त्यक्त्वाशो, ते1 द1 म1 त्यक्त्वाशो, प्र2 उ1 त्यक्त्वाथो (→कृत्वाथ) –b) का1 त्यक्त्वा, दे4 तत्तु (→त्यक्त्वा), प्र2 त्य + मा मयतज्जगत् –c) दे3 6 आत्मन्य°, दे5 स्वात्मना° (→स्वात्मन्य°), दे2 देव (→देवं) –d) ते1 परमेष्ठिनम् (→परमेश्वरम्).

५५ –a) दे5 शिवाग्रे, द1 शिरस्तो, उ1 शिरवाग्र (→शिखाग्रे), प्र2 द्वादशाङ्गुले, दे6 द्वादशागुल्य (→द्वादशाङ्गुल्ये) –b) दे4 ते1 प्र2 म1 उ1 कल्पयित्वा तु, द1 कल्पयित्वातु- (→कल्पयित्वाथ) –d) दे1 ज्ञातनाल, न1 ज्ञानानाल ते1 ज्ञाननाल-, मुवें मुए ज्ञानेनाल (→ज्ञाननाल)

५६ –a) प्र2 उ1 °दलोपेत (→°दल श्वेत), का1 ऐश्वर्या प्रदल स्वेत दे5 ऐश्वर्या पृथक् श्वेत –b) दे6 °धार्मिक, उ1 °कर्णक (→°कर्णिकम्) –c) व3 दे2 3 परम कोष, न1 ते1 परमाकाश, दे8 परम कोप (?) (→परमं कोशं) –d) ते1 कर्णिका च (→कर्णिकायां)

५७ –b) द1 स (→यं), ब1 विदम्, व3 इदम्, दे4 ते1 प्र2 उ1 देवम्, दे1 8 मुए दिवम्, दे5 द1 वेदम् (→दिव्यम्) –d) दे1 5 8 9 न1 ते1 द1 म1 उ1 मुवें मुए रश्मिज्वाला°, दे4 तस्मिन् ज्वाला°, प्र2 रश्मिमाला° (→रश्मिजाल°)

५८ –a) दे2 चिन्तयेत्वत्र (→चिन्तयेत्तत्र) –b) दे5 यदतर द1 प्र2 यमक्षय (→यदक्षरम्) –d) दे1 स्वात्मदमभेदत, दे5 स्वात्मानं तमभेद, दे3 6 स्वात्मान यदभेदत, दे8 स्वात्मान-दमभेदत, मुवें मुए स्वानन्द मम भेदत.

५९ –a) न1 3 प्र2 उ1 ध्यायिताकाश°, व2 ध्यायेत कोष°, दे1 8 मुवें मुए मुव ध्यायेतिकोश°, दे3 ध्यायता-काश°, न1 ध्यायेदाकाश° (→ध्यायीताकाश°) –c) प्र2 तदा तु, व1 तदेव (→तदात्मा), ते1 सर्वभूतात्मा (→सर्वगो भूत्वा) –d) व3 इति (→अपि)

६० –a) का1 दे1 8 द1 प्र2 म1 उ1 मुवें मुए मुव ज्ञान, दे9 ध्यान, + ज्ञान (→ध्यान) –d) प्र2 स्वस्तिक (→हृदये)

६१ ब1 ab ○ –a) दे1 8 मुवें मुए मुव कातार (→कर्त्तारं), दे1 कालानल° (→तत्रानल°), दे6 °समद्विष, न1 °समद्युति, ते1 °समन्वितम्, म1 °समप्रभ (→°समत्विष), का1 तन्नालातमधिष्ठित –d) दे5 मुख्य (?) (→पुरुषं)

६२ द1 प्र2 उ1 ab ○, दे5 ६२b ६३c ○ –b) का1 गहन, व3 गगण (→गगन) –c) का1 दे1 8 न1 °बाधित (→°बोधित), का1 चैव (→तत्त्व), प्र2 ओङ्कार बोलिकन्नत्व –d) का1 दे1 8 मुवें मुए उच्यते, न1 ते1 अव्यय (→अच्युत)

६३ दे5 abc ⊙ (द्र ६२ पा टि), ते1 cd ⊙ –a) न1 3 दे8 अनन्त, न1 अव्यक्त (→अव्यक्तं) –b) म1 ज्योति (→ज्योतिर्), व2 अनन्तर (→अनुत्तमम्) –c) दे4 सर्वत (→तदन्त), न1 सत परतर तत्त्व –d) दे2 म1 अनाधार, न1 आत्माराम (→आत्माधारं)

ई.२.११.६४ ध्यायीत तन्मयो नित्यमेकरूपं महेश्वरम् ।
विशोध्य सर्वतत्त्वानि प्रणवेनाथवा पुनः ॥६४
संस्थाप्य मयि चात्मानं निर्मले परमे पदे ।
प्लावयित्वात्मनो देहं तेनैव ज्ञानवारिणा ॥६५
मदात्मा मन्मयो भस्म गृहीत्वा ह्यग्निहोत्रजम् ।
तेनोद्धृत्य तु सर्वाङ्गमग्निरित्यादिमन्त्रतः ।
चिन्तयेत् स्वात्मनीशानं परं ज्योतिः स्वरूपिणम् ॥६६
एष पाशुपतो योगः पशुपाशविमुक्तये ।
सर्ववेदान्तसारोऽयमत्याश्रममिति श्रुतिः ॥६७

एतत् परतरं गुह्यं मत्सायुज्योपपादकम् ।
द्विजातीनां तु कथितं भक्तानां ब्रह्मचारिणाम् ॥६८
ब्रह्मचर्यमहिंसा च क्षमा शौचं तपो दमः ।
संतोषः सत्यमास्तिक्यं व्रताङ्गानि विशेषतः ॥६९
एकेनाप्यथ हीनेन व्रतमस्य तु लुप्यते ।
तस्मादात्मगुणोपेतो मद्व्रतं वोढुमर्हति ॥७०
वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवोऽनेन योगेन पूता मद्भावमागताः ॥७१

---

६४ न1 cd ○ –a) का1 ध्यायति, ब2 द1 ध्यायेत, ते1 ध्यायेत्तु (→ध्यायीत), का1 तन्मय, ब1 दे2 तन्मनो, ब2 3 दे3 6 तन्मना, ते1 तन्मने प्र2 त मयो (→तन्मयो) –b) दे4 एव (→एक) –c) ब3 विशोष्य (→विशोध्य) –d) का1 ब1 दे8 प्रणवेणाथवा, ते1 प्रभवेन सहा (?) (→प्रणवेनाथवा)

६५ –a) दे4 संस्थापयित्वा, मुए संस्थाप्यमपि (→संस्थाप्य मयि), का1 स्वात्मान (→चात्मान) –b) का1 न1 निर्मल, ते1 चिन्मये (→निर्मले), का1 परम पद दे5 परमे पद (→परमे पदे) –c) का1 पावयित्वात्मनो, ब1 प्लावयित्वात्मना, दे1 पावज्जिवात्मनो, ते1 शोधयित्वात्मनो (→प्लावयित्वात्मनो), दे8 देह (?) प्र2 देहे (→देहं) –d) का1 तनैवाज्ञान°, दे2 तेनैव** (→तेनैव ज्ञान°)

६६ –a) म1 तदात्मा (→मदात्मा), का1 दे1 3 8 9 मुबें मुए मुब मन्मना (→मन्मयो), प्र2 भस्म (→भस्म) –b) का1 दे3 9 ह्यग्निहोत्रक दे2 चाग्निहोत्रकं म1 चाग्निहोत्रज, मुबें त्वग्निहोत्रिकम् मुए त्वाग्निहोत्रिकम् (→ह्यग्निहोत्रजम्) –c) का1 दे1 3 4 8 9 ते1 द1 प्र2 उ1 मुबें मुए मुब तेनोद्धृत्य तु-, ब1 तवाधृत्यन्त, दे7 तेनाद्धृत्य तु-, दे5 म1 तेनाद्धृत्य तु, दे6 तेनोद्धृत्तं तु, न1 तेनाप्य* तु (→तेनोद्धृत्य तु) –d) का1 दे1 8 मुबें मुए मुब अग्निरादित्यमन्त्रत, ब1-2 अग्निरित्यादिमन्त्रकं, दे3 6 अग्निर्विद्यादिशात्मकं –e) का1 ब1 दे* स्वात्ममीशान, दे3 6 परमीशान (→स्वात्मनीशान) –f) द1 स्वरूपिणो (→स्वरूपिणम्)

६७ –a) द1 एषा (→एष) –b) दे1 पशुपाशरिव, दे8 पशुपाशादि-, न1 पशुपाशवि- (→पशुपाशवि-) –c) का1 दे1 8 मुबें मुए °मार्गोऽय (→°सारोय) –d) म1 3 दे1 3 ते1 अत्याश्रम-, दे4 मत्याश्रम, दे8 अत्वाश्रम-, उ1 मत्याश्रम, (→मत्याश्रम), ब1 दे5 6 प्र2 म1 श्रुत, दे3 श्रुतौ, दे9 श्रुते, ते1 स्मृत (→श्रुति).

६८ –a) ते1 परतम (→परतर) –b) का1 दे1 8 9 मुबें मुए मुब मत्सायुज्यप्रदायकम्, ब2 मत्सायुज्योपदायक, ब3 मत्सायुज्यो*पादकं, दे5 मत्सायुज्योपपातक, द1 प्र3 उ1 मत्सायुज्योपपा द(उ1 °त)न –c) ब1 3 दे2 3 6 द्विजातीनं (→द्विजातीनां) –d) दे4 प्र2 म1 उ1 ब्रह्मवादिनां (→ब्रह्मचारिणाम्)

६९ दे1 8 9 ६९d ७० a ○ (६ स) –b) दे3 क्षमा (→क्षमा), दे4 ब1 प्र2 म1 उ1 शान्तिस् (→शौच) –c) दे3 आस्तिक्ये (→आस्तिक्य)

७० दे1 8 9 a ○ (द्र ६९ पा टि) –a) का1 येन चैनाथ, ते1 एकेनात्यथ, द1 एतेनाप्यथ, प्र3 एकेनाप्यपि, उ1 एतेष्वेकेन (→एकेनाप्यथ), द1 भजेन (→हीनेन) –b) का1 व्रत तस्य (→व्रतमस्य), दे1 8 9 मुबें मुए न (→तु), ते1 म1 व्रतमप्यति (म1 °प) लुप्यते –c) न1 एतद्, ते1 आत्म (→आत्म), प्र2 चेत, द1 उ1 पेत (→पेतो) –d) ब2 मदुक्त, ब1 यदुक्त, ब3 पदुक्त, दे3 6 मद्वृत्त, दे4 सद्वृत, द1 प्र2 उ1 तद्व्रत (→मद्व्रत), का1 दे3 वोढुमर्हति ब1-3 दे2 वोढुमर्हति, ते1 सोढुमर्हति, द1 प्र2 वोढुमर्हथ उ1 कमर्तुर्हथ (→वोढुमर्हति)

७१ –a) दे1 क्रोध (→क्रोधा) –b) का1 दे1 मुबें मुए -मन्यया, ब3 दे1 मन्मयो, दे8 मन्माया (→मन्मया) –c) दे8 बभूवोनेन, ते1 बहवो ज्ञान- (→बहवोऽनेन), द1 प्र3 म1 उ1 बहवोज्ञानतपसा –d) दे1 8 9 मुबें मुए मुब °भावयोगता, दे4 °मावता गता, ते1 °भावभाविता (→°भावमागता)

ये यथा मा प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
ज्ञानयोगेन मां तस्माद् यजेत परमेश्वरम् ॥७२

अथवा भक्तियोगेन वैराग्येण परेण तु ।
चेतसा बोधयुक्तेन पूजयेन्मां सदा शुचिः ॥७३

सर्वकर्माणि संन्यस्य भिक्षाशी निष्परिग्रहः ।
प्राप्नोति मम सायुज्यं गुह्यमेतन्मयोदितम् ॥७४

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारो यो मद्भक्तः स मे प्रियः ॥७५

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनो बुद्धिर्यो मद्भक्तः स मे प्रियः ॥७६

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स हि मे प्रियः ॥७७

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी भक्तिमान् यः स मे प्रियः ॥७८

तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्मद्भक्तो मामुपैष्यति ॥७९

सर्वकर्माण्यपि सदा कुर्वाणो मत्परायणः ।
मत्प्रसादादवाप्नोति शाश्वतं परमं पदम् ॥८०

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।
निराशीर्निर्ममो भूत्वा मामेकं शरणं व्रजेत् ॥८१

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव तेन निबध्यते ॥८२

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति तत्पदम् ॥८३ वे.२.११

---

७२ –c) का$_1$ यथेत, दे$_1$ यज्येत, दे$_7$ यजेतत् दे$_4$ यजते, दे$_{3\,8}$ युज्येत, से$_1$ यजन्ते, उ$_1$ यतेत (→यजेत)

७३ –a) व$_3$ वर्षेव (→अथवा) –c) व$_1$ योग^0 (→बोध^0) –d) का$_1$ पूजयन् (→पूजयेत्)

७४ –b) दे$_1$ निष्प्रतिग्रह म$_2$ निष्प्रतिग्रह (→निष्परिग्रह) –c) का$_1$ प्राप्नोपि, न$_1$ मुवें प्राप्नोती (→प्राप्नोति) –d) व$_1$ गुह्यन्येतत् (→गुह्यमेतत्)

७५ द$_1$ म$_2$ ab ○, म$_1$, पुस्तके b,c चरणयोर्व्यत्यास –a) व$_1$ यद्वेष्टा, दे$_6$ मद्वेद्द (→अद्वेष्टा) –b) व$_1$ द$_1$ $_{69}$ उ$_1$ मुवें मुए मंत्री (→मैत्र), का$_1$ व$_3$ दे$_{1\,2\,6}$ न$_1$ म$_1$ करण (→करुण) –d) दे$_{15}$ मे भक्त (→मद्भक्तः)

७६ द$_1$ म$_2$ ७५–७८ ○ (द्र स), म$_1$ cd ○ –a) दे$_6$ स तस्य (→संतुष्ट), उ$_1$ सततो (→सततं), दे$_2$ योगो (→योगी) –d) व$_3$ दे$_{45}$ उ$_1$ मे भक्त, म$_1$ मद्भक्त (→मद्भक्त)

७७ द$_1$ म$_2$ ○ (द्र ७६ पा टि), द$_{1\,8\,9}$ ७७a–८०b ○, म$_1$ ab ○ –a) न$_1$ यमा नो (→यस्मान्नो), व$_1$ लोक, तै$_1$ लोका (→लोको) –c) का$_1$ हर्षशोक^0 (→हर्षामर्ष^0), दे$_1$ हर्षाहर्षभयोद्वेगैर् –d) व$_3$ दे$_3$ मुक्तो म, न$_1$ मुक्तो हि (→मुक्तो य), दे$_3$ तै$_1$ म$_1$ च (→हि)

७८ दे$_{1\,8\,9}$ व$_1$ म$_2$ ○ –a) व$_1$ दे$_3$ दक्ष (→दक्ष) –b) न$_1$ गतव्यथा (→गतव्यथ)

७९ दे$_{1\,8\,9}$ ○ –c) दे$_{2\,4\,6}$ अनिकेत- (→अनिकेत), न$_1$ ^{0}मति (→^{0}मतिर्) –d) का$_1$ दे$_{4\,6}$ न$_1$ द$_1$ म$_2$ म$_1$ उ$_1$ उपेष्यति (का$_1$ ^{0}ते) (→उपैष्यति)

८० दे$_{1\,8\,9}$ ab ○ –b) दे$_{3\,6}$ मध्यापाश्रय, दे$_1$ तत्परायण (→मत्परायण) –c) दे$_{1\,8}$ तत् (→मत्) –d) व$_{1\,3}$ दे$_{2\,3\,8}$ तत्परं पद, म$_1$ पदमव्ययम् (→परमं पदम्)

८१ –a) दे$_8$ चेत सार्वेरा (→चेतसा सर्व-), व$_3$ ^{0}कामानि (→^{0}कर्माणि) –b) दे$_{4\,6\,8\,9}$ द$_1$ म$_1$ संयस्य, म$_2$ विन्यस्य (→संन्यस्य), दे$_1$ तत्पर, उ$_1$ सत्पर (→मत्पर) –d) दे$_{3\,6}$ मामेव (→मामेक), दे$_5$ व्रज (→व्रजेत्)

८२ –a) दे$_{1\,8}$ त्यक्ता (→त्यक्त्वा), का$_1$ दे$_8$ ^{0}फल (→^{0}फला) –c) का$_1$ व$_{2\,3}$ दे$_{1\,5\,6\,9}$ द$_1$ म$_2$ उ$_1$ मुवें मुए मुव कमण्यपि, व$_1$ कर्मण्योऽपि, दे$_4$ कर्माण्यपि, दे$_9$ **** (→कर्मण्यभि) –d) दे$_6$ विवध्यते, तै$_1$ निरुध्यते द$_1$ म$_2$ उ$_1$ स बध्यते (→निबध्यते), दे$_{1\,8}$ मुवें मुए कमणा तेन बुध्यते, द$_1$ कर्मणा तेन ***, न$_1$ न च कर्मसु बध्यते

८३ –a) दे$_1$ म$_2$ निराशीर्यत^0, दे$_{8\,9}$ निराशीर्जित^0 (→निराशीर्यत^0) –b) दे$_8$ त्यक्त (→त्यक्त) –c) का$_1$ व$_2$ शरीर (→शारीर), दे$_3$ कवल (→केवल) –d) दे$_1$ तस्य हि, दे$_6$ तत्पद, + किल्विष, दे$_8$ तै$_1$ किल्विषं, म$_1$ उ$_1$ मत्पदम्, (→तत्पदम्).

कू.२.११.८४ यदृच्छालाभतुष्टस्य द्वन्द्वातीतस्य चैव हि ।
कुर्वतो मत्प्रसादार्थं कर्म संसारनाशनम् ॥८४
मन्मना मन्नमस्कारो मद्याजी मत्परायणः ।
मामुपैष्यति योगीशं ज्ञात्वा मां परमेश्वरम् ॥८५
मद्बुद्धयो मां सततं बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं मम सायुज्यमाप्नुयुः ॥८६
एवं नित्याभियुक्तानां मायेयं कर्मसान्वगम् ।
नाशयामि तमः कृत्स्नं ज्ञानदीपेन भास्वता ॥८७
मद्बुद्धयो मां सततं पूजयन्तीह ये जनाः ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥८८
येऽन्ये च कामभोगार्थं यजन्ते ह्यन्यदेवताः ।
तेषां तदन्तं विज्ञेयं देवतानुगतं फलम् ॥८९
ये चान्यदेवताभक्ताः पूजयन्तीह देवताः ।
मद्भावनासमायुक्ता मुच्यन्ते तेऽपि भावतः ॥९०
तस्मादनीश्वरानन्यांस्त्यक्त्वा देवानशेषतः ।
मामेव संश्रयेदीशं स याति परमं पदम् ॥९१
त्यक्त्वा पुत्रादिषु स्नेहं निःशोको निष्परिग्रहः ।
यजेच्चामरणाल्लिङ्गे विरक्तः परमेश्वरम् ॥९२

---

८४ ब1 ८४a-९४ d ⊙, दे1 ab ○ –a) दे4 5 8 9 न1 म1 मुवँ मुए, मुव °तुष्टस्य, दे6 °तुष्टस्य, ते1 व1 °सतुष्टो (→°तुष्टस्य). –b) ते1 द्वन्द्वातीतस्यदैव हि –c) दे6 उ1 कुर्वंते (→कुर्वतो), मुव -प्रसादार्थं (→-प्रसादार्थं).

८५ ब1 ⊙ (द्र ८४ पा वि) –a) दे1 मन्माना, ग्र2 मन्मनो (→मन्मना), दे6 मन्नमोतोरो (?) (→मन्नमस्कारो) –b) का1 दे8 मद्याजी, ते1 मद्धयाजी उ1 गद्याती (→मद्याजी), द1 °परायणा (→°परायण) –c) का1 दे4 6 न1 द1 ग्र2 म1 ड1 मामुपेष्यति, दे1 मामुपाश्यन्ति, दे8 9 मामुपास्यन्ति, मुवँ मुए मामुपास्यति (→मामुपैष्यति), का1 ब2 3 दे2 3 5 6 न1 ते1 मुवँ मुए मुब योगीशो, दे1 योगीशी, दे8 9 योगीशा (→योगीशं)

८६ ब1 ⊙ (द्र. ८४ पा वि), का1 दे6 ८६ ८७ ⊙, दे2 द1 ग्र2 उ1 ८६ ab ⊙ –a) दे1 8 9 गुवँ गुए मुव मामेवाहु पर ज्योतिर्, दे4 बुद्धयो (?)मा सतत –c) ते1 रात्र (→नित्य), न1 मय मन्तश्च मां नित्य, म3 भथयन्च ममन्तिश –d) न1 आप्नुयात् (→आप्नुयु), ते1 मत्सायुज्यमवाप्नुयु

८७ का1 ब1 दे6 ⊙, दे1 8 9 ८७b-८८ c ○ –a) दे4 एतन् (→एव) –b) ब2 मायेय कामामनुग, ब3 मुवँ मुए मुब मामेय, कर्मसात्वगम दे1 द1 ग्र2 म1 उ1 कुर्वता धर्मसारमय (ग्र2 °क), दे2 आणयकमसारमग(?), दे3 मामेव कर्मशानुग, दे5 मदीय कर्म कुर्वता, ग1 भजना प्रीतिपूर्वक, ते1 मयि कर्मसमाश्रये

८८ ब1 दे5 ○, दे1 8 9 abc ⊙, –b) दे4 पूजयतश्च, ग्र2 पुजयन्ति हि (→पूजयन्तीह), दे2 ते जना, द1 योऽस्सदा, ग्र3 उ1 ये सदा (→ये जना).

दे4 b, c मध्ये ८६c ८८b पुनिरुक्तदेशेणावृत्त —

८९ ब1 ⊙ (द्र ८४ पा वि), दे4 ८९c-९०d ○ –a) ब2 °भोगार्थं (→°भोगार्थं), दे4 ते1 द1 ग्र2 म1 उ1 मुव ये चान्ये कामभोगार्थं, दे1 8 9 मुवँ मुए ये चान्ये भोगकामार्थं –b) दे2 सर्व-, दे6 तस्य (→ह्यन्य-), दे8 देवता (→-देवता), का1 जप ते देवतान्तर –c) का1 दे2 5 न1 म1 तदन्तवर (दे2 °व)ज्ञेय, ब2 3 तेषान्तर ज्ञय, दे3 तदेव विज्ञेय, दे6 तु तदवज्ञेय, ते1 तत्तरज्ञेय, ग्र2 च तावत् ज्ञेय, उ1 तदक्षवतेय (→तदन्त विज्ञेय) –d) ग्र2 [अ]नुत्तम, उ1 [भा]राधने, (→[अ]नुगत)

९० ब1 दे4 ○ –a) दे5 9 द1 म1 उ1 मुवँ मुव ये चान्ये, ग1 येऽप्यन्य- (→ये चान्य-), दे1 भक्त्या, दे8 9 भक्ता (→भक्ता) –b) न1 भाविता (→देवता) –d) दे1 5 8 9 मुवँ मुए मुव मानवा, उ1 सस्मृते (→भावत), ते1 मुच्यते ते स्वभावत

९१ ब1 ⊙, दे1 8 ९१c ९३b ⊙ –a) का1 ब3 दे2 3 विश्वेश्वराद (ब3 दे3 °न) यास्, ब2 वि • श्वरान्यास द1 मनीश्वरस्त्वन्यास् (→अनीश्वरानन्यास्), दे1 5 6 8 9 ग्र2 गुवँ मुए मुब नस्मादिन (दे1 °ने)श्वरानन्यास् (ग्र2 °न्यान), न1 तस्मात्तेनीश्वराननास् –d) ते1 परमा गतिम् (→परम पदम्)

९२ न1 दे1 8 ○, दे9 ९२a-९३b ○ –a) दे6 त्यक्ता, न1 त्यक्त्वा (→त्यक्त्वा), का1 दे2 स्नेहाद, ब3 दे3 5 स्नेह, दे6 स्नेहा (→स्नेह) –b) ते1 द1 ग्र1 उ1 विशोको (ग्र2 °कि) (→नि शोको) –c) दे4 न1 ते1 द1 ग्र2 म1 उ1 आमरणात् (न1 म1 °णा) (→चामरणात्), ब2 3 दे4 5 ते1 द1 ग्र3 उ1 गुवँ मुए मुव लिङ्ग (→लिङ्गे)

येऽर्चयन्ति सदा लिङ्गं त्यक्त्वा भोगानशेषतः ।
एकेन जन्मना तेषां ददामि परमैश्वरम् ॥९३
परानन्दात्मकं लिङ्गं केवलं सन्निरञ्जनम् ।
ज्ञानात्मकं सर्वगतं योगिनां हृदि संस्थितम् ॥९४
ये चान्ये नियता भक्ता भावयित्वा विधानतः ।
यत्र क्वचन तल्लिङ्गमर्चयन्ति महेश्वरम् ॥९५
जले वा वह्निमध्ये वा व्योम्नि सूर्येऽथ वाऽन्यतः ।
रत्नादौ भावयित्वेशमर्चयेल्लिङ्गमैश्वरम् ॥९६
सर्वं लिङ्गमयं ह्येतत् सर्वं लिङ्गे प्रतिष्ठितम् ।
तस्माल्लिङ्गेऽर्चयेदीशं यत्र क्वचन शाश्वतम् ॥९७
अग्नौ क्रियावतामप्सु व्योम्नि सूर्ये मनीषिणाम् ।
काष्ठादिष्वेव मूर्खाणां हृदि लिङ्गं तु योगिनाम् ॥९८
यद्यनुत्पन्नविज्ञानो विरक्तः प्रीतिसंयुतः ।
यावज्जीवं जपेद् युक्तः प्रणवं ब्रह्मणो वपुः ॥९९
अथवा शतरुद्रीयं जपेदामरणाद् द्विजः ।
एकाकी यतचित्तात्मा स याति परमं पदम् ॥१००
वसेद् वामरणाद् विप्रो वाराणस्यां समाहितः ।
सोऽपीश्वरप्रसादेन याति तत् परमं पदम् ॥१०१ वे२ ११ १०२

---

९३ व1 दे4 O, दे180 ab O -a) म1 लिङ्गे (→लिङ्ग) -b) दे8 त्यक्ता (→त्यक्त्वा), न1 भोगान्यशेषत (→भोगानशेषत) -c) का1 एतन, द1 एकाने (→एकेन), प्र2 म1 मुक्ति (→तेषां) -d) द1 प्र2 म1 ददाति (→ददामि), का1 न1 ते1 द1 प्र2 म1 परमेश्वर (म1 °र), द1 8 9 मुवे मुए मुब परम पदम्, उ1 परमा गति (→परमैश्वर)

९४ व1 दे4 द1 प्र2 O. -a) दे1 8 9 परमात्मा सदा लिंग, दे3 परानन्दात्मक लिंग, न1 परनदा सदा लिंग, म1 परानन्दात्मीक लिंग, मुवे मुए मुब परात्मन सदा लिंग -b) का1 दे8 स निरजन दे1 8 9 मुवे मुए मुब रजतप्रभम् (→सन्निरञ्जनम्) -d) का1 व2 3 दे3 6 ते1 म1 हृदये स्थितम्, दे2 हृदयस्थितम (→हृदि संस्थितम्)

९५ व1 दे4 द1 प्र2, O, दे3 d O -a) व3 नियत (→नियता) दे1 ते1 भक्ता (→भक्ता) -b) दे5 अर्चयित्वा उ1 भावयुक्ता (→भावयित्वा) -c) दे6 यत्र (→यत्र) उ1 यत्र तत्कावन लिंग -d) दे6 समर्चयति (→मर्चयन्ति)

९६ दे2 द1 प्र2 O -b) व2 3 व्योम्नि सूर्येऽथवा पुन, दे1 8 9 मुवे मुए मुब व्योम्नि सूर्येऽथवान्यत दे6 न1 व्योम्नि सूर्यो (म1 °र्यो) यथान्यत, म1 यद्यो सूर्येथ वान्यत, उ1 सूर्ये वा व्योम्नि वान्यत -c) का1 वत्र यो व1 रत्नाद्ये दे1 3 दे8 रत्नाद्ये दे5 म1 उ1 रत्नाद्यैर्, म1 र नाद्ये (?) ते1 रत्नाद्या (→रत्नादौ), व2 3 भा(व3 भ)वयित्वैन (→भावयित्वेश) -d) व2 म1 प्रचंयत् (→प्रचंयेत्), दे1 8 9 ईश्वर (→ऐश्वर)

९७ द1 प्र2 O. -a) का1 व1 दे1-8 8 न1 म1 उ1 मुवे मुए मुब सर्व- (→सर्वं) -b) द1 सर्वं लिङ्ग-, व2 दे1 4 8 9 म1 सर्वलिंगे (→सर्वं लिङ्गे) -c) दे8 तस्मिलिंगे (→तस्माल्लिंगे) -d) व1 ह्यन्न (→यत्र)

९८ -a) व1 क्रियामतामप्सु (?), म1 क्रियावता मे स्यु (→क्रियावतामप्सु) -b) द1 सूर्य- (→सूर्ये), दे5 मनीषीभि (→मनीषिणाम्) -c) प्र2 कष्टादिष्वेव, उ1 काष्ठादिष्वे च (→काष्ठादिष्वेव), का1 दे4 मूर्खाना, दे2 मूर्खाना (→मूर्खाणां) -d) व3 लिङ्गस्तु, दे4 सर्गेषु, प्र2 लिंगे च, द1 म1 उ1 लिङ्गेषु (→लिङ्गं तु)

९९ दे8 ९९c १०१b O -a) व2 3 दे3 6 यद्युत्पन्न°, ते1 यदनुत्पन्न°, द1 ये ह्यनुत्पन्न° (→यद्यनुत्पन्न°), दे1 °विज्ञान ते1 °विज्ञान (→°विज्ञानो) -b) व3 दे5 विविक्त (→विरक्तः), द1 प्रति° (→प्रीति°) -c) व1 जपेद्युक्त व2 जपयुक्ता दे2 3 जपेत ते1 जपेदस्तु, प्र2 जपेद्युक्त (→जपयुक्त)

ते1 पुस्तके b c मध्ये अधिकम्—
४९ –a) दे1 मुवे मुए °तपो, दे10 °वतो (→°वयो), का1 ते1 ग्र2 बन्धु (→बन्धुर्) –b) द1 स्ववन, प2 म1 यस्य हि, उ1 यश्च हि (→पञ्चमम्) –c) दे1 मान्या, दे10 मान्य, ग्र2 मान्य (→मान्य-), दे4 पचाहु (→पञ्चाहु) –d) दे4 पूर्वपूर्वं, ते1 पूर्वपूर्वं (→पूर्वं पूर्वं), दे4 न1 ते1 गुरुत्तमान्, म1 गुरुर्नयात (→गुरूत्तरात्)

५० –a) का1 दे1 8-10 मुवे मुए एतानि, दे2 4 ते1 पचापि (→पञ्चानां), द1 ग्र2 उ1 सर्वेषु (→वर्णेषु) –b) का1 भूयांसो (→भूयांसि), प2 दे3 6 गुणवन्ति (→बलवन्ति) –c) ब1 यत्र, ब3 श्रुत (→यत्र), का1 यच्च स्युः सोऽत्तमा इयं, ते1 यत्र ** प्रमाणार्हः, द1 म1 उ1 पञ्चस्युर्गुणा (द1 °णो) गुणानार्हः, ब3 पञ्चाम्युत्तरोनुगतार्हो –d) दे1 ग्र2 म1 उ1 शूद्रो वा (→शूद्रोऽपि), म1 गता (→गतः), का1 शूद्रोऽपि दशमाद्गतः, ते1 शूद्रोऽपि दशमो मत.

५१. –a) द1 दयान्मार्गं, प2 उ1 पथ्यारदो (→पन्था देयो), प2 ब्राह्मणाय, ब3 का1 ***, उ1 ब्राह्मणाय (→ब्राह्मणाय) –b) दे2 मुव. स्त्रियै, दे10 स्त्रियो

भिक्षामाहृत्य शिष्टानां गृहेभ्यः प्रयतोऽन्वहम् ।
निवेद्य गुरवेऽश्नीयाद् वाग्यतस्तदनुज्ञया ॥५२
भवत्पूर्वं चरेद् भैक्ष्यमुपनीतो द्विजोत्तमः ।
भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥५३
मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् ।
भिक्षेत भिक्षां प्रथमं या चैनं न विमानयेत् ॥५४
सजातीयगृहेष्वेव सार्ववर्णिकमेव वा ।
भैक्ष्यस्य चरणं प्रोक्तं पतितादिषु वर्जितम् ॥५५
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ।
ब्रह्मचर्याहरेद् भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ॥५६
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत् ॥५७
सर्वं वा विचरेद् ग्रामं पूर्वोक्तानामसंभवे ।
नियम्य प्रयतो वाचं दिशस्त्वनवलोकयन् ॥५८
समाहृत्य तु तद् भैक्षं यावदर्थममायया ।
भुञ्जीत प्रयतो नित्यं वाग्यतोऽनन्यमानसः ॥५९ मे २ १२ ६०

(→स्त्रियै), म1 राज्ञे (→राज्ञे), ते1 चक्षुपान् (→चक्षुषे), प्र2 ******क्षुपो –c) प्र2 म1 उ1 भाव° (→भार°), का1 दे8 10 न1 द1 °भग्नाय, व2 °भक्ताय, दे1 ** म, दे4 °भूताय, प्र2 म1 उ1 °हीनाय (→°भुग्नाय), ते1 ०पधाय बहुभुग्नाय –d) दे1 रोर्जिर्णो, दे10 रोगिणो (→रोगिणे), का1 दुर्लभाय (→दुर्बलाय), ते1 रोगितेषुर्बलाय च

५२ –a) न1 शिक्षाना, + शिष्टाना, ते1 श्रिक्षाणा (→शिष्टाना) –b) द1 [प्र] य (→[प्र] हृय) –c) का1 दे1 थीसान्, ते1 रनीयाद् (→[श्र]श्नीयाद्) –d) व2 3 दे2 3 6 वाह्यतस्, ते1 वार्यतस्, प्र2 वाह्य * (→वाग्यतस्)

५३ –a) प्र3 भव (→भवत्), का1 व1 2 दे3 9 न1 द1 प्र2 भैक्ष, म1 भिक्ष (→भैक्ष्य) –b) दे1 10 ते1 उपवीत (ते1 °ती) (→उपनीता), दे8 10 प्र2 द्विजोत्तमा (दे8 °म) (→द्विजोत्तम) –c) दे8 मध्यात्तु (→मध्यं तु), दे10 राजान्यो ते1 राजा स्याद् (→राजन्यो) –d) का1 द1 वैश्यास् (→वैश्यस्), व1 उत्तर, म1 उत्तम (→उत्तर)

५४ –a) दे8 च (→वा), व1 *सार (→स्वसार), ते1 स्यातु यथा स्वसार च –b) म1 भ्रातुर (→मातुर्), व1 2 दे1 10 प्र2 भगिनी (→भगिनीं), व2 द्विजा, म1 द्विजा (→निजाम्) –c) दे10 भिक्षेत म1 *** (→भिक्षेत), दे1 भिक्षा, न1 ** द1 प्र2 म1 उ1 भैक्ष (→भिक्षा) दे8 प्रथमा (→प्रथमं) –d) दे1 यावत न, दे10 यश्चनेन ते1 यावेन न, प्र2 यावन्नेव, म1 याचा भैव, द1 उ1 यन्चनैनं (→या चैनं न) का1 याश्चैनं नावमानयेद् म1 या चैन नपि मानयेद् ते1 याचेत न विभूतये

५५ –a) व2 दे1 4 8 10 ते1 द1 म1 मुबॅ मुए मुए मुब स्वजातीय° (→सजातीय°), दे10 °गृहीषु (→°गृहेषु) –b) व2 3 दे2 6 च (→वा), द1 प्र2 उ1 मर्ववर्णक्रमेण वा, म1 मर्ववर्णक्मेव मा –c) व2 3 द1 म1 भैक्षस्या, दे3 भैक्षस्या, दे9 म1 मुए भैक्षस्य, उ1 भैक्ष्य स्या (→भैक्ष्यस्य), दे1 नित्य, मुबॅ, मुए मुब युक्त (→प्रोक्तं) –d) दे4 द1 प्र2 म1 उ1 वर्जयेद्, दे10 वर्जिता (→वर्जितं), का1 व1 3 दे2 3 6 न1 पतितादिविवर्जितम्

५६ –a) व1 देव° (→वेद°), ते1 वेदयज्ञान्वितानां तु, म1 वेदज्ञैरविहीनाना, द1 प्र2 उ1 वेदयज्ञैरभिन्नाना –b) व1 समस्ताना, दे1 8-10 मुबॅ मुए प्रपन्नाना, म1 विशिष्टाना (→प्रशस्ताना), दे1 4 न1 सु° (→स्व°) –c) दे1 8 10 मुबॅ मुए ब्रह्मचारी (→ब्रह्मचर्या-), दे1 4 8 9 भवेद् दे8 10 द1 चरेद् (→हरेद्), व3 दे1 3 4 8 10 उ1 मुबॅ मुब भैक्ष्य (→भैक्ष) –d) दे1 प्रायतो-न्वहं, दे8 प्रयतान्वहं, दे10 प्रयतोन्वहं, ते1 प्रीयतेस्वहम् (→प्रयतोऽन्वहम्)

५७ –a) दे4 भजेत (?) (→भिक्षेत), दे1 गुरो कुले न भिक्षेत –b) दे8 न + म दे9 म1 न1 य (→न), द1 ज्ञाति° (→ज्ञाति°) –c) दे4 मलाभेत्यन्य°, द1 म1 उ1 प्रभावेरवन्य° प्र3 प्रभावेत्यन्य° (→मनाभे त्वन्य°) –d) का1 पूर्वपूर्वं, प्र2 पूर्वंपूर्वं (→पूर्वं पूर्वं) प्र2 म1 विवर्जयेत् (→विवर्जयेत्)

अत पर प्र० पुस्तके ५६b–५८a यावत् श्लोका द्विरावृत्ता

५८ –a) दे3 4 8 न1 द1 चारि°, प्र2 वा चा°, उ1 चाचा° (→वा वि°), दे10 भाम (→ग्राम) –c) व3 ते1 निशम्य (→नियम्य) –d) दे4 दिशम्त्वा°, म1 दिशश्च°, ते1 द1 दिशश्चा° (→दिशस्त्व°), प्र2 दिशाश्च नवलोकयेत्

५९ दे1 8-10 ○, न1 cd ○ –a) का1 समाहरेत, व1 समाहृत्य, दे2 समाश्रुत्य, द1 स्वयमाहृत्य (→समाहृत्य), व3 दे3 4 8 ते1 म1 उ1 मुबॅ मुए मुब तद् भैक्ष्य (→तद् भैक्षं) –d) व1 दे10 यावदन्न, व2 3 मुबॅ, मुए मुब यावेदन्न, दे4 यावत्तत्र, प्र2 यावदर्थ (→यावदर्थं), का1 व1 दे3 °ममात्मया (→ममायया) –c) दे1 भुञ्जीत (→भुञ्जीत) –d) दे4 मानस (→°मानस), ते1 भाग्यतो भव्यमानस, उ1 द1 प्र2 वाग्यतो नान्यमानस.

वें२.१२६० भैक्ष्येण वर्त्तयेन्नित्यं नैकान्नादी भवेद् व्रती ।
भैक्ष्येण व्रतिनो वृत्तिरुपवाससमा स्मृता ॥६०
पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् ।
दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्वशः ॥६१
अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् ।
अपुण्यं लोकविद्विष्टं तस्मात् तत्परिवर्जयेत् ॥६२
प्राङ्मुखोऽन्नानि भुञ्जीत सूर्याभिमुख एव वा ।
नाद्यादुदङ्मुखो नित्यं विधिरेष सनातनः ॥६३
प्रक्षाल्य पाणिपादौ च भुञ्जानो द्विरुपस्पृशेत् ।
शुचौ देशे समासीनो भुक्त्वा च द्विरुपस्पृशेत् ॥६४

इति श्रीकूर्मपुराणे षट्साहस्र्यां संहितायामुपरिविभागे द्वादशोऽध्यायः ॥१२॥

६० दे1 8-10 ⊙ –a) ब1 भिक्ष्येण, ब2 दे4 न1 द1 भैक्षेण, ते1 तद् भैक्ष (→भैक्ष्येण); दे8 वर्त्तयेन् (?), द1 वर्तयन् (→वर्त्तयेन्) –b) दे4 नैका भोजी, न1 एकान्वेति (?), ते1 नैका माश्वी, ग्र2 नैवान्नादो, मुवें मुए मुब एकान्नादो (→नैकान्नादी), ते1 चरेत्, द1 भवद् (→भवेद्); ग1 नैकान्नादो भवेद्यती. –c) का1 ब1 2 दे2 4 न1 द1 भैक्षेण, ते1 भैक्षको (→भैक्ष्येण), का1 दे8 द1 म1 उ1 मुवें मुए. वृत्तिनो (→व्रतिनो) –d) का1 °सम (→°समा)

६१ दे1 8-10 ab ⊙. –b) दे2 मद्याच्चैतमकुत्सयन्, ते1 मद्याच्चैवप्यकुत्सयन्, ग्र2 मन्यदन्नमकुत्सयन्, द1 म1 उ1 मद्यादन्नमकुत्सयन् –c) दे10 द1 प्रसीदे च, ते1 प्रसिद्धे च (→प्रसीदेच्च) –d) ते1 प्रतिनन्देत्, द1 प्रतिनदे, ग्र2 प्रतिनन्देत् (→प्रतिनदेच्च), म1 सर्वदा (→सर्वशः). दे1 8-10 मुवें मुए मुब ततो भुञ्जीत वाग्यतः.

६२ –b) का1 ते1 प्रति-, दे8 द1 ग्र2 उ1 चापि, म1 अपि (→चाति-) –c) दे10 अपुण्य लोकयोर्द्विष्ट –d) दे4 प्रति° (→परि°), दे8 °वर्त्तयेत् (→°वर्ज्जयेत्)

६३ –a) दे1 प्राङ्मुखो (→प्राङ्मुखो), ब3 दे4 8 10 ग्र2 प्राङ्मुखो नाभि (दे8 °ति, दे10 °स्ति, ग्र2 °नु) भुञ्जीत, ते1 प्राङ्मुखानमोनी भुञ्जीत, उ1 प्राङ्मुखान्नन्तु भुञ्जीत –b) दे8-10 ग्र2 °मुखमेव (→°मुख एव), का1 दे4 8 च (→वा)

६४ का1 द1 cd ⊙ –a) द1 पाणिना, ब2 3 पाणौ-, दे4 पाणी (→पाणि-), द1 ग्र2 उ1 तु (→च) –b) दे1 भुञ्जानी (→भुंजानो), ते1 भुञ्जानो द्विरद ●● –c) दे10 देशो (→देशे) –d) दे4 भुक्तो, दे8 भुक्ता, दे10 भुक्ता (→भुक्त्वा), ग्र2 उ1 तु (→च), दे1 भुक्ता चाप्युपस्पृशेत्

पुष्पिका—

पुराणनाम—का1 इत्यादिमहापुराणे कौर्मे, ब1 इति कौर्मे उपरिभागे, ब2 दे3 इति कूर्मपुराणे, ब3 इत्यादिमहापुराणे कौर्मे उपरिभागे, दे1 इति श्रीकूर्मपुराणे उपरिभागे व्यासो (श्रोत्रयो स्पृष्टा), दे2 इत्यादिमहापुराणे षट्साहस्रया संहितायां कौर्मे, दे4 इति श्रीकूर्मपुराणे ईश्वरगीतासूपनिषत्सु, दे6 इति श्रीकूर्मपुराणे, दे8-10 इति श्रीकूर्मपुराणे उपरिभागे व्यासगीतासु, न1 इत्यादिमहापुराणे श्रीकौर्मे उपरिभागे, ते1 इति श्रीकूर्मपुराणे व्यासगीतायां, द1 इति श्रीकूर्मपुराणे उत्तरभागे, ग्र2 म1 इति श्रीकूर्मपुराणे उत्तरभागे व्यासगीतासूपनिषत्सु, उ1 इति श्रीकूर्मपुराणे उत्तरभागे व्यासगीतासु, मुवें इति श्रीकूर्मपुराणे उत्तरार्द्धे व्यासगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे, मुए. इति श्रीकूर्मपुराणे व्यासगीतासु मुब इति श्रीकौर्मे महापुराणे उपरिभागे अध्यायनाम—का1 ब1 3 दे1-4 6 8-10 न1 ते1 द1 ग्र2 म1 उ1 मुए ⊙, मुवें ऋषि व्याससंवादे, मुब. ब्रह्मविद्यायां ब्राह्मणानामुपनयनादिधर्मो नाम अध्यायसंख्या—ब2 दे1 6 ⊙, का1 एकादशोऽध्याय ॥११॥, ब1 एकादश, ब3 दे2 3 एकादशोऽध्याय, दे4 8-10 द1 ग्र2 म1 मुए द्वादशोऽध्याय, न1 एकषष्टितमोऽध्याय, ते1 त्रयोदशोऽध्याय, उ1 द्वादशोऽध्याय ॥घ॥, मुवें मुब द्वादशोऽध्यायः ॥१२॥

१३

व्यास उवाच ।❀

भुक्त्वा पीत्वा च सुप्त्वा च स्नात्वा रथ्योपसर्पणे ।
ओष्ठावलोमकौ स्पृष्ट्वा वासो विपरिधाय च ॥१
रेतोमूत्रपुरीषाणामुत्सर्गेऽयुक्तभाषणे ।
ष्ठीवित्वाऽध्ययनारम्भे कासश्वासागमे तथा ॥२
चत्वरं वा श्मशानं वा समाक्रम्य द्विजोत्तमः ।
सन्ध्ययोरुभयोस्तद्वदाचान्तोऽप्याचमेत् पुनः ॥३
चण्डालम्लेच्छसंभाषे स्त्रीशूद्रोच्छिष्टभाषणे ।
उच्छिष्टं पुरुषं स्पृष्ट्वा भोज्यं चापि तथाविधम् ।
आचामेदश्रुपाते वा लोहितस्य तथैव च ॥४
भोजने सन्ध्ययोः स्नात्वा पीत्वा मूत्रपुरीषयोः ।
आचान्तोऽप्याचमेत् सुप्त्वा सकृत्सकृदथान्यतः ॥५
अग्नेर्गवामथालम्भे स्पृष्ट्वा प्रयतमेव वा ।
स्त्रीणामथात्मनः स्पर्शे नीवीं वा परिधाय च ॥६
उपस्पृशेज्जलं वार्द्रं तृणं वा भूमिमेव वा ।
केशानां चात्मनः स्पर्शे वाससोऽक्षालितस्य च ॥७
अनुष्णाभिरफेनाभिरदुष्टाभिश्च धर्मतः ।
शौचेप्सुः सर्वदाचामेदासीनः प्रागुदङ्मुखः ॥८ वै २.११९

१३

❀ दे1 O, दे3 9 व्यास उ, म1 श्रीवेदव्यास, द1 म1 श्रीव्यास, प्र2 उ1 व्यास

१ -a) ते1 सृष्ट्वा,+सुप्त्वा (→सुप्त्वा) -b) य2 3 दे3 6 न1 रथ्याल° (→रथ्योप°) -c) दे1 4 दष्ट्वावलोमकौ, दे8 9 ते1 मुवें मुए मुव ओष्ठौ विलोमकौ (→ओष्ठावलोमकौ), दे8 ओष्ठावलोमकौ स्पृष्ट्वा दे10 उष्ट्रे सलोके स्पृष्ट्वा -d) व2 ग1 य3 म1 उ1 वासोऽपि (→वासो वि)

२ -a) दे3 6 चैव (→मूत्र) -b) दे3 4 6 द1 प्र2 स1 उ1 [अ]नृत° (→[अ]युक्त°), न1 उत्सर्गे शुक्तभाषणे -c) दे3 6 ष्ठीविका°, ते1 ष्ठिवित्वा°,+ष्ठीवित्वा°, म1 ष्ठीवत्वा° उ1 तथा चा° (→ष्ठीवित्वा°), द1 पष्ठी चिवाध्य नारम्भे प्र2 विद्याध्यान इमारम्भे -d) का1 दे2 काम, य2 दे0 काश (दे0 श) (→कास-) प्र2 °वासा° (→°श्वासा°)

३ -a) का1 दे6 न1 उ1 चत्वार, प्र2 सत्वर (→चत्वर) -b) दे4 8 9 10 द1 प्र2 उ1 मुवें मुए समागम्य, म1 समागत्य (→समाक्रम्य), व2 दे4 8-10 द्विजोत्तमा, दे3 द्विनोत्तम, दे8 द्विजोत्तम, द1 द्विजोत्तम (→द्विजोत्तम°) -c) दे3 चैव (→तद्वत्) -d) दे4 आचान्तो° (→आचान्तो°)

४ -a) का1 दे8 10 ते1 चाण्डाल° (→चण्डाल°) -b) दे4 °भोजने (→°भाषणे), -c) व2 उच्छिष्टे (→उच्छिष्टं), दे2 दे10 दृष्ट्वा (→स्पृष्ट्वा) -d) द1 प्र2 म1 उ1 वापि (→चापि), दे2 यथा° (→तथा°) -e) द1 आचमेद्, स2 आचरेद् (→आचामेद्), ते1 द1 प्र2 म1 च (→वा)

५ -a) द1 भोजये (→भोजने), व3 भोजने न च सन्ध्ययो . -b) व2 तथा, व3 स्नात्वा, दे8 10 मुवें मुए मुव त्यागे ते1 पीत्वा +त्यागे म1 कृत्वा (→पीत्वा) -c) व1 आचान्ते (→आचान्तो), का1 व2 3 दे2 वा°, य1 दे3 6 ह्या° (→[अ]प्या°) का1 दे3 सुत्वा, व3 पुत्र, दे4 स्पृष्ट्वा (→सुप्त्वा) -d) व1 द1 अथान्यथा, दे4 यथात्मन, दे8 9 मुवें मुए यथान्यत (→अथान्यत)

६ -a) प्र2 तथा° (→प्रथा°) -b) दे3 6 10 मुवें मुए मुव च (→वा) -c) का1 व1 3 दे2 3 6 स्त्रीणामथात्म-सस्पर्शे -d) व1 3 दे3 6 नीलां, व2 दे2 मीली (→नीवी), द1 प्र2 उ1 वि (→वा), प्र2 उ1 परिधाप्य (→परिधाय)

७ -a) प्र2 उपस्पर्शेद (→उपस्पृशेत्), का1 व1 दे3 4 म1 मुव चार्द्रं, य2 चाम, दे8-10 मुवें मुए चान्त, ग1 पाद, ते1 वाज्य द1 धीमान्, प्र2 सार्द्रं, उ1 शुद्ध (→वार्द्रं) -b) व2 मुव भूवम (→भूमिम्), दे1 6 9 मुवें मुए च (→वा) -c) दे3 6 म1 आत्मन (→चात्मन), दे8-10 ते1 द1 मुवें मुए स्पर्श (→स्पर्शे), न1 केशोमापद्मन स्पर्शे

८ -a) व1 अनुष्णा° (→अनुष्णा°), न1 अनष्टाभिर-फेनाभिर, म1 अनुष्णाभिरथार्णाभिर् -b) व1 दे8-10 अनुष्णाभिश्, मुवें मुए मुव विशुद्धाभिश् (→अदुष्टाभिश्), दे1 9 10 ते1 द1 प्र2 म1 सर्वत्र, दे3 मुवें मुए वाग्यत, उ1

[441]

वे २.१३.९ शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा ।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत् ॥९
सोपानत्को जलस्थो वा नोष्णीषी चाचमेद् बुधः ।
न चैव वर्षधाराभिर्न तिष्ठन् नोद्धृतोदकैः ॥१०
नैकहस्तार्पितजलैर्विना सूत्रेण वा पुनः ।
न पादुकासनस्थो वा बहिर्जानुरथापि वा ॥११
न जल्पन् न हसन् प्रेक्षन् शयानः प्रह्व एव च ।
नावीक्षिताभिः फेनाद्यैरुपेताभिरथापि वा ॥१२
शूद्राशुचिकरोन्मुक्तैर्न क्षाराभिस्तथैव च ।
न चैवाङ्गुलिभिः शब्दं न कुर्वन् नान्यमानसः ॥१३
न वर्णरसदुष्टाभिर्न चैव प्रदरोदकैः ।
न पाणिक्षुभिताभिर्वा न बहिष्कक्ष एव वा ॥१४
हृद्गाभिः पूयते विप्रः कण्ठ्याभिः क्षत्रियः शुचिः ।
प्राशिताभिस्तथा वैश्यः स्त्रीशूद्रौ स्पर्शतोऽन्ततः ॥१५
अङ्गुष्ठमूलान्तरतो रेखायां ब्राह्ममुच्यते ।
अन्तराङ्गुष्ठदेशिन्योः पितॄणां तीर्थमुत्तमम् ॥१६
कनिष्ठामूलतः पश्चात् प्राजापत्यं प्रचक्षते ।
अङ्गुल्यग्रे स्मृतं दैवं तद्देवार्षं प्रकीर्त्तितम् ॥१७

सम्मत (→घर्मत) –c) द1 ग्र2 म1 प्रक्लिस्तु, उ1 प्राभिस्तु (→शौचिष्णु)

९ –a) ग्र2 प्रावृत्य (→प्रावृत्य), द1 ग्र2 म1 उ1 कर्णं (उ1 °र्णं) (→कण्ठ) –b) दे8 शुक्ल- (→मुक्त-), का1 व1-3 दे3 3 6 -केश° (→-कच्छ°), दे4 च (→वा) –d) का1 तु, व2 3 दे2 न, दे6 [प्र]य (→[प्र]प्य-)

१० –b) का1 व2 3 दे7 8 9 मुबं मुए मुब चा° (→वा°), दे10 प्रष्णीषोऽप्यमेद्बुध, उ1 शोष्णीषो नाचमेद् बुध, –c) दे4 धर्म° (→वर्ष°). –d) व1 दे3 6 म1 उ1 न तिष्ठन् धृतोदकैः, दे2 ग्र2 तै1 नतिष्ठस्तु धृतोदकं, दे8-10 मुबं. मुए. मुब हस्तोच्छिष्टे तथा बुध

११ –a) तै1 उ1 °जले (→°जलैर्), का1 नैकमुच्छा-पितजलैर् –b) तै1 मन्त्राणि (→सूत्रेण). –d) का1 व1.2 बहिर्जानुरथोऽपि वा, दे8 9 मुबं. मुए मुब बहिर्जानुकरोऽपि वा, म1 बहिर्जानुरेव च

१२. दे8 9 मुबं. मुए. ⊙ –a) दे1 भोजन्, दे4 नेक्षन्, दे1 तृप्यन् (→प्रेक्षन्) –b) दे4 सुवाश (→शयानं), दे3 भुक्त, उ1 प्रत्य (→प्रह्व), दे4 वा (→च), दे10 सयस्नास्टमेव वा –c) व2 नावीक्षितश्च, दे3 नानीक्षिताभि, तै1 न दूषिताभि द1 न वीक्षिताभि, मुब नावीक्षितश्च (→नावीक्षिताभि), का1 ग्र3 म1 उ1 फेनाभि (→फेनाद्यै) –d) ग्र2 म1 उ1 सफेनाभिरथापि वा.

१३ का1 ⊙ –a) तै1 शुद्ध शुचि° (→शूद्राशुचि°), दे4 द1 म1 उ1 °करैर्मुक्तैर, ग्र2 °करामुक्तैर् (→°करोन्मुक्तैर्), दे8 9 मुबं मुए विट्शूद्रादिकरामुक्तैर्, दे10 विट शूद्रादिकैर्मुक्तैर् –b) दे8-10 मुबं मुए. मुब न चोच्छिष्टैस्तथैव च, तै1 भक्षराभिस्तथैव च. –c) दे3 8-10 मुबं मुए मुब शस्त, दे4 शब्दे (→शब्द), दे8 न चैवाङ्गुलिभि शाब्दं –d) व1-3 दे2 मुब न कुर्यात्, दे8 10 मुबं मुए प्रकुर्वन् (→न कुर्वन्), दे8-10 मुबं मुए अन्यमानस (→नान्यमानस)

१४ का1 ⊙. –a) दे4 °क्रुष्टानि (→°दुष्टाभिर्) –b) ग्र2 प्रतरो°, उ1 प्रसरो° (→प्रदरो°), दे4 8-10 मुबं मुए मुब न चैव प्रचु (दे4 °व) रोदकैः –c) व3 °क्षुभिताभिर्, दे6 °भक्षिताभिर्, दे8 °मुक्तिताभिर् (→°क्षुभिताभिर्), दे10 च (→वा) –d) दे3 6 व2 बहि कर्म, तै1 बहि कच्छ, ग्र2 बहिकक्ष्य (→बहि कक्ष), दे3 6 बहिताभिरथापि वा.

१५ –a) म1 दे8 हृदाभि, द1 हृद्गतं, ग्र2 म1 हृद्याभि (→हृद्गाभि), न1 हृद्गताभि शुचिर्विप्र –b) का1 कदाचिद्भू, दे4 6 कण्ठाभि (→कण्ठ्याभि), म1 कण्ठगाभि शुचिर्नृप, तै1 कण्ठगाभिस्तु क्षत्रिय –c) दे4 पाचिताभि, तै1 वक्त्रगाभि (→प्राशिताभि) –d) तै1 °शूद्रा, द1 ग्र2 °शूद्रै, म1 °शूद्र- (→°शूद्रौ), दे4 तै1 म1 स्पर्शनात्तत, दे6 द1 उ1 स्पर्शनं तथा, दे8-10 मुबं मुए मुब स्पर्शतोऽम्भस, ग्र2 स्पर्शनं तत (→स्पर्शतोऽन्तत)

१६ –a) का1 ग्र2 अङ्गुष्ठमूलोत्तरतो, व1 अङ्गुष्ठपर्वाभागे, दे2 8 10 मुबं मुए मुब अङ्गुष्ठमूल(दे10 °ले)रेखाया, दे6 अङ्गुष्ठतलान्तरतो, तै1 अङ्गुष्ठमूलान्तरितं, म1 अङ्गुष्ठ-मूलान्तरगो. –b) व1 दे2 6 द1 ग्र2 ब्रह्म (→ब्राह्म), दे8 10 मुबं. मुए मुब -प्रोच्यते (→उच्यते) –c) दे8 10 मुबं मुए प्रदेशिन्याश्च य-मूल. –d) द1 उत्तम, म1 उच्यते (→उत्तमम्) दे8-10 मुबं. मुए मुब पितृतीर्थमनुत्तमम्

१७ –a) तै1 अङ्गुष्ठमूलतरेखाय –b) व1 प्रचक्षते (→प्रचक्षते) –c) दे8 अङ्गुल्यायाग्रे, दे10 अङ्गुल्यग्र- (→अङ्गुल्यग्रे), व1 2 न1 उ1 स्मृत देव, दे10 स्मृत दिव्य, द1 स्थित तीर्थं (→स्मृतं दैवं). –d) दे8-10 मुबं. मुए. मुब. तद्देवार्षं (दे10 °र्ष), द1 ग्र2 उ1 तथैवार्षं (→[illegible]देवा म1 प्रचक्षते (→प्रकीर्त्तितम्), व1 देवर्षिविप्रकीर्तितम्

मूले वा दैवमार्षं स्यादाग्नेयं मध्यतः स्मृतं ।
तदेव सौमिकं तीर्थमेतज्ज्ञात्वा न मुह्यति ॥१८
ब्राह्मेणैव तु तीर्थेन द्विजो नित्यमुपस्पृशेत् ।
कायेन वाऽथ दैवेन न तु पित्र्येण वै द्विजाः ॥१९
त्रिः प्राश्नीयादपः पूर्वं ब्राह्मणः प्रयतस्ततः ।
संमृज्याङ्गुष्ठमूलेन मुखं वै समुपस्पृशेत् ॥२०
अङ्गुष्ठानामिकाभ्यां तु स्पृशेन्नेत्रद्वयं ततः ।
तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वयम् ॥२१
कनिष्ठाङ्गुष्ठयोगेन श्रवणे समुपस्पृशेत् ।
सर्वासामथयोगेन हृदयं तु तलेन वा ।
संस्पृशेद् वा शिरस्तद्वदङ्गुष्ठेनाथवा द्वयम् ॥२२

त्रिःप्राश्नीयाद् यदम्भस्तु सुप्रीतास्तेन देवताः ।
ब्रह्मा विष्णुर्महेशश्च भवन्तीत्यनुशुश्रुमः ॥२३
गङ्गा च यमुना चैव प्रीयेते परिमार्जनात् ।
संस्पृष्टयोर्लोचनयोः प्रीयेते शशिभास्करौ ॥२४
नासत्यदस्रौ प्रीयेते स्पृष्टे नासापुटद्वये ।
कर्णयोः स्पृष्टयोस्तद्वत् प्रीयेते चानिलानलौ ॥२५
संस्पृष्टे हृदये चास्य प्रीयन्ते सर्वदेवताः ।
मूर्ध्नि संस्पर्शनादेकः प्रीतः स पुरुषो भवेत् ॥२६
नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गं नयन्ति याः ।
दन्तवद् दन्तलग्नेषु जिह्वास्पर्शेऽशुचिर्भवेत् ॥२७ ब्र.१.१३.२७

---

१८ -a) दे4 ते1 मूल, नं1 म1 मूल- (→मूले), द1 प्र2 म1 उ1 स्याद् (→वा), दे8-10 मुवं मुए, आदिष्ट (→मार्षं स्यात्) -b) न1 मध्यमस्थित (→मध्यत स्मृत). -c) का1 तदैव, प्र3 म1 तदेतत् (→तदेव), दे10 सोमिक (→सौमिक). -d) दे8-10 मुवं मुए मुघ. एव (→एतद्)

१९ प्र2 १९c-२०d ⊙ -a) ब1 दे4 प्र2 उ1 ब्राह्मणेनैव (→ब्राह्मेणैव तु) -c) दे3 4 उ1 चाथ, म1 [श]थ च (→वाथ) -c) म1 उ1 पित्र्येण (→दैवेन) -d) ब2 3 दे4 मुत्र पै (दे4 पि)त्रेण, द1 उ1 दैवेन (→पित्र्येण), दे4 उ1 वा (→वै), दे8 10 मुवं मुए चाथाचान्ते शुचिर्भवेत्, ते1 दद्यात् पैत्र्येण वा द्विजा

२० प्र2 ⊙. -a) दे8-10 मुवं मुए मुव विराचामेदपः पूर्वं -b) ब2 3 न1 ते1 म1 ब्राह्मेण (→ब्राह्मण), दे9 स्वयत (→प्रयत), ते1 स्थित उ1 स्मृत (→मत) -c) ब1 दे4 5 8-10 ते1 म1 उ1 मुवं मुए मुव सकृनाङ्गुष्ठ°, प्र2 म1 सकृत्वा (न1 °त्य)ङ्गुष्ठ°, दे6 सपृष्ठाङ्गुष्ठ° (→समृज्याङ्गु°), दे3 समृज्याङ्गुलिमूलेन -d) दे6 मुखं (→मुखं), द1 चैव (→वै स-)

२१ द1 ⊙, दे4 २१d-२२a ⊙ (६ स) -a) दे3 मङ्गुला° (→मङ्गुष्ठा°) -b) ते1 पुन (→तन) -d) न1 म1 स्पृशन् (→स्पृशेत्)

२२ द1 ab ⊙, दे4 a ⊙ -a) उ1 कनिष्ठिकाङ्गुष्ठयोगेन -c) दे3 4 6 सर्वेषां (→सर्वासां), द1 प्र2 म1 उ1 एव (→मथ), दे8-10 मुवं मुए मुव सर्वाङ्गुलीभिर्वाऽपि च -d) दे3 4 6 दे2 वै (→वा) -e) द1 म1 उ1 वै (→वा), ब3 दे3 6 स्पृशेद्वै शिरसस्तद्वद्, दे8-10 मुवं मुए, मुव मार्गि शिरस्व सर्वाभिर्, न1 स्पृशे द्वेशिरसौ तद्वद्, ते1 संस्पृशेद्वै शिरस्तेन, प्र2 संस्पर्शे द्वे शिरस्तद्वद् -f) ते1 अङ्गुष्ठानामिकाद्वय.

२३ -a) मुवं मुए तद° (→यद°), उ1 यदन्तास् (→यदम्भस्), दे3 6 त्रि प्राश्नीयामुदम्भस्तु, प्र2 त्रि प्राश्नीयादन्तरस्तु -b) का1 ब1-3 दे2-4 6 द1 प्र2 म1 उ1 प्रीतास्ते नास्य देवता, ते1 प्रीता स्पृष्टेन देवता -c) का1 ब1 दे10 न1 ब्रह्मविष्णुमहेशाश्च -d) का1 ब3 दे8 8-10 न1 ते1 मुवं. मुए मुव °शुश्रुम (→°शुश्रुम)

२४ ब2 २४d २५b ⊙ -ab) प्र2 गङ्गायमुनयार्देव प्रीयते परिमार्जनात् -c) उ1 संस्पर्शान्लोचनयो. -d) म1 चन्द्र° (→शशि°)

२५ दे1 ab ⊙, ब2 ○ -a) द1 प्र3 म1 उ1 °दस्रौ (→°दस्रौ) -b) का1 द1 न1 म1 पृष्टे, ब3 स्पर्शे (→स्पृष्टे) -c) दे8-10 मुव मुए मुव. थाश्रयो (→कर्णयो), दे9 थव, म1 तावद् (→तद्वत्) -d) दे1 प्रीयते चानलानिलौ.

अत पर दे2 अधिकम्—

*संस्पृष्टे हृदये चास्य प्रीयेते चानिलानलौ' ।

(= २६ab)

२६. ब2 ⊙ -a) दे1 संस्पृष्ट-(→संस्पृष्टे), का1 दे1 8 9 मुवं मुए. मुव यास्य (→चास्य). -c) दे1 4 8-10 प्र2 म1 उ1 मुवं मुए मुव एव, ते1 द1 देव (→एक) -d) दे1 4 8-10 न1 ते1 प्र2 म1 उ1 मुवं मुए मुव तु (→स); दे3 प्रीत स पुरुषोत्तम

२७ ब2 ○ -a) द1 कुर्वतो, प्र2 कुर्वते (→कुर्वते), का1 दे1 8-10 मुवं मुए. नित्य, ते1 मुखाद्, प्र3 मुख्य- (→मुख्या) -b) दे3 यजन्ति (→नयन्ति), का1 विप्रुषो वै

ब २.१३.२८ स्पृशन्ति बिन्दवः पादौ य आचामयतः परान् ।
भूमिकास्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥२८
मधुपर्के च सोमे च ताम्बूलस्य च भक्षणे ।
फलमूले चेक्षुदण्डे न दोषं प्राह वै मनुः ॥२९
प्रचरंश्चान्नपानेषु द्रव्यहस्तो भवेन्नरः ।
भूमौ निक्षिप्य तद् द्रव्यमाचम्याभ्युक्षयेत् तु तत् ॥३०
तैजसं वै समादाय यद्युच्छिष्टो भवेद् द्विजः ।
भूमौ निक्षिप्य तद् द्रव्यमाचम्याभ्युक्षयेत् तु तत् ॥३१
यद्यमत्रं समादाय भवेदुच्छेषणान्वितः ।
अनिधायैव तद् द्रव्यमाचान्तः शुचितामियात् ।
वस्त्रादिषु विकल्पः स्यात् तत्संस्पृष्ट्वाचमेदिह ॥३२
अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि ।
कृत्वा मूत्रं पुरीषं वा द्रव्यहस्तो न दुष्यति ॥३३
निधाय दक्षिणे कर्णे ब्रह्मसूत्रमुदङ्मुखः ।
अह्नि कुर्याच्छकृन्मूत्रं रात्रौ चेद् दक्षिणामुखः ॥३४
अन्तर्धाय महीं काष्ठैः पत्रैर्लोष्ठतृणेन वा ।
प्रावृत्य च शिरः कुर्याद् विण्मूत्रस्य विसर्जनम् ॥३५
छायाकूपनदीगोष्ठचैत्याम्भःपथि भस्मसु ।
अग्नौ चैव श्मशाने च विण्मूत्रे न समाचरेत् ॥३६

पतन्ति या, तै1 विप्रुषो निपतन्ति याः, द1 विप्रुषोदतन्निगीर्यंत, प्र2 म1 विप्रुषोऽङ्ग न संस्पृशेत, उ1 विपृष्टो चान्न य व्यथा –c) तै1 °लग्ने तु (→°लग्नेषु), का1 दे9 10 मुवें. मुए दन्तान्तर्दं-तलग्नेषु –d) का1 दे8-10 मुवें. मुए जिह्वोष्ठैरशुचिर्भवेत्.

२८. ब2 ⊙ –a) व1 दे4 9 पाषा (→पादौ) –b) म1 माचामयते (→आचामयत), दे4 पर (→परान्), न1 य आचामे तत परान् –c) दे1 8-10 न1 भूमिकैस्, उ1 भूमिजैस्, मुवे मुए मुव भूमिकास् (→भूमिगॆस्), ब3 उ1 मुव तै, न1 तु (→तैः)

२९ ब2 ⊙ –c) दे6 न1 द1 मुवें मुए. मुव फले (→फल-), म1 उ1 मुवें मुए. -मूलेक्षुदण्डे च (→-मूले चेक्षुदण्डे), दे1 8-10 फलमूलेक्षुदण्डेन –d) दे10 मुनि (→मनु).

३०. ब2.⊙; दे10. ३०c-३१b⊙ –a) का1 दे3 4 10 उ1 प्रचरश्चान्न°, दे1 8 9 मुवें मुए मुव प्रचुरान्नोद°, दे3 6 प्रचरन्नन्न, न1 प्रचरस्नान°, तै1 प्रचुरस्मास°, द1 म1 प्रवेशाम°, प्र2 प्रवाप्नायान्न° (→प्रचरंश्चान्न°) –b) का1 द्रव्यहस्ते, दे1 4 8 10 न1 तै1 द1 प्र2 म1 उ1 मुवें मुए मुव यद्युच्छिष्टो (→द्रव्यहस्तो), दे1 4 8 10 तै1 द1 प्र2 म1 उ1 मुवें मुए मुव. द्विज (→नर) –d) दे1 ह्रियते तु तत्, दे8 न1 [अ]भ्युक्षयेत्तत, दे9 मुवें. मुए [अ]भ्युक्षिपेत्तत (→अभ्युक्षयेत्तु तत्), द1 प2 उ1 आचम्य प्रोक्षयेत्तत, तै1 आचम्याभ्युक्षयेत् शुचि, म1 आचम्य भक्षयेत्तत

३१ ब2 दे1 4 ⊙, दे10 ab ⊙, ब1 दे3 6 cd ⊙ –a) दे2 8 8 9 द1 मुवें मुए मुव वा (→वै). –b) म1 तत्त (→द्विज) –c) मुव निक्षेप्य (→निक्षिप्य) –d) दे8-10 मुवें मुए मुव आचम्याह्रियते तु तत्, द1 प्र2 उ1 आचम्य प्रोक्षयेत्तत, म1 आचम्य भक्षयेद् द्विज

३२ ब2 ⊙, दे4 c–f ⊙ –a) का1 व1 3 दे3 4 6 यद्यद्रव्य, तै1 यदि द्रव्य (→यद्यमत्र) –b) दे1 यद्यद्द्विष्टो भवेद्द्विज, द1 प्र2 उ1 भवेदुत्कर्षणान्वित –c) का1 दे3 भूमौ निधाय यद् द्रव्यम्, दे8 अभिधाये च यद् द्रव्य, तै1 अनिधायैव तद् द्रव्य, द1 अनिधायैव वक्तव्य –d) दे1 आचान्तस्तु शुचिर्भवे –e) न1 विकल्पस्य, द1 प्र2 म1 उ1 विकल्पत्वात् (→विकल्प स्यात्) –f) व1 दे1 8-10 न1 मुवें मुए मुव न (व1 उव)स्पृष्ट्वा चै(न1 वै)व मेव हि, दे2 तत्संस्पृष्ट्वा चैवमेव हि, तै1 तत्स्पर्शी देव मेव हि, द1 प्र2 म1 उ1 तत् स्पृ(द1 स्पृ)ष्ट्वा देवमेव हि

३३ ब2. ⊙ –b) दे9 तै1 प्र2 म1 चोर° (→चौर°), का1 दे6 °व्याघ-, दे3 °व्याघ्रान् (→°व्याघ्रा-) –c) न1 द1 प्र2 म1 उ1 मूत्रपुरीषे (→मूत्र पुरीष) –d) न1 तै1 प्र1 °हस्ते (→°हस्तो), तै1 शुध्यति, + दुष्यति (→दुष्यति)

३४ ब2 ⊙, दे1 8-10 cd ⊙ –c) का1 अह्नि, दे4 मह्नि, दे8 अस्ति, उ1 अचित (→अह्नि) –d) दे1 वै, द1 च (→चेद्), दे2 दक्षिणमुख (→दक्षिणामुख)

३५ ब2 ⊙ –a) दे1 काले (→काष्ठै) –b) ब3 पत्र-, दे4 पात्रैर् (→पत्रैर्), दे1 8 10 तै1 म1 उ1 लोष्ठैस् (→लोष्ठ-). –d) दे4 विसर्जने (→विसर्जनम्), द1 प्र2 म1 शकृन्मूत्रविसर्जनम्

३६ ब2 ⊙ –a) दे8 6 तै1 म1 गोष्ठे, न1 -गोष्ठ-, प्र2 -कोष्ठ- (→-गोष्ठ-) –b) ब3 दे1 8-10 न1 मुवें मुए मुव -चैत्यान्त (→-चैत्याम्भ); उ1 भूमिषु (→भस्मसु) –c) दे1 8-10 मुवें. मुए मुव वेश्म (→चैव) –d) म3 दे8 प्र2 म1 उ1 विण्मूत्रं (→विण्मूत्रे)

न गोमये न कृष्टे वा महावृक्षे न शाड्वले ।
न तिष्ठन् वा न निर्वासा न च पर्वतमस्तके ॥३७
न जीर्णदेवायतने न वल्मीके कदाचन ।
न ससत्त्वेषु गर्तेषु न गच्छन् वा समाचरेत् ॥३८
तुषाङ्गारकपालेषु राजमार्गे तथैव च ।
न क्षेत्रे न विले वाऽपि न तीर्थे न चतुष्पथे ॥३९
नोद्यानोदसमीपे वा नोपरे न पराशुचौ ।
न सोपानत्पादुको वा छत्री वा नान्तरिक्षके ॥४०
न चैवाभिमुखे स्त्रीणां गुरुब्राह्मणयोर्गवाम् ।
न देवदेवालययोरपामपि कदाचन ॥४१
न ज्योतींषि निरीक्षन् वा न संध्याभिमुखोऽपि वा ।
प्रत्यादित्यं प्रत्यनलं प्रतिसोमं तथैव च ॥४२
आहृत्य मृत्तिकां कूलाल्लेपगन्धापकर्षणम् ।
कुर्यादतन्द्रितः शौचं विशुद्धैरुद्धृतोदकैः ॥४३
नाहरेन्मृत्तिकां विप्रः पांशुलान्न च कर्दमात् ।
न मार्गान्नोषराद् देशाच्छौचशिष्टां परस्य च ॥४४
न देवायतनात् कूपाद् ग्रामान्न च जलात् तथा ।
उपस्पृशेत् ततो नित्यं पूर्वोक्तेन विधानतः ॥४५ वे.२.१३.४५

इति श्रीकूर्मपुराणे षट्साहस्र्यां संहितायामुपरिविभागे त्रयोदशोऽध्यायः ॥१३॥

---

३७ व2 ⊙, व1 ३७a–४४d ⊙ –a) दे1 4 8-10 मुवँ. मुए. मुव. गोपथे (→गोमये); क्षा1 काष्ठे न, व3 कृष्टे वा, न1 इष्टे वा, ते1 कुड्यादौ, प2 कुड्येव (→कृष्टे वा). –b) का1 व3 दे1 4 6 8-10 ते1 च (→न), व1 प2 म1 न गोष्ठे नैव, उ1 न गोष्ठे न च (→महावृक्षे न). –c) दे6 नाम (→वा न), का1 न शुद्धे वा निवासे वा, ते1 न तिष्ठन् नाविवासा वा

३८. व1 2 ⊙ का1 cd ⊙ –a) दे3 10 जीर्णं, दे6 क्षीण- (→जीर्ण-) –b) का1 वल्मीके, प2 नव लिङ्गे, उ1 वल्मीके न (→न वल्मीके). –c) दे1 8 9 न ससत्त्वेषु गच्छन् वा, दे10 मगर्तेषु गच्छन वा, न1 न च गर्तेषु गर्तेषु द1 प2 ग1 उ1 न च गर्तेषु सर्वेषु –d) व3 दे1 3 6 8-10 ना- (→न), दे3 तु (→वा)

३९ व1 2 ⊙ –b) दे1 °मार्गं (→°मार्गे) –c) वा1 च (→न), दे8-10 द1 मुवँ मुए न क्षेत्रे विमले वापि, न1 न क्षेत्रे न विले वापि, प2 न वाप्ये न विल्वेऽपि –d) द1 न कीर्तेन चतुष्पथे

४० व1 2 ⊙ –a) व3 म1 गोद्यानोपसमीपे वा, दे1 8-10 मुवँ मुए नोद्याने न समीपे वा, ते1 नाद्यानाम्बुसमीपे वा, मुव नदीनदसमीपे च –b) द3 6 नोपथे (→नोपरे), ते1 नाचरेत् पराशुचौ –c) दे4 सोपानत् (→सोपानत्), प2 उ1 न सोपानत्पादो वा –d) व3 मुव न छत्रो (→छत्री वा), ते1 चान्तरीक्षके, प2 म1 नान्तरीक्षके (→नान्तरिक्षके), दे1 0-10 न यंत्री वा (दे3 वा) नान्तरीक्षक (दे3 °के); मुवँ मुए नान्तरा वाथवान्तरीक्ष

४१. व1 2 ⊙. –a) दे1 मुवँ. मुए मुव. °मुखं, दे3 6 8 10 न1 ते1 म1 उ1 °मुख- (→°मुखे) –b) मुवँ. मुए न च (→गवा) –c) दे1 देव°, उ1 देव° (→देव°). –d) का1 दे1 8 9 व1 प2 म1 नाथा (म1 °या) यदि (→कदाचन); ते1 न तथा तु कदाचन

४२. व1 2 ⊙ –a) वा1 दे1 4 प2 उ1 निरीक्षिता, दे6 द1 निरीक्षन् वै, मुव न वीक्षन् वा (→निरीक्षन् वा); दे8-10 मुवँ मुए नदीं ज्योतींषि वीक्षन्, ते1 न ज्योतींषि न वीक्षन् वा –b) का1 दे3 6 वाल्य°, व3 दे1 8 9 मुवँ मुए वार्य°, दे10 मुव सान्ध्य° (→संध्या°), न1 सन्ध्याभिमुखस्तथा, ते1 नान्तर्याभिमुखस्तथा

४३ व1 2 ⊙ –a) का1 मूलात्, दे4 मूलयात्, दे10 भावयात्, द1 प2 उ1 मूले (→कूलात्) –b) दे8-10 मुवँ मुए °कर्षणात् (→°कर्षणम्) –c) ते1 मदाहृत (→मतन्द्रित) –d) दे8 विशुद्धैर, द1 विशुद्धो (→विशुद्धैर). का1 विशुद्धो योदकैस्तथा

४४ व1 2 ⊙ –b) का1 दे1 3 4 8-10 न1 प2 म1 मुवँ मुए मुव कर्दमात् (→कर्दमात्) –c) दे1 नाषराद्देशात्, द1 म1 नोपराद्देशात् (→नोषराद्देशात्) –d) दे1 8-11 ते1 शौचोच्छिष्टां दे1 शौचशिष्टे (→शौचशिष्टां), दे1 स्वपरस्य च (→परस्य च), मुवँ मुए मुव शौचोच्छिष्टां तथैव च

४५ व2 ⊙ –a) व1 कुर्यात्, दे1 न1 मे1 कुर्यात्, द1 व2 म1 उ1 कुर्यात् (→कूपाद्) –b) व1 प2 म1 मे तु (→न च), दे1 8-10 मुवँ मुए मुव वा नदीतडागतस्तथा, दे3 6 ग्रामाच्च जलाशयात्, ते1 ग्रामाज्जलाशयात्तथा –d) द1 प2 उ1 विधानत् (→विधानतः), ते1 पूर्वोक्तविधिना मत

पुष्पिका – [ते1 पुस्तके अध्यायसमाप्तिर्नास्ति]

पुराणनाम—का1 दे6 इति श्री(दे6 श्री)कूर्मपुराणे उपरि-भागे, व1 इति कौर्मे उपरिभागे, व2 इति कूर्मपुराणे, व3 इति

१४

व्यास उवाच ॥*

वें २ १४ १ एवं दण्डादिभिर्युक्तः शौचाचारसमन्वितः ।
आहूतोऽध्ययनं कुर्याद् वीक्षमाणो गुरोर्मुखम् ॥१

नित्यमुद्यतपाणिः स्यात् साध्वाचारः सुसंयतः ।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः ॥२

प्रतिश्रवणसंभाषे शयानो न समाचरेत् ।
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥३

नीचं शय्यासनं चास्य सर्वदा गुरुसन्निधौ ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ॥४

नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्वीत गतिभाषणचेष्टितम् ॥५

गुरोर्यत्र परीवादो निन्दा चापि प्रवर्त्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥६

दूरस्थो नार्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः ।
न चैवास्योत्तरं ब्रूयात् स्थितो नासीत सन्निधौ ॥७

कूर्मपुराणे उपरिभागे, दे1 8-10 न1 इति श्रीकूर्मपुराणे, दे2 3 इति कौर्मे उपरिभागे, दे4 इति श्रीकूर्मपुराणे ईश्वरगीतासूपनिषत्सु द1 म1 इति श्रीकूर्मपुराणे उत्तरभागे व्यासगीतासूपनिषत्सु, प्र2 इति श्रीकूर्मे महापुराणे उपरिभागे व्यासगीतासूपनिषत्सु उ1 इति श्रीकूर्मपुराणे उत्तरभागे व्यासगीतासु, मुवें इति श्रीकूर्मपुराणे उत्तरार्द्धे व्यासगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे, मुए इति श्रीकूर्मपुराणे उत्तरविभागे, मुव इति श्रीकौर्मे महापुराणे उपरिभागे ब्रह्मविद्यायां अध्याय नाम—का1 व1 3 दे1-4 6 8 10 म1 द1 प्र2 म1 उ1 मुए ○, मुवें ऋषिव्याससंवादे मुव आचमनादिकसंयोगो नाम अध्याय संख्या—व2 ○, का1 द्वादशोऽध्यायः ॥१२॥, व1 3 दे2 3 द्वादशोऽध्याय, दे1 मुवें त्रयोदशोऽध्यायः ॥१३॥, दे4 6 8 10 द1 प्र2 म1 उ1 मुए मुव त्रयोदशोऽध्याय, न1 द्विपष्टितमोऽध्याय

१४

* दे10 तै1 ○, दे8 9 व्यास उ, न1 प्र2 श्रीवेदव्यास, द1 म1 श्रीव्यास, उ1 व्यास

१ –c) दे4 आहूता,° उ1 आभूतो° (→आहूतो°) –d) का1 दे8 9 10 प्र2 वीक्ष्य° (→वीक्ष°)

२ –a) मुव मुए उद्धृत° (→उद्यत°) –b) दे1 4 6 8 10 व1 प्र2 म1 उ1 मुवें मुए मुव, सन्ध्याचार- (→साध्वाचार), व1 3 दे3 स्वय यत, दे8 10 उ1 मुवें मुए मुव °समन्वित, दे6 स्वय तत (→सुसंयत), तै1 सध्याचारी सुलोभत, द1 प्र2 म1 तान्पासु च सगुत –c) उ1 स्यात् (→सन्) –d) दे1 आसीना°, दे10 आसीनो° (→आसीता°), दे4 न1 तै1 द1 प्र2 म1 °मुखो, उ1 °मुख (→°मुख)

३ दे1 3b 4c ○ –a) दे6 °श्रवण°, तै1 °श्रपण° (→°श्रवण°) –c) दे4 8-10 न1 द1 प्र2 म1 उ1 मुवें मुए मुव आसीनो (→नासीनो), दे8 10 मुवें मुए तिष्ठन् वा (→भुञ्जानो) –d) का1 नो (→न), व1 नातितिष्ठ दे8 10 मुवें मुए उत्तिष्ठन्वा (→न तिष्ठन् न), तै1 नोत्तिष्ठेत पराङ्मुख

४ दे1 abc○ –a) का1 व2 नीच-, न1 नीचैं, दे8 10 द1 प्र2 म1 उ1 मुवें मुए मुव न च (→नीच), तै1 नाम (→चास्य) –c) दे8 10 द1 प्र2 म1 उ1 मुवें मुए च (→तु), दे10 गुरोश्च ऊर्ध्वंगमने, तै1 गुरोस्तु सन्निधौ विप्र –d) दे1 यथेच्छा° (→यथेष्टा°), दे4 न च श्रेष्ठा समाचरेत्

५ –a) दे10 नदाहरेद् तै1 नो व्याहरेद् (→नोदाहरेद्), व1 भाग- (→अस्य), दे4 मतो (→नाम) –b) म1 परोक्षं (→परोक्ष) –d) दे1 गतिर्, दे8 गति (→गति), का1 व1 दे1 4 8-10 म1 तै1 मुवें मुए, मुव -भाषित (→-भाषण-), दे1 -चेष्टिते, व1 तै1 -चेष्टितं (→-चेष्टितम्)

६ –a) दे1 4 8 9 उ1 मुवें मुए मुव प्रतीवादो (→परीवादो) –b) व1-3 दे2 3 तै1 द1 प्र2 म1 उ1 वापि (→चापि). –c) व1 दे1 तथा- (→तत्र), दे9 विधातव्यौ (→पिधातव्यौ) –d) प्र2 गन्तव्यश्च, म1 गन्तव्य च (→गन्तव्य वा), दे10 ततोन्यथा (→ततोऽन्यत)

७ –a) द1 दूरस्था, प्र2 दूरस्थे (स्थे?) (→दूरस्थो), तै1 ना ह्यर्चेत (→नार्चयेत्), न1 दूरस्थश्चोर्च्चयेदेन –b) का1

उदकुम्भं कुशान् पुष्पं समिधोऽस्याहरेत् सदा ।
मार्जनं लेपनं नित्यमङ्गानां वै समाचरेत् ॥८
नास्य निर्माल्यशयनं पादुकोपानहावपि ।
आक्रमेदासनं चास्य छायादीन् वा कदाचन ॥९
साधयेद् दन्तकाष्ठादीन् लब्धं चास्मै निवेदयेत् ।
अनापृच्छ्य न गन्तव्यं भवेत् प्रियहिते रतः ॥१०
न पादौ सारयेदस्य संनिधाने कदाचन ।
जृम्भितं हसितं चैव कण्ठप्रावरणं तथा ।
वर्जयेत् संनिधौ नित्यमवस्फोटनमेव च ॥११
यथाकालमधीयीत यावन्न विमना गुरुः ।
आसीताधो गुरोः कूर्चे फलके वा समाहितः ॥१२
आसने शयने याने नैव तिष्ठेत् कदाचन ।
धावन्तमनुधावेत गच्छन्तमनुगच्छति ॥१३
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ॥१४
जितेन्द्रियः स्यात् सततं वश्यात्माऽक्रोधनः शुचिः ।
प्रयुञ्जीत सदा वाचं मधुरां हितभाषिणीम् ॥१५
गन्धमाल्यं रसं कल्या शुक्तं प्राणिविहिंसनम् ।
अभ्यङ्गं चाञ्जनोपानच्छत्रधारणमेव च ॥१६
कामं लोभं भयं निद्रां गीतवादित्रनर्त्तनम् । वे २।१४।१७

क्रुद्धे, दे4 क्रुद्ध, प्र2 क्रोधो (→क्रुद्धो), का1 दे2 6 न1 द1 प्र2 म1 उ1 स्त्रिय, दे3 स्त्रिया, दे4 स्त्रिय, ते1 स्थित (→स्त्रिया) -c) प्र2 वृद्धात् (→ब्रूयात्), ते1 न चैवाश्यास ते स्थेय -d) ब1 3 दे1 2 4 8-10 न1 ते1 द1 प्र2 म1 उ1 मुवं मुए मुब. स्थिते, दे3 स्थितो (→स्थितो)

८ -a) ब1 उप° (→उद°), दे4 कुश, दे10 कुशा, प्र2 कुशात् (→कुशान्), द1 प्र2 म1 उ1 पुष्पान् (→पुष्प) -b) द1 म1 उ1 सनिधोप्या° (→समिधोऽस्या°) ते1 सान्निध्ये चाहरेत्सदा -d) दे2 भङ्गाना (→मङ्गानां), दे8-10 मुवं मुए मुब. वा (→वै), ते1 अग्न्यगारे समाचरेत् प्र2 स्नानं चैव समाचरेत्

९ -a) दे10 द1 तस्य (→नास्य), ते1 तस्यानिर्माल्य-शयन, -b) न1 पादुकोपानहोऽपि च -c) ब1 चास्य, दे1 8 10 मुवं, मुए मुव छायां, ते1 तस्य (→चास्य) -d) ब1 दे4 म1 द1 ते1 उ1 वै (→वा), दे1 8-10 मुवं मुए मुब आमन्दों वा, म1 छाया चैव (→छायादीन् वा)। प्र2 सर्वदा गुरुसन्निधौ, + छाया चास्य कदाचन

१० -a) दे4 °काष्ठानि, उ1 °काष्ठादि (→°काष्ठादीन्) -b) दे1 8 10 मुवं मुए. मुब कृत्य ते1 भय (→लब्ध) -c) का1 दे4 अनापृष्ट्वा (→अनापृच्छ्य)

११ दे4 ११b-१३b ⊙ -b) दे8 सनिधानौ, प्र2 सनिधौ च, उ1 सन्निधौ न (→सन्निधाने) -c) न1 महृत, प्र2 भाषित (→हसित), दे1 8-10 मुवं मुए जृम्भा (दे1 °ता) हास्यादिक चैव -d) दे8 कर्णान्, दे10 कण्ठा, प्र2 म1 उ1 वर्ण- (→कण्ठ-), का1 मवरण (→प्रावरण), ते1 कण्ठग्रहण तथा -f) ब1 प्र2 म1 उ1 नख° (→मव°), दे1 प्रथास्फोट तमेव च, दे8 9 मुवं मुए प्रथास्फोटनभं वच, दे10 प्रथास्फोटनमेवच ते1 सदस्फालनमेव च.

१२ दे4 ⊙ (द्र ११ पा टि), ब1 cd ⊙. -b) दे8 9 मुए विमना, ते1 विमतो (→विमना), दे3 6 भवेत् (→गुरु) -c) का1 आसीनाधो, दे1 8-10 न1 द1 मुवं मुए मुब आसीता (दे10 °ना) थ (→आसीताधो), ब3 कूर्च्चे, दे1 8-10 मुवं मुए मुब उक्ते, दे3 6 पूर्वे (→कूर्चे) -cd) ते1 आसनादौ सकृद् वेप नैव कुर्यात् समाहित.

१३ ब1 दे4 ab ⊙ -b) दे1 8-10 न1 मुवं मुए मुव नैकृत् (→नैव), ब3 न1 द1 प्र2 म1 उ1 कथञ्चन (→कदाचन) -c) ते1 धावेव°, दे3 6 °धावेत्तु, दे8 10 मुवं मुए मुव °धावेत्त (→°धावेत) -d) दे1 न गत (→गच्छन्त), दे1 4 8 10 द1 मुवं मुए मुव चानु°, न1 वानु° (→अनु°)

१४ द1 cd ⊙ -a) म1 -प्रमाद° (→-प्रासाद°), दे4 गाश्वोष्ट्रमहिषायान -b) ब1 प्रस्तरेषु, न1 स्वस्तरेषु (→प्रस्तरेषु), दे4 प्रासादप्रस्तरेषु च -c) का1 दे1 2 4 8 9 ते1 म1 उ1 मुवं मुए आसीन (→आसीत)

१५ -c) दे10 सदाचायत, दे10 सदाचारी (→सदा वाचं) -d) का1 ब1 3 दे2 3 6 °भाषणी, न1 °भाषण (→°भाषिणीम्), ते1 मधुर हितभाषण

१६ -a) दे3 4 °माल्या-, दे8 10 द1 म1 उ1 °माल्य- (→°माल्य), का1 चूर्णं, ब1 दे3 6 उ1 कल्हा, प्र2 मध, ब3 दे4 ते1 द1 प्र2 म1 कन्या, दे1 8-10 मुव मुए मुव भव्य, दे2 कल्पी (→कल्या), प्र2 गन्धमाल्याशन कन्या -b) का1 दे4 शुक्ति, ब1 शुक्र, दे1 3 6 8-10 मुवं मुए मुब. शुचन, ते1 पुष्प, प्र2 शुक्ति, उ1 मूर्त (→शुक्त). -c) का1 ब2 3 दे3 6 अभ्यञ्जना-, दे2 अभ्यञ्जनो- (→अभ्यञ्जन चा-); ब1 चाग- (→[उ]पानच्-), दे4 अभ्यग वीजनोपानात

१७. -a) ते1 क्रोध (→काम), का1 दे3 मोह, दे8 क्रोध (→लोभ), दे3 6 तथा (→भय), -b) प्र3 दे1 गीत

वं २.१४।१८ आतर्जनं परीवादं स्त्रीप्रेक्षालम्भनं तथा ।
परोपघातं पैशुन्यं प्रयत्नेन विवर्जयेत् ॥१७
उदकुम्भं सुमनसो गोशकृन्मृत्तिका कुशान् ।
आहरेद् यावदर्थानि भैक्ष्यं चाहरहश्चरेत् ॥१८
कृतं च लवणं सर्वं वर्ज्यं पर्युषितं च यत् ।
अनृत्यदर्शी सततं भवेद् गीतादिनिःस्पृहः ॥१९
नादित्यं वै समीक्षेत न चरेद् दन्तधावनम् ।
एकान्तमशुचिस्त्रीभिः शूद्रान्त्यैरभिभाषणम् ॥२०
गुरूच्छिष्टं भेषजार्थं प्रयुञ्जीत न कामतः ।
मलापकर्षणस्नानं नाचरेद्धि कदाचन ॥२१

न कुर्यान्मानसं विप्रो गुरोस्त्यागे कदाचन ।
मोहाद् वा यदि वा लोभात् त्यक्तेन पतितो भवेत् ॥२२
लौकिकं वैदिकं चापि तथाध्यात्मिकमेव च ।
आददीत यतो ज्ञानं न तं द्रुह्येत् कदाचन ॥२३
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य मनुस्त्यागं समब्रवीत् ॥२४
गुरोर्गुरौ सन्निहिते गुरुवद् भक्तिमाचरेत् ।
न चातिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत् ॥२५
विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु ।
प्रतिषेधत्सु चाधर्माद्धितं चोपदिशत्स्वपि ॥२६

(→गीत), व2 -निस्वन, द1 -त्तक (→-नर्तन). –c) दे1 4 8-10 न1 द1 प्र2 म1 उ1 मुवँ मुए. मुव पूत फन- (→आतर्जन) –d) व1 दे10 प्र2 °पेक्षा- (→°प्रेक्षा-), प्र2 उ1 °लम्बन (उ1 °भे) (→°लम्भन), ते1 स्त्रीपक्षालम्बन तथा. –e) दे1 4 8 9 न1 परोपपात- द1 प्र2 म1 उ1 परोपताप (→परोपघात)

१८ ब1 ○ –a) दे4 सुमनस (→सुमनसो) –b) व2 दे3 4 मृत्तिका, दे6 पूत्तिका (→मृत्तिका) –c) का1 व3 अर्थानि दे3 6 मन्तानि (दे6 °र्थि) (→मर्थानि), ते1 माहरेद् गुरवेऽर्थानि –d) का1 दे2 3 4 8 9 न1 द1 म1 मुए भैक्ष (→भैक्ष्य).

१९ ब1 ○ –a) का1 हृत, दे4 द1 प्र2 म1 उ1 कृत, ते1 शृत (→कृत), दे4 सर्वे, म1 क्षार (→सर्वं) –b) दे1 वर्ज्ये, न1 द1 वर्ज्ये (→वर्ज्यं) त1 भवेत्, द1 प्र2 उ1 तथा (→च यत्) –c) द1 उ1 च (द1 चा) नृत्त- म1 मनुत्य- (→अनृत्य-) –d) म1 भवेद् गीतासु निस्पृह

२० ब1 ○ –a) दे3 6 मादित्य मं समी , दे4 आदर्श च समी ते1 आदर्श वै समी , द1 म1 उ1 मादर्श चैवमी-, प्र० आदर्शन वैमी , (→नादित्य वै समी-) –b) का1 दे2 4 8 न1 द1 म1 उ1 नाचरे° (→न चरे°) –d) व2 3 दे4 द1 म1 प्र2 म1 उ1 शूद्राद्यैर् (→शूद्रान्त्यैर्), का1 शूद्रेण परिभाषणम्

२१ व1 ○, व2 cd ○ –a) दे3 गुरुच्छिष्ट(→गुरूच्छिष्ट), व2 दे3 6 भेषजान्न, ते1 भैषजार्थं (→भेषजार्थ), दे1 8 10 मुवँ मुए मुव गुरुप्रियार्थं सर्वं हि –c) का1 व3 दे1 2 4 8 10 द1 प्र2 म1 मुवँ मुए मुव °कर्षण (→°कर्षण-) –d) दे1 8-10 मुवँ मुए मुव माचरेद् (→नाचरेद्), दे1 4 8 10 न1 ते1 द1 प्र2 म1 उ1 मुवँ मुए मुव वै (→हि) का1 दे1 8-10 मुवँ मुए मुव कथचन (→कदाचन)

२२ व1 2 ○ –a) का1 ते1 मानसो (→मानस), त1 विप्रा (→विप्रो) –b) व3 ताप, दे4 ते1 द1 प्र2 म1 उ1 मुवँ त्याग (→त्यागे), का1 व3 दे2-4 8 न1 ते1 द1 प्र2 म1 उ1 कथचन (→कदाचन) –c) दे6 लोभात् + लोक (→लोभात्) –d) व3 प्र2 उ1 मुवँ मुए मुव त्यक्त्वैव, दे2 3 8 त्यक्ते तु, म1 त्यक्त्वा न (→त्यक्तेन)

२३ व1 ○, व2 cd ○ –a) व3 न1 ते1 वापि (→चापि) –b) द1 धार्मिक° (→[आ]ध्यात्मिक°), व3 दे3 8 9 न1 द1 प्र2 म1 उ1 वा (→च) –c) ते1 आददानियतो ज्ञान –d) का1 व2 दे3 4 8 10 ते1 त न (→न त), का1 क्रुद्धयेत् (→द्रुह्येत्), द1 प्र2 म1 कथचन (→कदाचन)

२४ ब1 ○ –c) ते1 द1 प्र2 म1 उ1 मुवँ उत्पथ, दे4 मत्यर्थं (→उत्पथ-) –d) दे1 ते1 परित्यागो विधीयते

२५ व1 ○ –b) का1 व2 3 दे2 8 न1 ते1 द1 प्र2 उ1 वृत्ति° (→भक्ति°), म1 गुरुवृत्ति समाचरेत् –c) व2 द1 न चाति , दे3 8 न चापि, दे4 न चान्य-, न1 न च वि, प्र० न चाव-, म1 न वा वि (→न चाति-), का1 °सृष्टे, दे4 °सृष्टो (→°सृष्टो)

२६ व1 ○ –a) दे1 4 8 9 एव (→एव), उ1 एवमेव (→एतदेव), ते1 गुरुविद्यादेकपक्ति –b) का1 दे1 4 8 10 द1 प्र2 म1 °वृत्ति-, प्र2 3 दे6 °वृत्ति (→°वृत्ति). –c) व2 प्रतिषेधेषु, ते1 प्रतिविद्धस्तु उ1 प्रतिषेधस्तु, (→प्रतिषेधत्सु) –c) व2 3 दे2 ते1 द1 प्र2 म1 उ1 चा (प्र2 म1 वा) धर्मं, दे3 चाधर्म्यादि, दे4 चाधर्मे (→चाधर्माद्) –d) म1 स्वके (→स्वपि), ते1 हितं चोपदिशेद् क्वचित्, द1 हितं चापि दिशत्स्वपि

श्रेयस्सु गुरुवद् वृत्तिं नित्यमेव समाचरेत् ।
गुरुपुत्रेषु दारेषु गुरोश्चैव स्वबन्धुषु ॥२७
बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि ।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति ॥२८
उत्सादनं वै गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्याद् गुरुपुत्रस्य पादयोः शौचमेव च ॥२९
गुरुवत् परिपूज्यास्तु सवर्णा गुरुयोषितः ।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥३०
अभ्यञ्जनं स्नापनं च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम् ॥३१
गुरुपत्नी तु युवती नाभिवाद्येह पादयोः ।
कुर्वीत वन्दनं भूम्यामसावहमिति ब्रुवन् ॥३२
विप्रोष्य पादग्रहणमन्वहं चाभिवादनम् ।
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् ॥३३
मातृष्वसा मातुलानी श्वश्रूश्चाथ पितृष्वसा ।
संपूज्या गुरुपत्नीव समास्ता गुरुभार्यया ॥३४
भ्रातुर्भार्योपसंग्राह्या सवर्णाऽहन्यहन्यपि ।
विप्रोष्य तूपसंग्राह्या ज्ञातिसंबन्धियोषितः ॥३५
पितुर्भगिन्या मातुश्च ज्यायस्या च स्वसर्यपि ।
मातृवद् वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ॥३६
एवमाचारसंपन्नमात्मवन्तमदाम्भिकम् ।
वेदमध्यापयेद् धर्मं पुराणाङ्गानि नित्यशः ॥३७
संवत्सरोषिते शिष्ये गुरुर्ज्ञानमनिर्दिशन् ।
हरते दुष्कृतं तस्य शिष्यस्य वसतो गुरुः ॥३८ वं २.१४.३८

२७ च1 ab ○ –a) व2 3 दे0.10 श्रेय स्व-, दे1 3 न1 मुवँ मुए मुव श्रेयस्तु (→श्रेयस्सु), दे1 3 10 द1 उ1 वृतिर् (→वृत्तिं), ग1 श्रेय सु गुरुवृत्ति च, ते1 श्रेय स्वगुरुपवृत्ति –c) दे1 6 न1 ते1 द1 प्र2 म1 पत्नीषु (→दारेषु) –d) दे3 6 सुबन्धुषु (→स्वबन्धुषु)

२८ –a) का1 व2 3 मुवँ बाल ममानपनन्यान् (का1 न्य), वे1 नत समानजन्मा वा, ते1 बाल समानजन्मा वा –b) दे8 न शिष्यो (→शिष्यो वा) –c) का1 वे1 4 6 9 °गुत (→°सुतो), दे3 6 अध्यापयन् वं स्वसुतो, ते1 अध्याप क्षाम सुतो

२९. a) का1 वं2 3 दे2 3 6 च दे4 म1 तु (→वै), ते1 पात्राणां, प्र2 मास्त्राणां (→गात्राणां) –b) ते1 स्नापनो, म1 उ1 स्नापन (→स्नापनो), प्र2 स्नापनश्चोच्छिष्टभाजन

३० प्र2 ○ –a) व1-3 दे2-4 6 न1 ते1 द1 म1 उ1 प्रति° (→परि°), दे1 4 8-10 मुवँ मुए मुव च, ते1 स्यु (→तु) –d) द1 [प्र]भिवादनै (→[प्र]भिवादनैः)

३१ प्र2 ab ○ –b) दे10 गात्रोच्छादन°, न1 गात्रोच्छादन°, ते1 गात्रोद्वर्तन° (→गात्रोत्सादन°) –d) प्र2 म1 उ1 तासां चैवप्रसाधनम्

३२ –a) दे1 8-10 °पत्नीनि, ते1 °पत्नीह (→°पत्नी तु), उ1 गुरुपत्नी स्ववनी –b) व3 नाभिवाद्येत, दे4 द1 नाभिवाद्या हि, ते1 नाभिवाद्ये म-, प्र2 म1 उ1 नाभिवाद्यभि- (→नाभिवाद्येह), दे10 प्र2 म1 वादयो (→पादयो) –c) दे4 कुर्यात्तु (→कुर्वीत); दे1 8-10 न1 मुवँ मुए मुव. भूमौ (→भूम्यां)

३३ प2 ab ⊙ –a) दे1 8 9 विप्रोष्य, दे10 विप्राष्य, ते1 विप्रस्य, न1 विमोच्य (→विप्रोष्य) –c) दे1 8-10 मुवँ मुए सर्वेषु (→कुर्वीत) –d) दे4 ते1 प्र2 म1 उ1 सदा (→सतां)

३४ –a) व2 3 ते1 मातु स्वसा (→मातृष्वसा), दे8 न1 मातुलाना (→मातुलानी) –b) प1 द1 म1 उ1 चापि (→चाथ), ते1 स्वस्य च पितु स्वसा –c) दे1 3 4 6 8-10 मुवँ मुए मुव, °पत्नी च, ते1 °पत्न्या • द1 प2 म1 उ1 °पत्नीवत् (→°पत्नीव) –d) व1-3 दे1 4 8-10 का1 ते1 द1 प्र2 म1 उ1 मुवँ मुए मुव समस्ता (→समास्ता)

३५ का1 ⊙, द1 bc ⊙ –a) व2 3 दे1-3 6 न1 मुवँ भ्रातृभार्या च, ते1 भ्रातृभार्याश्च, द1 [भ्रा]तृभार्योपि, प्र2 भ्रातृभार्ये च-, उ1 भ्रातृभार्ये च- (→भ्रातुर्भार्योप-) –b) प्र2 सवर्णा वा न वाऽपि –c) व1-3 म1 मुवँ मुए मुव. विप्रस्य, ते1 विप्रा स्यु (→विप्रोष्य) –d) दे4 ते1 °बान्धवा (→°योषित)

३६ –a) दे3 6 न1 ते1 द1 म1 भगिन्या, प्र2 उ1 भगिन्या (→भगिन्यां) –b) दे4 यवीयस्यां, उ1 ज्यायस्याश्च (→ज्यायस्यां च), दे3 6 10 प्र2 म1 उ1 स्वसुर्यपि (→स्वसर्यपि) का1 ज्यायस्या स्वसर्यपि –c) दे1 वृत्तिमात् (→वृत्तिमा-)

३७ –b) का1 वे1 6 प2 यथा (दे8 थो)निक (→मदा-म्भिक). –c) का1 वेद्र (→वेद)

३८ –a) का1 संवत्सरोषितो (→संवत्सरोषिते). –b) व1 3 दे4 10 उ1 गुरु- (→गुरुर्); दे1 मनुदिशन्, दे6.8-10 उ1

ब्र २.१४.४० आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः ।
शक्तोऽन्नदोऽर्थी स्वः साधुरध्याप्या दश धर्मतः ॥३९
कृतज्ञश्च तथाऽद्रोही मेधावी शुभकृन्नरः ।
आप्तः प्रियोऽथ विधिवत् षडध्याप्या द्विजातयः ।
एतेषु ब्रह्मणो दानमन्यत्र तु यथोदितान् ॥४०
आचम्य संयतो नित्यमधीयीत उदङ्मुखः ।
उपसंगृह्य तत्पादौ वीक्षमाणो गुरोर्मुखम् ।
अधीष्व भो इति ब्रूयाद् विरामोऽस्त्विति चारमेत् ॥४१
प्राक्कूलान् पर्युपासीनः पवित्रैश्चैव पावितः ।
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ॥४२
ब्राह्मणः प्रणवं कुर्यादन्ते च विधिवद् द्विजः ।
कुर्यादध्ययनं नित्यं स ब्रह्माञ्जलिपूर्वतः ॥४३
सर्वेषामेव भूतानां वेदश्चक्षुः सनातनम् ।
अधीयीताप्ययं नित्यं ब्राह्मण्याच्च्यवतेऽन्यथा ॥४४
योऽधीयीत ऋचो नित्यं क्षीराहुत्या स देवताः ।
प्रीणाति तर्पयन्त्येनं कामैस्तृप्ताः सदैव हि ॥४५
यजूंष्यधीते नियतं दध्ना प्रीणाति देवताः ।
सामान्यधीते प्रीणाति घृताहुतिभिरन्वहम् ॥४६
अथर्वाङ्गिरसो नित्यं मध्वा प्रीणाति देवताः ।
धर्माङ्गानि पुराणानि मांसैस्तर्पयते सुरान् ॥४७

प्रतिदिशेत् म1 प्रदर्शयत् (→प्रतिदिशन्) –c) व1 भवते, न1 आहरेद् (→हरते)

अत्र परं द1 प्र2 म1 उ1 अधिकम्—

३३ ● मनुरक्तो हि मेधावी अध्याप्या दशधर्मतः ।

३९. –a) का1 स तु कथादौ रसा साधु, व1-3 श (व1 म) क्तोऽन्नदोऽर्थं (व1 °न्न) द (व1 र) साधुर्, दे1 8 9 मुव. मुए मुब. सूक्तार्थदो रस साधु, दे3 शक्तोऽन्नदोऽन्नलुब्ध, दे4 रक्तो गुर्वी ह्यमेधावी, न1 द1 प्र2 म1 उ1 शक्तोऽयदोऽर्थी न साधुर् दे1 शक्तोऽर्थदोऽर्थे मेधावी. –d) दे4 चाध्याप्या, दे8-10 मुर्व. मुए मुब स्वाध्याप्या (→अध्याप्या)

४०. –a) का1 कृतज्ञो ज्ञातयोऽद्रोही –b) दे1 8-10 न1 मुर्व मुए मुब. शुभकृत् (→शुभकृन्न) –c) उ1 प्राज्ञ प्रियो- ध्यानिधिवत् –d) दे4 तै1 द1 प्र2 म1 उ1 द्विजोत्तमं (→द्विजातय). –e) का1 व3 दे2 3 6 9 तै1 उ1 ब्राह्मणो, म1 ब्रह्मणे (→ब्रह्मणो) –f) दे1 8 10 मुर्व मुए मुब च, द1 प्र2 म1 उ1 न (→तु), दे10 यथोदिवान्, द1 प्र2 म1 उ1 यथोदित (→यथोदितान्)

४१. –a) तै1 नियतो (→संयतो). –b) दे1 8 10 तै1 मुर्व मुए मुब ह्युदङ्° (→उदङ्°), दे4 म1 अधीयीताप्यु (दे1 °न्यु) दङ्मुख –c) व3 दे6 वीक्ष्यमाणो, दे10 वीक्ष्यमाण (→वीक्षमाणो) –f) व1 2 दे8 मुर्व मुए विरामोऽस्त्विति, दे1 9 विरामस्त्वेति, दे4 विरामोऽस्त्वति (→विरामोऽस्त्विति), का1 दे1 8-10 मुर्व मुए नारभेत्, व1 चारभेत्, दे3 न1 चारभेत्, दे4 न स्मरेत्, दे8 चादमेत्, तै1 चारयेत्, म1 उ1 वा चरेद् (→चारमेत्), व2 विरामे स्थितिमाचरेत्.

४२ –a) का1 दे1 8-10 मुर्व मुए मुब प(का1 प्रा)क्कूलेषु समासीन, दे4 द1 प्र2 म1 उ1 प्राक्कूलेषु समासीन, प्राङ्मुखश्च समासीन –b) दे5 साविन, उ1 वाचिन (→पावित) –d) दे4 माचरेत्, तै1 मारभेत् (→मर्हति)

४३ –a) व2 3 दे3 6 उ1 ब्रह्मण (→ब्राह्मण), तै1 प्रथम (→प्रणव). –b) व1-3 दे3 6 मन्तेऽपि, दे1 कुर्यात् (→मन्ते च), व2 3 दे2 3 6 तै1 द्विजा (→द्विज) –c) व2 3 दे2 मध्यापन (→मध्ययन) –d) व1 दे8 न1 तै1 द1 प्र2 म1 उ1 ब्रह्माञ्जलिकृतस्थित (न1 तै1 °र), दे1 8-10 मुर्व मुए मुब ब्रह्माञ्जलिकरस्थित

४४ व1 ४४d-४५a ○ (द्र. टी.) –b) का1 व2 3 दे2 3 4 6 10 तै1 प्र2 म1 मनातन (→सनातन) –c) न1 [प्र]व्यय, प्र2 म1 उ1 [मा]यय (→[प्य]यं), तै1 अधीतपाध्यायपर्येत्तित्य –d) दे4 10 म1 ब्राह्मणश् (→ब्राह्मण्यात्), का1 तथा (→[च्य]वते), व2 3 दे3 6 ब्राह्मण्याद्वीयतेऽन्य (व3 दे6 °त) था

४५ व1 a ○ (द्र ४४ पा. वि) –a) का1 व2 3 दे2 अधीयीत (→योऽधीयीत), का1 वचो, न1 द्विजो, तै1 द1 प्र2 म1 ऋच (→ऋचो) –b) दे6 देवत (→देवता) –c) दे4 तर्पयन्त्येत, दे6 तर्पयेत्येन. तै1 तर्पयित्वेन (→तर्पयन्त्येनं) –d) तै1 तुष्टा (→तृप्ता), का1 व2 3 दे2 3 6 न1 सदेवता, द1 तथैव हि (→सदैव हि)

४६ –a) दे4 तै1 द1 म1 उ1 सतत (→नियत) –b) उ1 तस्मात् प्रीणन्ति देवता –c) तै1 [अ]धीत्य (→[म]धीते) –d) तै1 घृताज्याहुतिभिरन्वहम्

४७ –a) तै1 अथर्वाङ्गिरसा (→अथर्वाङ्गिरसो), म1 [य]धीते (→नित्य). –b) व1 म य (→मध्वा) –c) दे1 8-10 मुर्व. मुए मुब वेदाङ्गानि (→धर्माङ्गानि) –d) का1 प्राणैस्तर्पयते सुरान्, दे1 8-10 मुर्व मुए मुब. मा (दे1 मुर्व मुए मा) सैश्च तर्पयेत्सुरान्

अपां समीपे नियतो नैत्यकं विधिमाश्रितः ।
गायत्रीमप्यधीयीत गत्वाऽरण्यं समाहितः ॥४८
सहस्रपरमां देवीं शतमध्यां दशावराम् ।
गायत्रीं वै जपेन्नित्यं जपयज्ञः प्रकीर्तितः ॥४९
गायत्रीं चैव वेदांश्च तुलयाऽतोलयत् प्रभुः ।
एकतश्चतुरो वेदान् गायत्रीं च तथैकतः ॥५०
ओंकारमादितः कृत्वा व्याहृतीस्तदनन्तरम् ।
ततोऽधीयीत सावित्रीमेकाग्रः श्रद्धयान्वितः ॥५१
पुराकल्पे समुत्पन्ना भूर्भुवःस्वः सनातनाः ।
महाव्याहृतयस्तिस्रः सर्वाशुभनिवर्हणाः ॥५२
प्रधानं पुरुषः कालो विष्णुर्ब्रह्मा महेश्वरः ।
सत्त्वं रजस्तमस्तिस्रः क्रमाद् व्याहृतयः स्मृताः ॥५३
ओंकारस्तत् परं ब्रह्म सावित्री स्यात् तदक्षरम् ।
एष मन्त्रो महायोगः सारात् सार उदाहृतः ॥५४
योऽधीतेऽहन्यहन्येतां गायत्रीं वेदमातरम् ।
विज्ञायार्थं ब्रह्मचारी स याति परमां गतिम् ॥५५
गायत्री वेदजननी गायत्री लोकपावनी ।
न गायत्र्याः परं जप्यमेतद् विज्ञाय मुच्यते ॥५६
श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रोष्ठपद्यां वा वेदोपाकरणं स्मृतम् ॥५७
उत्सृज्य ग्रामनगरं मासान् विप्रोऽर्द्धपञ्चमान् ।
अधीयीत शुचौ देशे ब्रह्मचारी समाहितः ॥५८ वे२।१४।६१

म1 पुस्तके a चरणानन्तरमधिकम्—
• जपयज्ञ प्रकीर्तित गायत्री चैव वेदाश्च । (=४६d,५०a)

४८ -a) का1 म1-3 दे2.4 न1 तै1 म1 प्रयतो (→नियतो) -b) ब1 दे3.4 तै1 मुब नित्यक, ब2 म2 उ1 मुर्वे मुए मुव नैत्यिकं (→नैत्यकं) दे10 माश्रुन (→माश्रितः), -c) न1 गायत्री तमधीयीत -d) दे4 म2 समाधित (म2 °ता) (→समाहितः)

४९ -b) दे10 शतमध्या (→शतमध्यां), ब2.3 दे3 म2 म1 दशापरां (→दशावरां)

५० -a) दे1.6-10 मुर्वे मुए मुव वेदांस्तु (→वेदांश्च), तै1 गायत्री वै सवेदांश्च -b) द1 ग1 म1 उ1 तुलयातुलयत्प्रभु -d) ब1 गायत्री चैव एकत

५१ -b) ब1 तै1 व्याहृतीन् (→व्याहृतीस्) -c) ब2 गायत्री, म2 एवाय (→सावित्री) -d) ब3 दे1.4 न1 एकाग्र-, दे10 एकान्त (→एकाग्र), का1 एष धर्मं सनातन, म2 म1 श्रद्धया परमान्वित

५२ -a) म1 °कल्प (→°कल्पे) -b) का1 ब1 दे1.6-10 म1 उ1 सनातन, तै1 पितामहा, + सनातनम् (→सनातनाः), म2 भूर्भुव स्वर्गनामक -d) ब1 दे1.6-10 म1 °निवर्हण (→°निवर्हणाः), दे1 सर्वासुरनिवर्हणाः, मुर्वे सर्वा शुभ-निवर्हणा

५३ -b) म2 म2 ब्रह्म(म2 °ह्मा)विष्णुमहेश्वरा, ब3 दे2.6 विष्णुब्रह्ममहेश्वरा -c) का1 तम इति, तै1 तमश्चैव (→तमस्तिस्र) -d) म1 महा (→क्रमाद्), ब2 तथा (→स्मृता)

५४ -a) द1 मोङ्कार (→ओङ्कारस्) -b) दे4 द1 म3 म1 ब1 गायत्री (→सावित्री), ब1 अनन्तरम्, दे6 तदन्तर (→तदक्षर) -c) ब1 महायोगी, दे10 महायोग- (→महायोग) -d) ब2 सर्व-, द1 म1 म1 उ1 साक्षात्, दे3 सारा- (→सारात्), दे10 सार (→सार[ ])

५५ -a) तै1 याऽधीते ह्यन्यहन्ये ता -b) मुर्वे मुए मुव सावित्री (→गायत्री) -d) दे2.8 गति (→गतिं)

५६ द1 म2 म1 उ1 ab ○ -c) का1 दे1.10 न1 मुर्वे मुए जाप्य (→जप्य) -d) ब2 द1 म2 म1 उ1 एतद् विज्ञानमुच्यते

मुव पुस्तके b, c मध्येऽधिकम्—
33 • 'ओंकार वदथ तस्या शृणुध्व मुनिपुङ्गवाः ।
दक्षिणाग्रा पञ्चरेखा पश्चिमाग्राद्गमव्ययाः ।
निगद् रेखा प्रयत्नेन दक्षिणस्योद्भवे भवेत् ।
गायत्री त्रिविधेषु द्वारेमाद् वर्णहद्दिशीय । [4]
पूरयत् प्रतिलोमेन सामावर्तेन चोच्चरेत् ।
एव मयथा चोड्कार प्रजपेत् पञ्चमोविनीत् ।
द्विजात्मा प्रहानिष्ठात्मा श्रद्धयपदरूपिणीम् ।

५७ -b) दे4.8 म1 तै1 म2 पौर्णमास्या (→पौर्णमास्यां), दे2 उ1 द्विजात्तम, दे8 द्विजोत्तम (→द्विजोत्तमाः) -c) का1 म1-3 दे2.8.9 तै1 मुब प्रोष्ठपद्या, दे3.6 पौर्णमास्यां (→प्रोष्ठपद्यां) -d) ब1.2 दे2.4.10 म2 वेदोप°, द1 वेदापा° (→वेदोपा°)

५८ -b) दे4 विप्रोम्य (→विप्रोर्ध-), द1 विप्रोऽप पञ्चमान्

मं.२.१४६२ पुष्ये तु छन्दसां कुर्याद् बहिरुत्सर्जनं द्विजः ।
माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥५९
छन्दांस्यूर्ध्वमथोऽभ्यस्येच्छुक्लपक्षेषु वै द्विजः ।
वेदाङ्गानि पुराणानि कृष्णपक्षे च मानवम् ॥६०
इमान् नित्यमनध्यायानधीयानो विवर्जयेत् ।
अध्यापनं च कुर्वाणो ह्यनध्यस्यन्नपि यत्नतः ॥६१
कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे ।
आकालिकमनध्यायमेतेष्वाह प्रजापतिः ॥६२
एतानभ्युदितान् विद्याद् यदा प्रादुष्कृताग्निषु ।
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ॥६३
निर्घाते भूमिचलने ज्योतिषां चोपसर्जने ।
एतानाकालिकान् विद्यादनध्यायानृतावपि ॥६४
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने ।
सज्योतिः स्यादनध्यायः शेषरात्रौ यथा दिवा ॥६५
नित्यानध्याय एव स्याद् ग्रामेषु नगरेषु च ।
धर्मनैपुण्यकामानां पूतिगन्धे च नित्यशः ॥६६
अन्तःशवगते ग्रामे वृषलस्य च सन्निधौ ।
अनध्यायो रुद्यमाने समवाये जनस्य च ॥६७

५९ -b) दे10 उत्सर्जने (→उत्सर्जनं), दे4 बुधा, दे6 10 न1 ते1 द1 प्र2 म1 उ1 मुर्वे मुए मुव द्विजा (→द्विज). -c) का1 वै (→वा), द1 माघमासे त्वथ प्राप्ते, प्र2 उ1 माघे वा मासि सप्राप्ते -d) द1 पूर्वाह्ने (→पूर्वाह्णे)

६० -a) व1 द1 यथोऽभ्यस्य, प्र2 उ1 अथोऽधीते, दे3 यथो ध्यायात्, बे4 दे1 अतोऽभ्यस्येत्, दे6 यथोऽप्यभ्य (→यथोऽभ्यस्येत्), का1 दे1 8-10 मुर्वे मुए छन्दसां प्रीणनं कुर्यात् -b) व1 शुक्लपक्षे च, व2 3 दे2 3 6 प्र3 म1 शुक्लपक्षे तु (→शुक्लपक्षेषु), दे1 8-10 वे1 प्र2 उ1 मुर्वे मुए मुव द्विजा (→द्विज), द1 शुक्लपक्षे द्विजोत्तमाः, उ1 शुक्लपक्षेषु वै द्विजा -d) व1 3 दे2-10 ते1 द1 म1 मुव कृष्णपक्षेषु, प्र3 उ1 कृष्णपक्षे तु (→कृष्णपक्षे च); का1 न2 दे1 3 4 8 9 ते1 मुर्वे, मुए, मुव मानव, दे1 6 मानरा, दे10 म1 मनिशा (→मानव), म3 कृष्णपक्षे स्वमानरा

६१ -a) न1 पुमान् (→इमान्) -ab) ते1 नित्यानध्यायमधीयानो ह्यविवर्जयेत् -c) दे8 अध्यापनश्च (→अध्यापनं च), दे1 9 10 मुव अध्यापनं प्रकुर्वाणो -d) दे1 विगर्जयेत् (→[प्य]पि यत्नतः) का1 अन्यस्यन्नप्यप्रयत्नतः, व2 अभ्यस्यन्नपि च यत्नतः, दे2 ह्यस्यन्नपि प्रयत्नतः, दे4 म1 ह्यभ्यस्यन्नापि यत्नतः, दे8-10 मुर्वे मुए मुव ह्यनध्यायान् विवर्जयेत्, ते1 [प]प्यभ्यस्यन्नपि यत्नतः

६२ दे1 9 10 b-f ○ -a) दे4 कर्णश्रावे, द1 कर्णास्रवे, प्र2 उ1 कर्णस्रवे (→कर्णश्रवे), व3 कर्णश्रावनिले रात्रौ -b) का1 °समुद्गमात् व2 °समूहवे, म1 °समोहने, उ1 °विमोहने, मुव °समुद्गम (→°समूहने), ते1 दिवापांशुसमुद्गते -d) प्र2 महोल्कानां (→महोल्कानां), द1 प्र2 म1 उ1 प्लावने (→संप्लवे) -e) म1 मनुराह°, उ1 मकालिक° (→आकालिक°) -f) प्र2 एतत्वाह (→एतेष्वाह), का1 यत्नतो चन्द्रदर्शने

६३ का1 दे1 8-10 द1 मुर्वे मुए मुव ○ -a) व2 दे3 6 नित्या (→विद्यात्) -b) व2 दे3 6 मुदा, प्र2 यदा (→यदा); दे6 °ष्कृताग्निषु न1 प्र2 °ष्कृतानि तु, म1 °ष्कृतानिषु (→°ष्कृताग्निषु) -c) दे2 °दनध्याय, दे6 °दनध्यायं (→°दनध्याय) -d) व1-3 दे2 मनृतौ चाभ्र (व2 °भ्र) दर्शने, दे4 अनृतौ तु प्रदर्शने, दे6 मनसो चाभ्रदर्शनं, प्र3 अन्यतो चाभ्रदर्शने.

अस्य श्लोकस्य स्थाने ते1 पुस्तके अयपाठ —
३४ * ऐवोऽनध्यान्दिता विप्रा वेदान् प्राहुः कृताग्निषु ।
त च विद्यादनध्यायमन्यतोऽद्भुतदर्शने ।

६४ दे1 8-10 ⊙, दे4 cd⊙ -b) व2 चैव दर्शने, दे8 सोपसर्पणे, उ1 द1 प्र2 म1 उ1 घोपसर्पणे (→चोपसर्जने) -c) व2 निरस्थान् (→विद्याद्), ते1 एता नानाविधा विद्या -d) ते1 अनध्यायमृतावपि

६५ का1 ○, दे10 ab ⊙, दे1 8 9 a ○ -a) ते1 भू (→तु) -b) दे4 6 °निस्वन (→°निस्वने) -c) द1 प्र2 सद्यो हि (→सज्योति), ते1 सदादिशेदनध्यायम् -d) व3 अनृतौ च प्रदर्शने, दे1 8-10 मुर्वे मुए मुव अनृतौ चात्र दर्शने, दे2 अनृतौ चाभ्रदर्शने, दे3 6 द1 प्र2 म1 प्रनृतौ चाभ्रदर्शने, ते1 अनृतौ राद्भुदर्शने, उ1 अनृते चाभ्रदर्शने

अत परं व3 दे3 3 6 पुस्तकेषु अधिकम्—
स ज्योति स्यादनध्याय शेष रात्रौ यथा दिवा (= ६५cd)

६६ का1 ○ -a) दे1 8-10 नित्यानध्ययन एव स्याद -c) व2 3 द1 ते1 उ1 कर्मनैपुण्य-, दे1 8 9 म1 धर्मनैपुण-, दे1 कर्मणो पुण्य-, प्र2 म1 कामनैपुण- (→धर्मनैपुण्य-) -d) दे1 8 न1 मुव मुए °गन्धेन (→°गन्धे च)

६७ का1 ⊙ -a) व2 3 दे2 3 6 °शर°, दे4 °रव°, दे8-10 °शिव°, उ1 °जल° (→°शव°), प्र2 अन्तर्गते शवे ग्रामे -c) दे1 8-10 मुर्वे मुए गुह्यमाने, दे4 गुह्यमाने (→रुद्यमाने), न1 अध्यापनं न कुर्याद् वै

उदके मध्यरात्रे च विण्मूत्रे च विसर्जने ।
उच्छिष्टः श्राद्धभुक् चैव मनसाऽपि न चिन्तयेत् ॥६८
प्रतिगृह्य द्विजो विद्वानेकोदिष्टस्य केतनम् ।
त्र्यहं न कीर्तयेद् ब्रह्म राज्ञो राहोश्च सूतके ॥६९
यावदेकोऽनुदिष्टस्य स्नेहो गन्धश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद् ब्रह्म न कीर्तयेत् ॥७०
शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम् ।
नाधीयीतामिषं जग्ध्वा सूतकाद्यन्नमेव च ॥७१
नीहारे बाणशब्दे च संध्ययोरुभयोरपि ।
अमावास्या चतुर्दश्या पौर्णमास्यष्टमीषु च ॥७२
उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् ।
अष्टकासु त्वहोरात्रं ऋत्वन्त्यासु च रात्रिषु ॥७३
मार्गशीर्षे तथा पौषे माघमासे तथैव च ।
तिस्रोऽष्टकाः समाख्याताः कृष्णपक्षे तु सूरिभिः ॥७४
श्लेष्मातकस्य छायायां शाल्मलेर्मधुकस्य च ।
कदाचिदपि नाध्येयं कोविदारकपित्थयोः ॥७५
समानविद्ये च मृते तथा सब्रह्मचारिणि ।
आचार्ये संस्थिते वाऽपि त्रिरात्रं क्षपणं स्मृतम् ॥७६
छिद्राण्येतानि विप्राणां येऽनध्यायाः प्रकीर्तिताः ।
हिंसन्ति राक्षसास्तेषु तस्मादेतान् विवर्जयेत् ॥७७
नैत्यके नास्त्यनध्यायः संध्योपासन एव च ।
उपाकर्मणि कर्मान्ते होममन्त्रेषु चैव हि ॥७८ cf ३.१४८१

६८. का1 ab ⊙ -a) द1 उदधौ, प्र2 म1 उ1 उदये (→उदके), व2 3 दे2 3 6 चार्द्ध° (→मध्य°), प्र2 °रात्री (→°रात्रे) -b) दे3 6 विण्मूत्रस्य (→विण्मूत्रे च), व1 न1 दे10 विसर्जयेत्, व2 3 दे1 ते1 उ1 मुवं, मुए मुव विवर्जयेत्, दे8 9 विसर्जयन् (→विसर्जने) -c) व2 दे1 2 4 6 9 10 न1 °भुक्त्वैव (→°भुक् चैव) -d) उ1 दे4 प्र2 मनसा न विचिन्तयेत्

६९ -a) का1 प्रतिगृह्य तनो विप्राद् -b) व2 एकाद्दिष्टनिकेतनम्, प्र2 एकोद्दिष्टमकेतन -d) दे6 म1 राज्ञा (→राज्ञो)

सर्वव्ययं च यागं वा कृत्वा शुद्धिमवाप्नुयात् ।
—(pp 594 95)

348 स्वर्णक्ष्मामुद्ग राज्ञा स्वर्चिता शास्त्रवर्त्मना ।
प्रतिगृह्णन् द्विजो मोहात् स सद्य सूतको भवेत् ॥
—(p 597)

हिरण्यवाजिनं गृह्णन् द्विजो लोभपरायण ।
जन्मत्रये राक्षसत्वमनुभूय पिशाचताम् ॥
352 तदन्ते भुवमासाद्य राक्षसत्वमवाप्नुयात् ।
तदन्ते रोगवान् भूत्वा नरक याति पाण्डव ।
—(p 599)

यो राजा ब्रह्मणा दत्त विधिवत्क महत्तरम् ।
अभ्यर्च्य गणनाथैर्धर्ममार्गोपदेशत ॥
356 विप्राय वेदविदुषे ददाति पुण्यसंगमे ।
तस्य पुण्यस्य भेदं वा मया वक्तुं न शक्यते ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
स्थित्वा स ब्रह्मणो लोके पुनर्भुवमुपागत ॥
360 चक्रवर्तित्वमाप्नोति किमन्यैर्बहुभाषितै ।
—(p 612)

यो धर्ता चर्मणो धेनु द्विजो दत्ता नृपात्मज ।
पूजिता पुण्यकालेषु न भूयो राक्षसाश्र ॥
तस्य वै निष्कृतिर्ज्ञेया देवा द्वादशलक्षत ।
364 ब्रह्मोपदेश कर्तव्यो गायत्रीदानमेव च ॥
पुन संस्कारमात्रेण पूतो भवति चोभयो ।
अन्यथा पतित विद्यादल्पेत कदाचन ॥
—(p 620)

महत्स्वेतेषु दानेषु यदा यस्य प्रतिग्रह ।
368 तदा प्रभृत्यसौ विप्र पतितोऽभूत्र संशय ॥
सन्ध्यादिनित्यकर्माणि पितृकार्याणि यानि च ।
तानि सर्वाणि विप्रर्षे न फलन्ति द्विजन्मन ॥
पत्नी वा तनयो भ्राता न स्पृशन्ति कदाचन ।
372 तस्माद्दोषाद् विशुद्ध्यर्थं पुन संस्कारमाचरेत् ॥
—(p 633)

स्वबन्धुकृतयज्ञेषु प्राप्ते यत् पशुभक्षणम् ।
पाराशरं विशुद्धि स्यात् अन्यत्र त्रिगुणं भवेत् ॥
अश्रोत्रिये तु त्रैगुण्य शूद्रे पञ्चगुण भवेत् ।
376 पुन संस्कारत पूत शुद्धो भवति सर्वदा ॥
—(p 637)

आर्द्रकृष्णाजिने कालचक्रे स्वर्णपर्वते ।
कार्पासपर्वते कोटिहोमे गर्भविलाहये ॥
गोसहस्रे तुलाया च लाङ्गले विश्वमण्डले ।
380 सागरे चर्मधेनौ च महाभूतघटे तथा ॥
आचार्यत्व यदि प्राप्त दानानां पुण्यसंगमे ।
आचार्यो यो भवेद् विप्रस्तस्य निष्कृतिरुच्यते ॥
—(p 644 45)

जन्मन्येकत्र वैश्वाच कान्तवनपरिग्रहे ।
384 विप्रो भवति दुष्टात्मा पूर्वजै कारणैर्विना ॥
—(p 662)

पित्रादिरक्षणाभावे नियमानामसंभवे ।
प्रायश्चित्तमकृत्वा तु सहस्रगुणो भृग ॥
ऊन परं यावद् स्यात् विद्वाल्त्रिषु जन्मसु ।
388 तस्मादेतद् विशुद्ध्यर्थं प्रायश्चित्त समाचरेत् ॥

उभयोर्नैकयो पृथ्य दर्भो लोका तरेचरा ।
—(p 663)

तयक्तो घननिर्वेशो ब्रह्मन्याप्य सुरालय ।
तन्मूर्तिर्वनकाशरी सहस्रस्थानमिष्यते ॥
—(p 666)

392 पुरा दुर्वासस शापात् गतैश्वर्य पुरन्दर ।
तदर्थ मथित सिन्धुर्दिविजैरसुरान्वितै ॥
ऐरावत कल्पतरुश्चन्द्रमा कमलालया ।
उच्चैःश्रवा समुत्पन्न धन्वन्तरिरनन्तरम् ॥
396 देवकन्ये हरि साक्षादिदमाह वचस्तदा ।
शृण्वन्तु देवता सर्वा श्रेयार्थं तं ब्रुवन्त्यके ॥
सकल्याणं सौपद्यं सायुधं व्याधिवर्जितम् ।
400 यो राजा विमलात्सुर्यात् स गच्छेन्मामकं पदम् ॥
तं दृष्ट्वा योऽनुगृह्णीयात् द्विज पापनाशन ।
ब्राह्मणादिकमहत्वा तु ब्रह्मभोगपरायण ।
समवेक्षमाणो विप्रो गर्दभ योनिसंयुत ।
अन्य तु निष्कृति प्रोक्ता तस्यश्चरशतमयात् ॥
—(pp 668-69)

404 पुत्रश्चोऽन्यस्य कामिन्यो विवाहार्थं धना वदन् ।
तेनार्जितेन वसुना यदि कन्यां समुद्वहेत् ॥
स पिता पतितो भूयात् तत्पुत्रा पतित स्मृता ।
तपत्नी तत्पुत्र राजन् वृथा यत्र धनार्जनम् ॥
408 कर्णौ पुण्ये शिरोवा स्वकाले सर्वशिरस ।
तेषु मुण्डनं मोक्ष कर्षा नेच्छन्ति तद्बुधा ॥
—(pp [illegible]-97)

प्रायश्चित्त यदोच्छेत पश्चात्तापसमन्वित ।
पत्नी पुत्रान् परित्यज्य प्रायश्चित्त समाचरेत् ॥
—(p 688)

120. राज्याक्रान्त जनाक्रान्त क्षेत्र विवर्धित यदि ।
तदा प्रतिग्रह कृत्वा यावन्मात्रेण जीवनम् ॥
तावत् प्रतिग्रहेद् विप्रो राजस्तस्मात्र दोषभाक् ।
—(p 694)

शुचिनाय द्विजाय धान्याचलमनुत्तमम् ।
124 अर्चितं शास्त्रमार्गेण पुण्यतीर्थेषु पर्वसु ॥
यो दद्यात् पृथिवीनाथ स गच्छेद् विष्णुमन्दिरम् ॥
—(p. 702)

यावन्न पतिता राजन् निम्नाचीहता भूमि ।
तावन्ति पापनाशानि प्रतीतुर्नात्र संशय ॥
128 अतो विप्रसुतां च गर्हेण तत् परिग्रह ।
यथोक्तेनमनसा शुद्धि निगमान्तनिगदात् ॥
अनुव्रतोद्विजेन्द्राणां मनसा हरिस्मरन् ।
नद्यां समुद्रगामिन्यां प्रात स्नात्वा यथाविधि ॥
132 नित्यकर्म समाप्याशु स्वगृहे देवसन्निधौ ।
स्वगृह्याग्नि प्रतिष्ठाप्य आज्यभागान्तमाचरेत् ॥
स्वगृह्येणैव मन्त्रेण त्रिगोत्राभिमिश्रिते ।
आसायं जुहुयाद् यदो सावत् संख्यां समुद्वहन् ॥
136 विमुच्य च तदा होम समग्नि न त्यजेत् बुध ।
अश्वस्थान् विगत् पुत्रा स्वर्गदेवगृहे गुरु ॥
परेद् ममन्यस्य पूर्ववद्धोममाचरेत् ।

तदन्ते भुवमासाद्य श्वेतरोगी दरिद्रक ।
448 पत्नीपुत्रपरित्यागी दु खित स्यात् पुन पुन ॥
—(pp 708 709)

पुण्यतीर्थेषु पुण्याहे जन्मर्क्षे जन्मसम्भवे ।
दत्ता राजभिर्गन्धधूपैरर्चिता तिलरूपिणीम् ॥
यो द्विज प्रतिगृह्याशु न कुर्यान्निष्कृतिं शुभाम् ।
तस्यैव मृत्युरायाति अनुभूय महद् भयम् ॥
452 पश्चात् पापी महान् घोरो निष्पुत्रो रोगवान् भवेत् ।
तिला सन्तीह यावन्तो ह्यजिने धेनुवत्सयो ॥
तावद्युगसहस्राणि नरके वासमश्नुते ।
456 तस्येह नित्यकर्माणि क्षरन्ते तत्प्रतिग्रहात् ॥
तस्मात् प्रतिग्रहो धेनोर्निष्कारणतया नृप ।
गर्हितो सुखकामा हि तस्मादेतत् परित्यजेत् ॥
—(pp 715-716)

घृत्वा नवमयीं धेनुं द्विजो योगपरायण ।
460 अर्चिता प्रभुभिर्दत्ता शास्त्रपूतेन वर्त्मना ॥
यागादिकं पराकृत्य पराहृत्य च निष्कृतिम् ।
पुण्यतीर्थे पुण्यदेशे पुण्यकालेषु पर्वसु ॥
निष्कारणतया लोभाद्यमलोकमुपागत ।
464 महद्भय तदा भुक्त्वा पुनर्भुवमुपाविशन् ॥
पिशाचजन्मतामेत्य जायते स्वेददेहवान् ।
अत प्रतिग्रहस्तस्य गर्हितो लोकवर्जित ॥
—(p 721)

द्विजो दुग्धमयीं धेनु प्रतिगृह्य जनाधिपात् ।
468 यागादिक प्रकुर्वीत पञ्चगव्यं पिबेत्तत ॥
अकृत्वा द्रव्यलोभेन अशक्त पापभीस्तदा ।
पञ्चचान्द्रायणे शुद्धो नान्यथा तीर्थसेवया ॥
—(p 726)

धेनुं गुडमयीं गन्धवस्त्रादिभिरलङ्कृताम् ।
472 पुण्यकाले पुण्यतीर्थे पुण्यक्षेत्रे नदीतटे ॥
यो गृह्णन् पृथिवीपालाद् ब्राह्मणो धनलोभत ।
यमलोकमुपागम्य पीडितो यमकिङ्करै ॥

भिक्षुजातिर्भवेद् भूमौ यागादिषु पराङ्मुख ।
476 प्रायश्चित्तमिद कुर्यात् पश्चात्तापसमन्वितः ॥
विप्रानुज्ञामवाप्याशु प्रात स्नात्वा यथाविधि ।
इम करिष्ये नियम प्रायश्चित्त विशुद्धये ॥
इत्युक्त्वा तप आतिष्ठेत् हेमन्ते शीतसङ्कुले ।
480 अनाधारस्तथा तिष्ठेत् यावत् प्रात पुनर्भवेत् ॥
प्रातरारभ्य मेधावी स्मरेन्नारायण विभुम् ।
चतुर्थे काल आयाते यावक भोजन चरेत् ॥
पुनरस्तगते भानौ पूर्ववज्जपमाचरेत् ।
484 अपमृत्यु जप मन्त्र न्यास च ध्यानपूर्वकम् ॥
एव त्र्यहद्वयं नीत्वा पञ्चगव्यं पिबेत्तत ।
एव कृते विशुद्ध स्यान्नान्यथा शुद्धिमाप्नुयात् ॥
—(p 737)

पुण्यकाले पुण्यदिने साक्षे कृष्णाजिने तिलान् ।
488 निक्षिप्य विप्रवर्याय यो दद्यात् स तु पुण्यभाक् ॥
—(p 744)

धृत्वा प्रतिकृतिं विप्र सततन्तुपराङ्मुख ।
तत्प्रतिग्रहशुद्ध्यर्थं कुर्याच्चान्द्रायणत्रयम् ॥
निरन्तरमहोरात्रं जपन्नारायणं विभुम् ।
492 स्वपेच्च देवतागारे स्थण्डिले केवले वसन् ॥
कवल भक्षयेच्चात रविर्मन्दायते तदा ।
एव मासत्रये पूर्णे शुद्धो भवति पातकात् ॥
आधाने वा प्रकुर्वीत ऋणनिर्मोचन तथा ।
496 द्वयोरभावे होमार्थं प्रायश्चित्तमिद चरेत् ॥
तत्रापि च पुन कर्म शुद्धिमाप्नोति नान्यथा ।
—(pp 751 752)

जनस्य मरणे प्राप्ते यमो मृतगणै. सह ।
एति तदा तु पापानि सर्वीभूयोद्भवन्त्यत ॥
500 भूतप्रेतपिशाचाद्या मृतशय्यावहि स्थिता ।
केचिद् दृष्टपथ याता केचित् प्रेता हसन्त्यलम् ॥
म्रियमाण ततो दृष्ट्वा त्रासयन्ति तथापरे ।
मरणान्ते तथा राजन् तच्छवास्पृश्यता भवेत् ॥

504 तत्पुत्रादि स्थिता शय्या दिव्यायाध्यात्मवेदिने ।
दद्याद् द्वादशमे दिवसे मृत स्वर्गमवाप्नुयात् ॥
वह्वीभिर्दक्षिणाभिश्च तोषयेद् द्विजवल्लभम् ॥
—(pp 752 753)

अनर्गलतया यत्र संचारो गोशतस्य च ।
508 रात्रौ यावान् प्रवेश स्यात् सवत्साना नृपोत्तम ॥
स तु द्वादशमानेन गोचर्मेति प्रकीर्तित ।
त देश विप्रवर्याय अर्चिताय कुटुम्बिने ॥
यागासक्ताय यो दद्यात् स वै नारायण स्मृत ।
512 पुनर्भुवमुपागम्य मण्डलाधिपतिर्भवेत् ॥
—(p 754)

षट्पदा द्विमुखी धेनु सोपस्करसदक्षिणाम् ।
सूयमाना जनो धृत्वा याति मृत्युवश क्षणात् ॥
नरकानुभव कृत्वा नारीजन्म समश्नुते ।
516 केचिद् सस्कारमिच्छन्ति उभयतोमुखीग्रहे ॥
स्त्रीत्वाच्च दोषबाहुल्यात् प्रायश्चित्तविधानत ।
लक्षत्रयेण गायत्र्या शुद्धिमाप्नोति दैहिकीम् ॥
यागादिभ्रशने तात प्रायश्चित्तमिद चरेत् ।
520 प्रायश्चित्तेन पूतात्मा प्रधान सपरित्यजेत् ॥
अनेन विधिना शुद्धिर्न तीर्थैर्न जलादिभि ।
—(p 759)

द्विजो य श्रुतिसम्पन्न प्रतिग्रहपरायण ।
उत्क्रान्तिकाले तन्नाम्नीं धेनु धत्ते स दोषभाक् ॥
524 नरकाननुभूयाशु दरिद्री भुवि जायते ।
अन्नवस्त्रपरिक्षीण सदारो बहुत्रपत ॥
किं करोमि क्व गच्छामि किं वा शरणमाश्रये ।
इति वदन् स नित्यमेतद् दारिद्र्यलक्षणम् ॥
528 दारिद्र्य मरणात् कष्ट दरिद्रो न हि पूज्यते ।
वृथा जन्म दरिद्रस्य दरिद्रस्य गुणो वृथा ॥
तत्रापि बाल्दारिद्र्य क्षणमात्र न शक्यते ।
—(p 760)

यमलोके महाघोरे सरिदङ्गाररूपिणी ।
532 षष्टियोजनविस्तीर्णा शतयोजनमायता ॥
सा नदी पापिनो दृष्ट्वा ज्वलतीव सदा रुषा ।
दृष्ट्वा पुण्यतमाश्चैव शान्तिमाप्नोति तत्क्षणात् ॥
पापिन पापकर्माण पुण्यवान् पुण्यमाचरन् ।
536 पापी नरकमाप्नोति पुण्यवान् पुण्यलोकवान् ॥
पुण्य सुखार्थी कुर्वीत दु खार्थी पापमाचरेत् ।
—(p 761)

दुष्टनक्षत्रजातस्य शान्तिकर्मणि यो द्विज ।
आचार्यत्व यदा कुर्यात् गौर्वापि प्रतिगृह्यते ॥
540 तस्यैव नरके वास कालसूत्रे महत्तरे ।
तदन्ते सुखमासाद्य पापषण्ढत्वमवाप्नुयात् ॥
तद्दोषपरिहारार्थं प्रायश्चित्त चरेत्तदा ।
प्रायश्चित्तेन पूतात्मा शुद्धिमाप्नोति पार्थिव ॥
544 स्वाध्यायदिवसे राजन्नुपविश्य सुखाश्रमे ।
तथा पारायणं प्रोक्त दशरात्रमतन्द्रित ॥
तत परमुपोष्यैव पञ्चगव्येन शुद्ध्यति ।
—(pp 769-770)

अद्भुतेष्वेषु दृष्टेषु तच्छान्तिषु द्विजोत्तम ।
548 आचार्यत्व यदा कुर्यात् तदा पाप समश्नुते ॥
सत्पद्रव्ये प्रधानस्य प्रतिमास परिग्रहे ।
यथोक्तप्रतिमादाने दोषाधिक्य भवेत्तदा ॥
व्याघ्रो भवति देहान्ते सर्वप्राणिविहिंसक ।
552 अतस्तद् दोषशान्त्यर्थं प्रायश्चित्त समाचरेत् ॥
यथोक्तप्रतिमादाने सार्धं दक्षिणया तथा ।
चान्द्रायणद्वय कुर्यात् तदभावे प्रतिग्रहे ॥
अतो न्यून न सर्वत्र विप्रश्चान्द्रायण चरेत् ।
—(p 774)

556 दुष्टग्रहादिपीडाया जन्मनक्षत्रसंगमे ।
जन्मभे च कुजो यस्य शनिर्वा पाप एव वा ॥
तदा तस्य महद् दु ख भवेद्देतस्य संग्रहे ।
तदा राजा प्रकुर्वीत कनकाज्यनिरीक्षणम् ॥
560 ब्राह्मणाय सुवान्ताय दरिद्राय कुटुम्बिने ।

बहुदक्षिणया दत्त्वा तस्माद् दोषात् प्रमुच्यते ॥
—(p 779)

प्रायश्चित्ताङ्गिनी धेनु सा प्राच्यागमुदीरिता ।
सर्वदा न प्रतिग्राह्या द्विजैर्धर्मपरायणै ॥
—(P 780)

564 गृह्यमाणा न गृह्णीयाद् द्विज पापभयादिह ।
गृह्णीयाद् यदि लोभात्मा यमलोक समश्नुते ॥
स्थित्वा तत्र चिर कालमनुभूय महद्भयम् ।
पुनर्भुवमुपागम्य गोराङ्गो भवेदिह ॥
—(p 783)

568 यस्य राज्ञ प्रभोर्वापि जन्मर्क्षे नागमेऽपि वा ।
कालचक्ररथाद् रावन् सर्वभद्रावसानत ॥
पचग्रहा प्रमेलन्ते जन्मराशाश्रयात्मगे ।
चतुर्थे द्वादशे वाऽपि सप्ताते ससुदायके ॥

572 धनहानिर्यशोहानिर्गृहक्षेत्रापहारणम् ।
देहपीडा भवेत्तस्य मासेऽर्धमासतोऽपि वा ॥
तस्मात्तेषा प्रकर्तव्य शान्तिकर्म सुखाप्तये ।
तत्राचार्यो भवेद्यस्तु विद्वानपि विमूढधी ॥

576 होमे जपे च पूजाया उपचारी भवेदिह ।
मन्त्रमुच्चार्य मनसा स्वाहान्ते जुहुयाद्धवि ।
अङ्गुष्ठानामिकाभ्या च समिन्मध्य प्रगृह्य च ॥
मन्त्रान्ते जुहुयाद्वह्नौ समिद्धोमो विधीयते ।

580 अंगुलपश्च गृहीत्वा तु मुष्टिमिश्र तिलैर्युताम् ॥
समिध जुहुयाद् वह्नौ मनसा मन्त्रमुच्चरन् ।
स्वाहान्ते देवतोद्देशे कुर्याद्धोमफलाप्तये ॥
मार्जने मोक्षन होमो दानमुत्तानपाणिना ।

584 अर्चने देवपूजासु मोक्षण चाप्येवमेव च ॥
उत्तानपाणिना कार्यं नाधोरूपेण कारयेत् ।
षष्टिवीजैर्वा-यहोमैराज्येन चतुरङ्गुलम् ॥
फलाहुतिं सुवे पूर्वे वह्नौ हुत्वा महेशिक ।

588 अनुलोमेन यजन यजन मेहल्यने ।
द्विधा चिन्तेन मजहं तत्सर्वं निष्फलं भवेत् ॥
—(pp 786 787)

पत्नीपाप पतिर्भुङ्क्ते शिष्यपाप गुरुस्तथा ।
राजा राष्ट्रकृत पाप राजपापं पुरोहित ॥

592 आचार्यऋत्विजा पाप ग्रामणीर्ग्रामसभवम् ।
आचार्यपापबाहुल्यादज्ञानाधेनुसमहे ॥
पापबाहुल्यमस्त्येव आचार्यस्य न सशय ।
यद्याचार्यो भवेदस्मिन् प्रायश्चित्त चरेद् गुरु ॥
—(p 787)

596 राशिचक्र द्विजो धृत्वा पूजित वस्त्रभूषणै ।
विना निमित्तैर्बहुभि पाप मनसि धारयन् ॥
तन्निष्कृतिमकृत्वा तु नरक कालचोदित ।
अनुभूय महद्दु स चक्रवाको भवेद् भुवि ॥
—(p 788)

600 सामान्य यत्र यत्प्रोक्त प्रायश्चित्त द्विजोत्तमै ।
तदेव पूर्वजाना स्यात् प्रायश्चित्त विशोधनम् ॥
तद्द्वैगुण्य बाहुजानामूरुजाना त्रिधा स्मृतम् ।
चातुर्गुण्य पादजाना सकराणा तु पचधा ॥

604 चतुर्दशविधाना तु समहे पतितोभवेत् ।
—(p 791)

सोमविक्रयिणश्चैव धर्मविक्रयिणस्तथा ।
स्मृतिविक्रयिणश्चैव पुन सस्कार उच्यते ॥
—(p 792)

बन्धुभि सह सगम्य पीत्वा सोमं महाक्रतौ ।

608 स्वमन्त्रोच्चारण कृत्वा त्रिवारं शुद्धिमाप्नुयात् ॥
—(p 794)

देवलकश्च गणको ग्रात्यो दु शीलवान् जन ।
शूद्रापति कर्महीन लोको कुत्सितवृत्तिमान् ॥
महापातकिन सर्वे क्षयरोगी भगन्दरी ।

612 दुश्चर्मा शूद्रसेवी च भिषक् शूद्रान्नभक्षक ।
वृथातुलादिसग्राही मर्यादाघातकस्तथा ॥
ग्रामदाही ग्रामणीश्च तथा दु सगवान् जन ।
—(p 797)

अनर्हाणामध्वरेषु ये ब्रह्मऋत्विजादय ।

616 तेषा पापविशुद्ध्यर्थं षडब्द कृच्छ्रमीरितम् ॥

केशानां वपनं कृत्वा पुनः संस्कारमाचरेत् ।
पञ्चगव्यं पिबेत् पश्चात् शुद्धो भवति नाऽन्यथा ॥
—(p 799)

अज्ञात्वा सुवर्णं यत्र सुह्रद्भ्योऽभ्य आदरात् ।
620 सुवर्णमात्रं गृह्णीयात् प्राजापत्यं समाचरेत् ॥
तदर्थार्धं पुनः कृत्वा दिनमात्रमुपोषणम् ।
कृत्वा शुद्धिमवाप्नोति शुद्धिर्नाऽन्यत्र दृश्यते ॥
—(p 802)

न पिता न गुरुर्भ्राता पितृव्यश्च पितामह ।
624 न दद्याद्देवीं गायत्रीं पुनः संस्कारकर्मणि ॥
मोहाद् दत्त्वा तु गायत्रीं षडब्दं कृच्छ्रमाचरेत् ।
तेभ्यो गृह्णन् द्विजो यस्तु सुवर्णं पादमेव वा ॥
स प्रतिग्रहशुद्ध्यर्थं प्राजापत्यं समाचरेत् ।
628 यदा प्रतिग्रहस्त्वेषु तुलादिषु महत्स्वपि ॥
दानेषु पुत्रवात्सल्यं संत्यजेद् बुद्धिमान् पिता ।
नित्यनैमित्तिकानीह कर्माणि विफलान्यथ ॥
कर्मभ्रंशात् पिता तस्य न जपेद् वेदमातरम् ।
632 कृते प्रतिग्रहे मूल्यैरन्यगोत्र द्विजोत्तमम् ॥
अभ्यर्च्य गन्धवस्त्राद्यैस्तस्माद् देवीं समभ्यसेत् ।
ब्रह्मोपदेश होमेन सर्वं तेन समभ्यसेत् ॥
—(p 804)

वेदमाता च गायत्री जपता पापनाशनी ।
636. परार्थं तां जपेद्यस्तु स नरो मातृघातक ॥
—(p 806)

अकृत्वा निष्कृतिं याग वृत्तिदानं द्विजन्मनाम् ।
जनपदं योऽनुगृह्णीयात् ताम्रचूडो भवेद् भुवि ॥
ग्रामान्यप्रतिग्रहे चण्डालादिनिरूपिते ।
640 प्रतिग्राही द्विजो यस्तु स भवेद् वायसो भुवि ॥
पल्लीप्रतिग्रहे राजन् नानावर्णसमाकुले ।
नरकं त्वनुभूयाऽथ खरजन्म भवेद् भुवि ॥
अब्दं षडब्दं चान्द्रं च तप्तकृच्छ्रशतत्रयम् ।
644 प्रायश्चित्तमिदं राजन् यथाक्रममुदीरितम् ॥

वृत्तिदानकृतभावे प्रायश्चित्तं विशोधनम् ।
—(p 808)

प्रायश्चित्ते कृते शान्तौ प्रतिष्ठासु मुनीश्वराः ।
तत्फलाऽऽरामप्रासादा तत्तत्पुण्यप्रपूर्तये ॥
648 दशदानानि विप्रेभ्य देयानि फलमस्त्यथा ।
—(p 810)

चतुष्पलप्रमाणेन मूर्तिं केशवरूपिणीम् ।
सुवर्णेनैव यो राजा निर्मितां लक्षणान्विताम् ।
विप्राय वेदविदुषे दरिद्राय कुटुम्बिने ।
652 अर्चितां गन्धवस्त्राद्यैः पूजितां सामभिः पृथक् ॥
दद्यात् पुण्यदिने प्राप्ते स याति परमां गतिम् ।
केशवं पलमानेन सुवर्णेन विचक्षण ॥
पूजयित्वा विधानेन दद्याद् विप्राय धीमते ।
656 स्वर्णं विमानमारुह्य अप्सरोगणसेवित ॥
प्राप्नोति वैष्णवस्थानं पुनरावृत्तिदुर्लभम् ।
केशवं प्रतिगृह्णीयात् सौम्य विप्रो धनातुर ॥
दत्त नृभिर्विधानेन निष्कारणतया नृप ।
660 अकृत्वाऽऽधानमपि वा कुर्यात् स्वोदरपोषणम् ॥
तस्यैव निष्कृतिर्दृष्टा स्नात्वा नित्यं समाप्य च ।
रह स्थानमुपाविश्य नामत्रयजपं चरेत् ॥
मासं दीक्षामुपाश्रित्य भुञ्जन् यावकमुत्तमम् ।
664 प्रत्यह स्थण्डिले सुप्तो मासमात्रेण शुद्ध्यति ॥
जपेल्लक्षं ततः पूत शुद्धो भवति सर्वदा ।
—(pp 812-813)

प्रतिगृह्य द्विज शंखं देवपूजार्थमादरात् ।
सलक्षणं च शुद्धं च पुण्यकालेषु पर्वसु ॥
668 विक्रयेद्यदि मोहात्मा यमलोकं समश्नुते ।
शङ्खदर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥
तं विक्रयित्वा मोहेन स पापी न भवेत् किमु ।
तस्यैव निष्कृतिरियं कथिता मुनिवल्लभे ॥
स्नात्वा हरिदिने शुद्धे कृतं पापमनुस्मरन् ।
672 उपविश्य शुचौ देशे विष्णोर्नाम्नां सहस्रकम् ॥

प्रातरारभ्य नियतो यावत् सूर्योदयो भवेत् ।
तावज्जपित्वा नामानि परेद्युरुदये व्रजेत् ॥
676 स्नात्वा पुनस्तु द्वादश्यां पञ्चगव्यं पिबेन्मुदा ।
पारणं च सत कुर्यात् शुद्धिमाप्नोति पौर्विकीम् ॥
—(pp 821-22)

ग्राम यदि द्विजो लोभात् निगृह्यात् कारण विना ।
पुण्यकालेषु पुण्यर्क्षे व्यतीपाते च वैधृतौ ॥
680 मृत्वा नरकमाप्नोति वृद्दण्ड स जायते ।
—(p 824)

योगे हरिहरे विप्र प्रतिगृह्य धनातुर ।
स तु पाप महद् घोर भनुभूय तदा तदा ॥
स्थावरत्व व्रजेल्लोके यावदामृतसम्प्लवम् ।
684 प्रायश्चित्तमिद राजन् मुनिभि परिकीर्तितम् ॥
अन्य धर्मं परित्यज्य वह्नास्थानमुपागमत् ।
हैरवुज्ञामवाप्याथ कुर्याच्चान्द्रायणद्वयम् ॥
उपोष्य रजनीमेका पञ्चगव्येन शुद्ध्यति ।
688 तेन शुद्धिमवाप्नोति न दानैर्ब्राह्मणार्चनै ॥
—(p 830)

भर्तार हन्ति या नारी गृहदाहादिभिर्वधै ।
परेणैरणया वाऽपि सा नारी भर्तृघातिनी ॥
—(p 840)

क्षीणामहरह पापं स्मरणाद् दृष्टिनस्तथा ।
692 नश्यत्वं याति राजेन्द्र मासि मासि रज स्रवात् ॥
परसंसर्गजो दोषो न क्षीणत्वमवाप्नुयात् ।
तदपि क्षीणतां याति गर्भे त्यागो विधीयते ॥
—(p 842)

ज्येष्ठो यद्यगृहीत स्यान्मूढोऽपस्मारवान् यदि ।
696 तदनुज्ञामवाप्याऽन्य तरुण परिकल्प्य च ॥
स्नातकादि मत कृत्वा कदस्याय विवाह च ।
द्वितीय परिणयेच्च मन्यथा पतितो भवेत् ॥
एवं न शास्त्रदोष स्यात् अहो भवति लौकिक ।
700 तौ तस्त्री तयोर्दारा पतिता स्युर्न सशय ॥

दाने क्रियन्ते काम्ये न कर्मार्हा भवन्ति ते ।
तस्मादेतत् परित्याज्यं दर्शन भाषण तथा ॥
परिग्रह परित्याज्य विप्रैर्धर्मपरायणै ।
704 तथापि लोभवान् विप्र कुर्याच्चेत् तत्परिग्रहम् ॥
न तेन शुद्धिमाप्नोति सुराभाण्डोदक यथा ।
यागार्थं भरणार्थं वा कुरुते य परिग्रहम् ॥
पराककृच्छ्रमात्रेण स शुद्ध्येत्र तदरुणम् ।
708 यागार्थं धनबाहुल्ये ततकृच्छ्रशत चरेत् ॥
पराकस्त्वल्पमात्रेण अलबले तदर्पत ॥
—(p 845)

पुराण धर्मशास्त्र च स्मृति काव्य सनाटकम् ।
पुण्यकालेषु सक्रान्तौ ग्रहणे चन्द्रसूर्ययो ॥
712 यो दद्याद् विप्रवर्याय स भवेत् सर्वशास्त्रवित् ।
द्विजो य प्रतिगृह्णाति द्रव्यलोभात् सरस्वतीम् ॥
सोऽपि जन्मान्तरे राजन् विद्यावान् सम्प्रजायते ।
प्रतिग्रहधनार्द्ध तु विक्रयित्वाऽऽत्मजीवनम् ॥
716 कुर्याद्यदि स पापात्मा प्राजापत्यत्रय चरेत् ।
उपोष्य रजनीमेका पञ्चगव्य पिबेच्छुचि ॥
अन्यथा दोषमाप्नोति जात्यो भवति भूतले ॥
—(p 846)

यस्त्यजेत बुलजा साध्वी लोकवार्तापरायण ।
720 तस्य वै निष्कृतिर्नास्ति नपुंसकमवाप्नुते ॥
—(p 863)

मेरुमन्दरपापानि गुरुहत्या महान्ति च ।
रुद्रकाशी हरेत्तानि न कन्याद्रव्यविक्रयी ॥
मूल्याऽथ विक्रयेयस्तु वृथाभोगेप्सया नृप ।
724 उभयो समने जात पतन्ति कृच्छ्रमाचरेत् ॥
प्रतिग्रहे तदर्धं स्यात् विक्रये पूर्णमाचरेत् ।
—(p 866)

धेनु य प्रतिगृह्णाति निमित्तैर्मुनिभिर्द्विना ।
पुण्यकाले पुण्यतीर्थे वस्त्रादिभिरलङ्कृताम् ॥
728 सवत्सा दोहसंयुक्ता मुक्ताहारोपशोभिताम् ।

ताम्रपृष्ठीं स्वर्णशृङ्गीं स्वर्णघण्टोपशोभिताम् ॥
सुभूषा साधुवृत्ता च धेनु राज सुखासये ।
महापापफल भुक्त्वा नरकायोपपद्यते ॥
तस्माद्धेनुस्तु न ग्राह्या द्विजैरध्यात्मवेदिभि ।

—(p 869)

6 पराशरमाधव

(आचारकाण्ड)

तद्वारि तत्र सगुण ग्रसते हव्यवाहन ।
इन्द्रियाणि तु सर्वाणि तैजसे यान्ति सक्षयम् ॥

—(p 87) [cf KP 2 44 15ab, 17ab]

अहिंसा सत्य वचनमानृशस्य दमो घृणा ।
एतत्तपो विदुर्धीरा न शरीरस्य शोषणम् ॥

—(p 118)

दद्यादहरह श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्वापि पितृभ्य प्रीतिमावहन् ॥

—(p 345) [cf Manu Smr 3,82]

अग्नीनात्मनि सस्थाप्य द्विज प्रव्रजितो भवेत् ।
योगाभ्यासरत शान्तो ब्रह्मविद्या परायण ॥

—(p 538) [=KP 2 28 2]

प्राजापत्या निरूप्येष्टिमाग्नेयीमथवा पुन ।
अन्त पक्वकषायोऽसौ ब्रह्माश्रममुपाश्रयेत् ॥

—(p 539) [cf, KP 2 28 4]

पूर्वरात्रे पररात्रे च मध्यरात्रे तथैव च ।
सन्ध्यास्वह्नि विशेषेण चिन्तयेन्नित्यमीश्वरम् ॥

—(p 568) [=KP, 2 29 10]

7 कालमाधव

प्रदोषव्यापिनी यत्र त्रिमुहूर्ता यदा दिवा ।
तदा नक्तमस कुर्यात् स्वाध्यायस्य निषेधवत् ॥

—(p 108)

तिथौ प्रणाद्दपायाद्य समुपोष्य यथाविधि ।
शालपालादिनागाना दोषस्य च महात्मन ॥

पूजा कार्या पुष्पगन्धक्षीराप्यायनपूर्वकम् ।
विषाणि तस्य नश्यन्ति न च तान् घ्नन्ति पन्नगा ॥

—(p 149)

नन्दा विद्धा तु या पूर्णा द्वादशी मकरे सिता ।
भृगुणा नष्टचन्द्रा च एता वै निष्फला स्मृता ॥

—(p 189)

वदन्तीह पुराणानि भूयो भूयो वरानने ।
न भोक्तव्य न भोक्तव्य सम्प्राप्ते हरिवासरे ॥

—(p 191)

यदीच्छेद् विष्णुसायुज्यं श्रिय सन्ततिमात्मन ।
एकादश्या न भुञ्जीत पक्षयोरुभयोरपि ॥

—(p 192)

द्विस्पृगेकादशी यत्र तत्र सन्निहितो हरि ।
तामेवोपवसेत् काम अकामो विष्णुतत्पर ॥

—(p 207)

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
उपवास न कुर्वीत पुत्रपौत्रसमन्वित ॥

—(p 208)

एकादश्या न भुञ्जीत पक्षयोरुभयोरपि ।
वानप्रस्थो यतिश्चैव शुक्लामेव सदा गृही ॥

—(p 209)

सक्रान्त्या कृष्णपक्षे च रविशुक्रदिने तथा ।
एकादश्या न कुर्वीत उपवास च पारणम् ॥

—(p 210)

एकभक्तेन नक्तेन क्षीणवृद्धातुर क्षिपेत् ।
नातिक्रमेद् द्वादशीन्तु उपवासव्रतेन च ॥

—(p 212)

कास्यं मासं मसूराश्च चणकान् कोरदूषकान् ।
शाक मधु परान्नं च त्यजेदुपवसन् स्त्रियम् ॥

—(p 215)

काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।
तत्र काम्यव्रत कुर्यात् दानार्चनविवर्जितम् ॥

—(p 219)

8. स्मृतिरत्नाकर

पुनर्वसुबुधोपेता चैत्रमासे सिताष्टमी ।
तस्यां नदीषु स्नातस्तु वाजपेयफलं लभेत् ॥
—(p 57)

प्रातर्मन्त्रवदाचम्य प्रोक्ष्य सूर्याय चाञ्जलिम् ।
4. दत्त्वा प्रदक्षिणं कृत्वा द्विराचम्य यथाविधि ॥
—(p 78)

9. नित्याचारपद्धति

सर्वत्र सागरः पुण्यः पञ्चस्थानेषु मोक्षदः ।
गङ्गासरस्वतीसिन्धुसेतुश्रीपुरुषोत्तमे ॥
—(p 107)

10 मदनपारिजात

सुस्थस्य ब्राह्मणं स्नानं ब्राह्मं व्याधौ जलक्षये ।
दिव्यं श्रद्धावतां पुण्यं वायव्यमुपवासिनाम् ॥
—(p 272)

षष्ठीरात्रिं त्यजेदग्निं प्रमादात् शृणु मे विभो ।
4. उपवासं तथा कुर्यात् मासपक्षमथापि वा ॥
—(p 878)

11. नित्याचारप्रदीप

नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः ।
कामविद्धो भवेद् विष्णुर्न ग्राह्यास्ते तु वासराः ॥
—(p 80)

नरस्य द्विगुणा छाया मत्तिकामेद् यदा रविः ।
4. तदा सौरं चरेन्नक्तं न नक्तं निशि भोजनम् ॥
उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद् रविः ।
युज्यते यत्र तिथिर्वा शशिना सहितं यदा ॥
—(p 85)

देशान्तरमृते चैव क्लीबे वैखानसे यतौ ।
8. सद्यः शौचं समाख्यातं स्वाध्यायादिग्रहणे तथा ॥
—(p. 132)

12. तीर्थचिन्तामणि

पुत्रदारांश्च लभते धार्मिकान् रूपसंयुतान् ।
—(p 45)

गङ्गातोयेषु यस्यास्थि नीत्वा संक्षिप्यते नरैः ।
वर्षाणां तु सहस्राणि तस्य स्वर्गे भवेत् स्थितिः ॥
—(p 264 65)

13. कालसार

'कांस्यं मांसं मसूरांश्च चणकान् कोरदूषकान् ।
'शाकं मधुपरान्नं च वर्जयेदुपवासकृत् ॥
—(p 54)

बहिर्ग्राम्यान्त्यजान् सूतं पतितं च रजस्वलाम् ।
4 न स्पृशेन्नापि भाषेत नेक्षेत व्रतवासरे ॥
स्त्रीणान्तु प्रेक्षणात् स्पर्शात् ताभिः संकथनादपि ।
निःस्पन्दते ब्रह्मचर्यं न दारेष्वृतुसङ्गमात् ॥
—(p 54)

या तु मार्गशिरे शुक्ला महाषष्ठी नराधिप ।
8 देवद्विजसुहृद्भ्यश्च शीतान्नं तत्र दापयेत् ॥
—(p 84)

शुक्लाष्टमी कार्तिके तु स्मृता गोपाष्टमी बुधैः ।
तद्दिने वासुदेवोऽभूद् गोपः सर्वैश्च वत्सपः ॥
तत्र कुर्यात् गवां पूजां गोग्रासं गोप्रदक्षिणम् ।
12 गवानुगमनं कार्यं सर्वपापविशुद्धये ॥
—(p 115)

यदीच्छेद्विष्णुसायुज्यं श्रियं सन्ततिमात्मनः ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥
—(p 127)

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
16 वानप्रस्थो यतिश्चैव शुक्लामेव सदा गृही ॥
—(p 129)

पूर्णाप्येकादशी त्याज्या वर्द्धते द्वितयं यदि ।
द्वादश्यां पारणालाभे पूर्वेव परिगृह्यताम् ॥
—(p 141)

अजातदन्तमरणे पित्रोरेकाहमुच्यते ।
—(p 297)

20. दश नारी पितृगृहे प्रसवे सूयतेऽथवा ।
म्रियेत वा तदा तस्या पिता शुध्येत् त्रिभिर्दिनैः ॥
—(p 311)

काम्यानि चैव श्राद्धानि शस्यन्ते ग्रहणादिषु ।
—(p 593)

ऐन्द्रे गुरुः शशी चैव प्राजापत्ये गते रवौ ॥
24 पौर्णमासी गुरौ ज्येष्ठे महाज्यैष्ठीति सा स्मृता ।
महाज्यैष्ठ्यां च यो गच्छेत् क्षेत्रं श्रीपुरुषोत्तमम् ॥
मन्वन्तराणि यावन्ति कुलकल्पानि तानि तु ।
तत्र गत्वा हरेर्धाम्नि गत्वा तु पुरुषोत्तमम् ॥
28 विश्रम्य विधिवत् स्नायात् प्रति तीर्थेषु चैकशः ।
—(p 600)

मार्गमासि शितीपक्षे सागरे यत्र कुत्रचित् ।
स्नात्वाश्वमेधावभृथस्नानस्य लभते फलम् ॥
—(p 603)

14 नृसिंहप्रसाद—तीर्थसार

अस्मिन्नद् भारते वर्षे वने दण्डकसंज्ञिते ।
तत्र तेपे तपो घोरं गौतमोऽङ्गिरसो द्विजः ॥
चकार तस्य तु ब्रह्मा परितोषं गतः प्रभुः ।
4 उवाच तं मुनिं ब्रह्मन् वरं ब्रूहि तपोधन ॥
एवमुक्तस्तदानेन ब्रह्मणा लोककर्तृणा ।
उवाच सत्य शक्तिं मे धान्यानां देहि पद्मजे ॥
एवमुक्तो ददौ तस्मै तमेवार्थं पितामहः ।
8 वरं लब्ध्वा वरं विप्रारण्ये शुभे महाश्रमम् ॥
चकार तत्राथ दिवं पच्यते शाल्यो द्विजाः ।
तेषां संगमे नूनं भक्ष्यार्थं पच्यते तथा ॥
—(p 48)

स सर्वनिष्पन्नसुखेर् ब्राह्मणेभ्यो ददौ फलम् ।
12. कस्मिंश्चित् त्वथ कालस्य महती द्वादशवार्षिकी ॥
अनावृष्टिः समुत्पन्ना महती लोकदर्पणा ।

ता दृष्ट्वा मुनय सर्वे देव (दैत्य) दारुवनेचराः ॥
क्षुत्क्षया पीड्यमाना प्रययुर्गौतमं तदा ।
16 अथ तानागतान् दृष्ट्वा गौतम शिरसा नतः ॥
उवाच स्थीयतामत्र गृहे भरद्वाजात्मजे ।
एवमुक्तास्तु ते तेन तस्थुर्विविधभोजने ॥
भुञ्जानाश्चाप्यनावृष्टिश्चिरादपि निवर्तिता ।
20. निवर्तितायां तस्यां वै यात्रां ते चक्रिरे द्विजाः ॥
तीर्थयात्रानिमित्तं तु सर्वं एव महर्षयः ।
ते सर्वे सशपं छेत्तुं पृष्ट्वा वर्षसहस्रकम् ॥

शाण्डिल्य उवाच

उपकारं कृतस्तेन शोपयाम पिता गुरुः ।
24 तप्त्वा पृच्छतच्छत्रुं यामत्र निरिशामय (?) ॥
एवमुक्तः तु मेतत्वाद् दत्तवाक्यमनुब्रवीत् ।
तमर्थमनुसचिन्त्य मरीचिः परमो मुनिः ॥

काश्यप उवाच

शाण्डिल्य शोभते वाक्यं पिता ते गौतमो मुनिः ।
28. एवमृषिधर्मरतो ध्याननिष्ठस्तपोधन ॥
—(p 49)

एवमुक्तेऽपि कहसु सर्वं ते मुनयस्तदा ।
किमस्माभिः स्वको दहो निर्गतिश्चान्नभक्षणात् ॥
एवमुक्त्वा पुनस्ते तु गर्वप्रशमनं प्रति ।
32 कृत्वा मायामयीं गां तु तच्छालायां व्यसर्जयन् ॥
तां भवन्तीं ततो दृष्ट्वा मुनिः क्षिप्रगतिस्तदा ।
उवाच गौतमो धीमान् तान् मुनीन् प्रणतः स्थितः ॥
किमर्थं गम्यते विप्र साधु संतत मा चिरम् ।
36 मा विहाय महाभागं प्रपन्नं विशेषतः ॥

ऋषय ऊचुः

गोवध्येयमिमां ब्रह्मन् यावच्छावतरेर्भगान् ।
तावदन्नं न भुञ्जीमो भवतो वै महामुने ॥
एवमुक्तो गौतमस्तु मुनीन् स भद्र धर्मवित् ।
40 प्रायश्चित्तं गोवधस्य दीयतां मे तपोधनाः ॥

ऋषय ऊचुः

इयं गौर्निर्मृता ब्रह्मन् मूर्च्छिता भव्यवाञ्छिता ।
गा चालय ध्रुवं चैषा उत्स्थास्यति न संशय ॥
प्रायश्चित्तं मृता वा स्यादमृतायां कृतं त्विद ।
44 मतद्दानेन मुहूर्तमिथ्युक्त्वा ममयु म्वचित् ॥
गतेषु गौतमो धीमान् हिमवन्तं महागिरिम् ।
समाराधयितुं देवं तेपे च सुमहत्तप ॥
शतमेकं तु वर्षाणां सहस्राराधितो भवम् ।
—(p 50)

ब्रह्मोवाच

48. पृथग् वक्तुं न शक्नोमि न च त्व श्रवणे क्षम. ।
तथापि किंचिद् वक्ष्यामि शृणु नारद यत्नत ॥
यान्यतिव्यक्ततीर्थानि अभिवन्द्यानि यानि वै ।
तानि वक्ष्यामि संक्षेपात्तमस्कृत्य त्र्यम्बकम् ॥
52 यत्रासो भगवानासीत् प्रत्यक्षं त्र्यम्बको मुने ।
त्र्यम्बकं नाम तत्तीर्थं भुक्तिमुक्तिप्रदायकम् ॥
—(p 51)

अश्वतीर्थं महापुण्यं सर्वपापप्रणाशनम् ।
अश्वमेधसमुद्भूता नदी यत्र च सगता ॥
56. स्नात्वा च सगमे तत्र हयमेधफल लभेत् ।
व्याधिभिर्मुच्यते चैव नारी वा यदि वा नर ॥
श्राद्धं तत्र प्रकुर्वीत पितॄणां प्रीतिवर्धनम् ।
—(p 99)

15. वर्षक्रियाकौमुदी

'सक्रान्त्यां कृष्णपक्षे च एकादश्या अहे तथा ।
उपवास न कुर्वीत पुत्रपौत्रधनक्षयात् ॥
—(p 46)

कला काष्ठा मुहूर्तं वा यदि स्यादपरेऽहनि ।
4 द्वादश द्वादशीं हन्ति त्रयोदश्यां तु पारणम् ॥
—(p 52)

मुहूर्तं द्वादशी न स्यात् त्रयोदश्या यदा मुने ।
उपोष्या दशमीविद्धा सर्वैरेकादशी तिथि ॥
—(p 55)

कास्यं मांसं सुरां क्षौद्र हिंसा तैलमसत्यताम् ।
8 द्यूतक्रीडा दिवानिद्रां व्यायामं क्रोधमैथुनम् ॥
द्वादश्यां द्वादशैतानि वैष्णव. परिवर्जयेत् ॥
—(p 63)

गोविन्दद्वादशी नाम महापातकनाशनी ॥
अत्र स्नात्वा तु गङ्गायां ज्ञानाज्ञानकृतानि वै ।
12. विधूय ब्रह्महत्यादिपापान्याप्नोति शाश्वतम् ॥
—(p 514)

आर्षक्रमेण सर्वे तु शूद्रा वाजसनेयिन ।
तस्माच्छूद्र स्वक कर्म यजुर्वेदेन कारयेत् ॥
—(p 575)

16. श्राद्धकौमुदी

आरण्यमहिषीक्षीरं शर्कराशुण्ठीसयुतम् ।
मध्वक्त हि नरो दद्यादमृतमेव तत् ॥ (?)
(p 12)

घृतेन भोजयेद्विप्रान् घृत भूमौ समुत्सृजेत् ।
4 शक्तून् लाजास्तथा पूपान् दत्त्वा सत्कृत्य भोजयेत् ॥
शर्कराक्षीरसंयुक्ता. पृथुका नित्यमक्षया ।
—(p 19)

भिक्षार्थमागतान् वापि काले संयमिनो यतीन् ॥
भोजयेत्प्रणिपाताद्यै प्रसाद्य यतमानस ।
(p 38)

8 आर्षक्रमेण सर्वे तु शूद्रा वाजसनेयिन ॥
तस्माच्छूद्र स्वक कर्म यजुर्वेदेन कारयेत् ।
—(p 76)

भिक्षार्थमागतान् वापि काले संयमिनो यतीन् ॥
—(p 78)

साधुभि सन्निमन्त्रयेत् ।
(p 83)

12 श्राद्धे जात्य: प्रशस्ता स्युर्मल्लिका श्वेतयूथिका ।
जलोद्भवानि सर्वाणि कुसुमानि च चम्पकम् ॥
-(p 142 143)

घृतेन भोजयेद्विप्र घृत भूमौ समुत्सृजेत् ।

—(p 160)

सेतुवृक्षजलादीना प्रतिष्ठासु विशेषत ॥
16 तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्ध विधीयते ॥

—(p 267)

गङ्गायाश्च गयायाश्च पिण्डदाने सम फलम् ।
विशेषत कलियुगे गङ्गापिण्ड प्रशस्यते ॥

(p 269)

विदेशगमनश्चैव तीर्थयात्राश्च मैथुनम् ।
20 महागुरुनिपाते तु वर्ज्जयेद् देवदर्शनम् ॥

—(p 359)

अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके ।
पुसवने निषेके च नववेश्मप्रवेशने ॥
सेतुवृक्षजलादीना प्रतिष्ठासु विशेषत ।
24 तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्ध विधीयते ॥

—(p 490)

17. शुद्धिक्रियाकौमुदी

दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवै ।
शावाशौच न कर्तव्य जन्माशौच विधीयते ॥

—(p 41)

अन्नसत्रप्रवृत्तानामाममन्नमगर्हितम् ।
4 भुक्त्वा पक्वान्नमेतेषा त्रिरात्रन्तु पय पिबेत् ॥

—(p 60)

ब्रह्मशापहतानाञ्च नाशौच नोदकक्रिया ।

—(p 76)

श्राद्धकर्मेण सर्वे च शूद्रा वाजसनेयिन ।
तस्माच्छूद्र स्वय कर्म यजुर्वेदेन कारयेत् ॥

—(p 154)

8 दानञ्च विधिना देयमशुभात्पारक हि तत् ॥

—(p 159)

विदेशगमनश्चैव तीर्थयात्राश्च मैथुनम् ।
10. महागुरुनिपाते तु न कुर्याद् देवदर्शनम् ॥

—(p 187)

18 स्मृतितत्त्व

कन्दुपक्वानि तैलेन पायस दधि शक्तव ।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि ॥

(p 71)

एकादशी प्रवृद्धा चेत् शुक्ले कृष्णे विशेषत ।
4. उत्तरा तु यति कुर्यात् पूर्वामुपवसेद् गृही ॥

—(p 105)

एकादशीमुपवसेत् द्वादशीमथवा पुन ।
विमिश्रा वा प्रकुर्वीत न दशम्या युता क्वचित् ॥
कुर्याद्दिलाभे सयुता नालासेऽपि प्रवेशिनीम् ।
8. उपोष्या द्वादशी तत्र त्रयोदश्या तु पारणम् ॥
उदयात् प्राग् दशम्यास्तु शेष सयोग इष्यते ।
उपरिष्टात् प्रवेशस्तु तस्मात् ता परिवर्जयेत् ॥

—(p 106)

त्रयोदश्या यदा न स्यात् द्वादशी घटिकाद्वयम् ।
12 दशम्यैकादशी विद्धा सैवोपोष्या सदा तिथि ॥

—(p 107)

द्वौ तिथ्यन्तावेकवारे यत्र स्यात् स दिनक्षय ।

—(p 119)

स्वाध्यायस्य त्रयो भेदा वाचिकोपांशुमानसा ॥

—(p 346)

प्रधान पुरुष कालो ब्रह्मविष्णुमहेश्वरा ।
16 सत्त्व रजस्तमस्तिस्र क्रमाद् व्याहृतय स्मृता

—(p 383)

प्राणानायम्य सप्रोक्ष्य ऋचेनाब्दैवतेन च ।

— p 384)

पौरुषेण तु सूक्तेन ततो विष्णु समर्चयेत् ।
वैश्वदेव तत कुर्यात् बलिकर्म तत परम् ॥
20 अपसर्पन्तु ते भूता ये भूता भूमिपालका ।
भूतानामविरोधेन पूजाकर्म करोम्यहम् ॥
अनेन स्थण्डिलाद् भूतान्यपसार्याथ साधक ।
ततो दिग्बन्धने कृत्वा दिग्भ्यस्तानपसर्पयेत् ॥

—(p 398)

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
उपवासं न कुर्वीत पुत्रपौत्रसमन्वित ॥
—(p 844)

द्विस्पृगेकादशी यत्र तत्र सन्निहितो हरि ।
12 पुण्य क्रतुशतस्योक्त त्रयोदश्या तु पारणम् ॥
—(p 844)

एकादश्या न भुञ्जीत पक्षयोरुभयोरपि ।
—(p 845)

यथोत्तरे दक्षिणे वा अयने चैव कीर्तिते ।
तुल्य पुण्यमवाप्नोति द्वादश्योरुभयोरपि ॥
16 सायं प्रातर्यथासन्ध्ये सायं प्रातर्यथाहुती ।
तथा सितासिते पुण्ये द्वादश्यौ धर्मत समे ॥
—(p 845)

एकादश्या न भुञ्जीत पक्षयोरुभयोरपि ।
वनस्थयतिधर्मोऽय शुक्लामेव सदा गृही ॥
— p 845)

20 काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।
तत्र काम्यव्रत कुर्यात् दानार्चनविवर्जितम् ॥
सूतकान्ते नर स्नात्वा पूजयित्वा जनार्दनम् ।
दानं दत्त्वा विधानेन व्रतस्य फलमश्नुते ॥
24 सप्रवृत्तेऽपि रजसि न त्याज्यं द्वादशीव्रतम् ।
पचमेऽहनि शुद्धा स्याद्दैवे पित्र्ये च कर्मणि ॥
—(p 848)

सम कृत्वार्धमासे तु उपवासान् दशाचरेत् ।
पराक मासससर्गे चान्द्रं मासत्रये व्रतम् ॥
28 कृत्वा षाण्माससंसर्गे कुर्याच्चान्द्रायणद्वयम् ॥
किंचिन्न्यूनाब्दससर्गे षण्मास कृच्छ्रमाचरेत् ॥
—(p 898)

अश्वधेनुमनुष्याश्च रासभ कुञ्जरस्तथा ।
कन्या नारी च मेषश्च पुस्तक ब्रह्मसूत्रकम् ॥
32 लवण पलल चर्म लशुन गृञ्जन तथा ।
पिप्पली च मरीचाश्च हरिद्राश्च लवङ्गिका ॥
औषधानि च यावन्ति मत्स्यकुक्कुटशूकरा ।
हिङ्गुचीरकवस्तूनि ताम्र कांस्यादिक तथा ॥
36 एतानि मूल्यै कृत्वा तु स्वल्पैर्वापि ततोऽधिकै ।
विक्रयित्वात्मभरण कुर्याद्यदि स पापभाक् ॥
मृत्वा नरकमासाद्य क्रिमिरूपे पतत्यध ।
तस्मादेतद् विशुद्ध्यर्थं प्रायश्चित्तमिहोच्यते ॥
40 एकवार द्विवारं वा बहुवारमनेकश ।
तप्त पराक चान्द्र च यावकं वर्षमाचरेत् ॥
तस्योपनयन भूय पञ्चगव्येन शुद्ध्यति ।
वृद्धेरपि च या वृद्धिश्चक्रवृद्धिरुदाहृता ॥
44 मासि मासि च या वृद्धि, सा शिखावृद्धिरिष्यते ॥
ताभ्या जीवेद् यदा विप्र स वार्धुषिक उच्यते ।
मास जीवेद्यदा विप्र पराकं कृच्छ्रमाचरेत् ॥
मासद्वये तु तप्त स्यात् चान्द्र मासत्रये स्मृतम् ॥
48 षण्मासे तु महाचान्द्रं वत्सरे द्विगुण स्मृतम् ।
पतित स्यात् पर विप्र सर्वकर्मबहिष्कृत ॥
—(p 917)

22 दानमयूख

कनकाश्वतिला नागा दासीरथमहीगृहा ।
कन्या च कपिला धेनुर्महादानानि वै दश ॥
—(p 164)

पलैक द्विगुण वापि त्रिगुण शक्त्यनुक्रमात् ।
4 कनक स्यात् सुवर्णेन द्वाभ्यां त्रिभि सदक्षिणम् ॥
यत्नादधो वा तत् कुर्याद् दक्षिणा स्याद्यथारुचि ॥
—(p 165)

अश्व तन्मूल्यमथवा कनीयो मध्यमोत्तमम् ।
दद्यात् विधानुसारेण तारागणपरिच्छदम् ॥
8 शफै पञ्चपले रौप्यै सुवर्णालङ्कृत क्रमात् ।
सदक्षिण सवस्त्र च ब्राह्मणायाग्निहोत्रिणे ॥
—(p 166)

द्रोणैक यास्तसाश्च त्रिधा वद्धसदक्षिणम् ॥
आहिताग्नौ द्विजे दत्त्वा सर्वं तरति दुष्कृतम् ॥
—(p 169)

12. तिलपूर्णं ताम्रपात्रं सहिरण्यं द्विजातये ।
प्रातर्दत्त्वा तु विधिवद् दुःस्वप्नं विनिहन्ति सः ॥
तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमम् ।
ताम्रपात्रं दशपलं जघन्यं परिकीर्तितम् ॥
16. द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमम् स्मृतम् ।
स्वर्णमेकं जघन्ये तु द्विगुणं मध्यमे क्षिपेत् ॥
त्रिगुणं चोत्तमे तद्वत् सुवर्णं परिकीर्तितम् ।
सुवर्णं दक्षिणां दत्त्वा सर्वपापक्षयो भवेत् ॥
—(p. 170)

20. दद्याद् गजं पुराणोक्तं मूल्यं पंचशतानि च ।
वित्तानुसारात्तत्रापि कनिष्ठोत्तममध्यमम् ॥
—(p 173)

रथं चतुर्बलीवर्दरूढं धान्यावृतं तथा ।
वित्तानुसारात् सर्वैश्च रथोपकरणैर्युतम् ॥
24. सदक्षिणं च विप्राय दत्त्वा शिवपुरं व्रजेत् ॥
—(p. 175)

गोचर्ममात्रं भूखण्डमधिकं वा स्वशक्तित ।
त्रिधा सदक्षिणां कृत्वा दत्त्वा शिवपुरं व्रजेत् ॥
—(p. 175)

शक्तित सर्वविधेन पूर्णं गृहमपि त्रिधा ।
28. सदक्षिणं द्विजे दद्या (?) ब्रह्मलोकं व्रजेन्नरः ॥
—(p 177)

23. समयमयूख

यदीच्छेद् विष्णुसायुज्यं श्रियं सन्ततिमात्मन ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥
—(p 40)

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
4. वनस्थयतिधर्मोऽयं शुक्लामेव सदा गृही ॥
—(p. 40)

कांस्यं मांसं मसूरं च चणकान् कोरदूषकान् ।
शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रिय ॥
—(p. 41)

24. निर्णयसिन्धु

बहिर्ग्रामान्त्यजान् सूतिं पतितं च रजस्वलाम् ।
न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ॥
—(p. 18)

काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।
4 तत्र काम्यव्रतं कुर्यात् दानार्चनविवर्जितम् ॥
—(p. 21, 140)

न शंखेन पिबेत्तोयं न खादेत् कूर्मशूकरौ ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥
यदिच्छेद् विष्णुसायुज्यं श्रियं सन्ततिमात्मनः ।
—(p. 25)

8. कांस्यं मांसं मसूरांश्च चणकान् कोरदूषकान् ।
शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रिय ॥
—(p. 32)

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन दानेन न निर्द्वादशिको भवेत् ॥
—(p. 32)

12. कालशाकं च वास्तूकं मूलकं कूष्मनालिका ।
—(p. 289)

तमालं शतकन्दं च मध्वालु. शीतकन्दली ।
—(p. 292)

प्रायश्चित्ती भजेत्तीर्थं पत्नीविरहितोऽपि वा ।
यज्ञेष्वनधिकारी वा यश्च वा मन्त्रसाधक ।
—(p 358)

16. यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ।
—(p. 419)

25. वीरमित्रोदय

(पूजाप्रकाश)

अनर्चयित्वा गोविन्दं यैर्भुक्तं धर्मवर्जितैः ।
शुनो विष्ठासमं चान्नं शरीरं च सुरया समम् ॥
—(p. 7)

अतिरम्या अरस्याश्च दुःस्पृश्या गन्धकादयः ।
4. नैवेद्ये तेऽप्ययोग्याः स्युः मोदकाद्याः पुरातनाः ॥

अतिपक्वमपक्वं च सुपक्वं कृमिसंयुतम् ।
दुर्गन्धस्यमसंस्कृतं दुर्गन्धि न शुभं स्मृतम् ॥
—(p 80 81)

मध्याह्ने विधिवत् पूज्य श्रीविष्णुं वैष्णवोत्तम. ।
8 नैवेद्यं शिरसा नत्वा श्लोकमेतदुदीरयेत् ॥
यस्योच्छिष्टं हि वाञ्छन्ति ब्रह्माद्या ऋषयोऽमला ।
सिद्धाद्याश्च हरेस्तस्य वयमुच्छिष्टभोजिन ॥
उच्छिष्टभोजनस्तस्य वयमद्भुतकर्मण ।
12 येन लीलावतारेण हिरण्याक्षो निपातित ॥
—(p 85)

(तीर्थप्रकाश)

गङ्गायां च जले मोक्षो वाराणस्यां जले स्थले ।
जले स्थले चान्तरिक्षे गङ्गासागरसङ्गमे ।
—(p 180)

प्रवेशात्तस्य तद्भूमावश्वमेध पदे पदे ।
(p 229)

16 दशाहाभ्यन्तरे यस्य गङ्गायामस्थिमज्जति ।
गङ्गाया मरणे यादृक् तादृक् फलमवाप्नुयात् ॥
अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपक्षिकम् ।
प्रथमेऽब्दे न कुर्वीत कृतेऽपि हि सपिण्डने ॥
—(p 373)

26. कालतत्त्वविवेचन

नन्दा विद्धा तु या पूर्णा द्वादशी मकरे सिता ।
भृगुणा नष्टचन्द्रा च एता वै निष्फला: स्मृता ॥
—(p 52)

एकभक्तेन नक्तेन बालवृद्धातुर क्षिपेत् ।
4. पयोमूलफलैर्वापि न निर्द्वादशिको भवेत् ॥
—(p 115)

यदीच्छेद् विष्णुसायुज्यं श्रियं संततिमात्मन ।
एकादशीसमं किंचित् पापत्राणं न विद्यते ॥
स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्रप्रदायिनी ।
8 शुक्लपक्षा ह्येषा शरीरारोग्यदायिनी ॥
—(p 119)

बहिर्ग्रामान्त्यजान् सूतिं पतितं च रजस्वलाम् ।
न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ॥
—(p 122)

कांस्यं मांसं मसूरं च चणकान् कोरदूषकान् ।
12 शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियम् ॥
—(p 123)

द्विस्पृगेकादशी यत्र तत्र संनिहितो हरि ।
तामेवोपवसेत्कामानकामो विष्णुतत्पर ॥
—(p 156)

दिनक्षये तु संप्राप्ते उपोष्या द्वादशी भवेत् ।
16 दशमीशेषसंयुक्ता न कुर्वीत कदाचन ॥
—(p 158)

एकादशीमुपवसेद् द्वादशीमथवा पुन ।
विमिश्रां वापि कुर्वीत न दशम्या युतां क्वचित् ॥
कुर्यादलाभे संयुक्तां नालाभेऽपि प्रवेशिनीम् ।
20 उपोष्य द्वादशीं तत्र त्रयोदश्यां तु पारणम् ॥
उदयात् प्राग् दशम्यास्तु शेष प्रयोग इष्यते ।
उपरिष्टात् प्रवेशस्तु तस्मात्तां परिवर्जयेत् ॥
उदयोपरिविद्धा तु दशम्यैकादशी यदि ।
24 दानवेभ्य प्रीणनार्थं दत्तवान् पाकशासन ॥
—(p 160)

दशम्यैकादशी विद्धा गान्धारी तामुपोषिता ।
तस्या पुत्रशतं नष्टं तस्मात् तां परिवर्जयेत् ॥
ये कारयन्ति कुर्वन्ति दशम्यैकादशीयुताम् ।
28 आलोक्य तन्मुखं प्राज्ञ सूर्यदर्शनमाचरेत् ॥
—(p 161)

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
सोपोष्या च प्रयत्नेन महापुण्यविवर्धनी ॥
—(p 162)

एकादशीमुपवसेद् द्वादशीमथवा पुन ।
32 विमिश्रां वापि कुर्वीत न दशम्या युतां क्वचित् ॥
—(p 164)

एकादशी दिवायुक्ता परतोऽपि न वर्धते ।

गृहिभिर्यतिभिश्चैव सैवोपोष्या सदा तिथिः ॥
—(p 165)

प्रदोषव्यापिनी यत्र त्रिमुहूर्ता दिवा यदि ।
तदा नक्तव्रतं कुर्यात् स्वाध्यायस्य निषेधवत् ॥
—(p. 209)

त्वस्य द्विगुणं छायामतिक्रामेद्यदा रविः ।
तदा सौरं चरेन्नक्तं न नक्तं निशि भोजनम् ॥
—(p. 211)

अमावस्या तिस्रोऽष्टकाहितस्रोऽन्वष्टकाः । (?)
—(p 346)

सपिण्डीकरणं कृत्वा कुर्यात् पार्वणवत् सदा ।
प्रतिसंवत्सरं विद्वान् छागलेयोदितो विधिः ॥
—(p 432)

27. निधानपारिजात

निक्षिप्याग्निं स्वदारेषु परिकल्प्यार्त्विजं तथा ।
प्रवसेत् कार्यवान् विप्रस्तथैव न चिरं वसेत् ॥
—(p 84)

पौरुषेण तु सूक्तेन ततो विष्णुं समर्चयेत् ।
वैश्वदेवं ततः कुर्याद् बलिकर्म तथैव च ॥
—(p 270)

तस्मात्त्वाराधिते देवे सर्वमाराधितं भवेत् ।
—(p. 279)

ब्राह्मण्यपि हरं विष्णुं न स्पृशेच्छ्रेय इच्छती ।
सनाथा मृतनाथा वा तस्या नास्तीह निष्कृतिः ॥
—(p. 202)

अकुर्वन् देवतापूजां भुञ्जीयाद् ब्राह्मणो यदि ।
मासर्संख्यांल्लोहपिण्डानश्नाति यममन्दिरे ॥
—(p 303)

बहिर्मासानपत्नान् सूति पतितं च रजस्वलाम् ।
न स्पृशेन्नाभिभाषेत नेक्षेत हरिवासरे ॥
उपवासे तथा श्राद्धे न खादेद् दन्तधावनम् ॥
श्राद्धोपवासदिवसे खादित्वा दन्तधावनम् ।
गायत्र्याः शतसंपूतमम्बु प्राश्य विशुद्ध्यति ॥
—(p. 425)

कांस्यं मांसं मसूरांश्च चणकान् कोरदूषकान् ।
शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियम् ॥
शाकं माषं मसूरांश्च पुनर्भोजनमैथुने ।
घृतमत्यम्बुपानं च दशम्यां वैष्णवस्त्यजेत् ॥
—(p. 430)

स्वाभीष्टदेवतामन्त्रजपं कुर्यात् प्रयत्नतः ।
—(p. 46)

यज्ञे यथा पण्डमूकवनितादिविवर्जनात् ।
—(p 513)

काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।
तत्र काम्यव्रतं कुर्याद् दानार्चनविवर्जितम् ॥
—(p 657)

गोयाने गोवधः प्रोक्तो हययाने तु निष्फलम् ।
नरयाने तदर्धं स्यात् पद्भ्यां तच्च चतुर्गुणम् ॥
तीर्थानुगमनं पद्भ्यां तपः परमिहोच्यते ।
तदेव कृत्वा यानेन स्नानमात्रफलं लभेत् ॥
—(p 730-731)

तीर्थयात्रां प्रकुर्वन्ति दम्भेन कपटेन (च) ये ।
तीर्थे मृता न सिद्ध्यन्ति ते नरा नरकाणि ॥
सर्वस्वेनस्तीर्थयात्रां ब्राह्मणानवमन्यते ।
नासौ प्रतिनिवर्तेत तदन्तं तस्य जीवितम् ॥
तीर्थं गच्छन् द्विजः सन्ध्यास्तिस्र एकत्र ना (वा) चरेत् ।
नाम्नातो नाशुचिर्गच्छेन् न भुक्त्वा न च सूतकी ।
—(p 717-748)

एषु तीर्थेषु यच्छ्राद्धं तत् कोटिगुणमिष्यते ।
यस्मात् तस्मात् प्रयत्नेन तीर्थे श्राद्धं समाचरेत् ।
देशानां तु विशेषेण भवेत् पुण्यमनन्तकम् ॥
—(p 777)

28. तीर्थेन्दुशेखर

कामतोऽकामतो वापि यत् करोति शुभाशुभम् ।
तत्सर्वं त्वयि सन्न्यस्तं त्वत्प्रयुक्तः करोम्यहम् ॥
—(p 52)

29. जयसिंहकल्पद्रुम

तस्मात् कालात्मकं विश्वं स एव परमेश्वरः ॥

—(p 5)

[नक्तव्रतकालनिर्णये कूर्मपुराणेऽपि]—

नरस्य द्विगुणां छायामतिक्रामेद्यदा रविः ।

तदा सौरं चरेन्नक्तं न नक्तं निशि भोजनम् ॥

—(p. 50)

[व्रतादिकर्तृधर्मनिर्णये कौर्मे]—

4. बहिर्गामान्त्यजान् सूर्तिं पतितं च रजस्वलाम् ।

न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ॥

—(p 58)

[व्रते सूतकादिनिर्णये माधवीये कौर्मे]—

काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।

तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितम् ॥

—(p. 64; 126)

[कूर्मपुराणोक्त नागव्रत मदनरत्ने]—

8. तिथौ युगाद्यायां तु समुपोष्य यथाविधि ।

शङ्खपालादिनागानां शेषस्य च महात्मन ॥

पूजा कार्या पुष्पगन्धक्षीराप्यायनपूर्वकम् ॥

—(p. 212)

[तदुक्त कूर्मपुराणे]—

कुम्भे शुक्लचतुर्थ्यां तु कुन्दपुष्पैः सदाशिवम् ।

12. सम्पूज्य यो हि नक्ताशी स प्राप्नोति श्रियं नरः ॥

—(p. 215)

[इति कूर्मपुराणोक्त यमव्रतम्]—

भरण्या तु चतुर्थ्यां तु शनैश्चरदिने यमम् ।

पूज्यते सप्तजन्मोत्थैर्मुच्यते पातकैर्नरः ॥

—(p. 221)

[षष्ठीतिथिव्रतनिर्णये कौर्मे]—

दशसौवर्णिके शृंगे खुराः पञ्चपलान्विताः ॥

16. पञ्चाशत्पलिकं ताम्रं कांस्यं चैतावदेव तु ॥

वस्त्रं तु त्रिगुणं धेन्वा दक्षिणा तु चतुर्गुणा ।

एतैश्चालंकृता धेनुर्घण्टाभूषणभूषिता ॥

कपिला विप्रमुख्याय दत्ता स्वर्मोक्षदा मता ।

—(p. 254)

[अष्टमीतिथिव्रतनिर्णये कौर्मे]—

20. चैत्रे मासि सिताष्टम्यां बुधवारे पुनर्वसौ ।

अशोककुसुमैः रुद्रमर्चयित्वा विधानतः ॥

अशोकस्याष्टकलिका मन्त्रेणोक्तेन भक्षयेत् ।

शोकं नैवाप्नुयान्मर्त्यो रूपवानपि जायते ॥

—(p. 280)

[एकादशीतिथिव्रतनिर्णये कौर्मेऽकवलावत्त]—

24. न शङ्खेन पिबेत्तोयं न खादेत् कूर्मशूकरौ ।

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥

—(p. 399)

[तथा च कूर्मपुराणे]—

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।

वानप्रस्थो यतिश्चैव शुक्लामेव सदा गृही ॥

—(p. 402)

[कूर्मपुराणेऽपि]—

28. संक्रान्त्यां कृष्णपक्षे तु रविशुक्रदिने तथा ।

एकादश्यां न कुर्वीत उपवासं च पारणम् ॥

—(p 402)

[कूर्मपुराणे]—

एकभक्तेन नक्तेन बालवृद्धातुरः क्षिपेत् ।

नातिक्रमेद् द्वादशीं च उपवासव्रतेन च ॥

—(p. 404)

[कूर्मपुराणे]—

32. स ब्रह्महा सुराप स्यात् कृतघ्नो गुरुतल्पगः ॥

—(p. 405)

[तदुक्त कूर्मपुराणे]—

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।

तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ॥

—(p 416)

[कूर्मपद्मपुराणयोः]—

एकादशी दशाविद्धा दशमी न च वर्धते ।

36. तदोपोष्या द्वादशी स्यात् त्रयोदश्यां च पारणम् ॥

—(p. 418)

[कूर्मपुराणवचन]—

एकादशी यदा विद्धा द्वादशी च क्षयं गता ।
क्षीणा सा द्वादशी ज्ञेया नक्तं तत्र विधीयते ॥
—(p 418)

[कूर्मपुराणात्]—

उदयात् प्राग् दशम्यास्तु शेषं संयोग उच्यते ।
—(p 420)

[ब्रह्मवैवर्त कूर्मपुराणे]—

40 एकादशीमुपवसेद् द्वादशीमथवा पुनः ।
विमिश्रां वापि कुर्वीत न दशम्या युतां क्वचित् ॥
—(p 422)

[कूर्मपुराणे]—

कांस्यं मांसं मसूरं च चणकान् कोरदूषकान्
शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियम् ॥
—(pp 424 425)

[त्रयोदशीव्रततिथिनिर्णये कूर्मपुराणोक्ता मदनपूजा तदुक्तं मदनरत्ने]—

44 मधौ शुक्लत्रयोदश्यां मदनं चन्दनात्मकम् ।
कृत्वा सम्पूज्य यत्नेन वीजयेद् व्यजनेन च ॥
तत्र सम्पूजितः कामः पुत्रपौत्रसमृद्धिदः ॥
—(p 567)

[कूर्मपुराणात् प्रदोषरात्रि हेमाद्रौ]—

त्रयोदश्यां तथा रात्रौ सोपवासस्त्रिलोचनम् ।
48 दृष्ट्वा तु प्रथमे यामे मुच्यते सर्वपातकैः ॥
—(p 586)

[पूर्णिमातिथिव्रतनिर्णये कूर्मपुराणे]—

दशसौवर्णिके शृङ्गे खुराः पञ्चपलान्विताः ।
पञ्चाशत्पलिकं ताम्रं कांस्यं वै तावदेव च ॥
वस्त्रं तु त्रिगुणं धेनोः दक्षिणा च चतुर्गुणा ।
52 एतैरलङ्कृतां धेनुं घण्टाभरणभूषिताम् ॥
कपिलां विप्रमुख्याय दत्त्वा मोक्षमवाप्नुयात् ।
द्विगुणोपस्करोपेता महती परिकीर्तिता ॥
दत्ता सा विप्रमुख्याय स्वर्गमोक्षफलप्रदा ।
56 सप्तजन्मकृतात् पापान्मुच्यते दशसंयुतः ॥

यान् यान् प्रार्थयते कामांस्तांस्तानाप्नोति मानवः ।
अन्ते स्वर्गापवर्गौ च फलमाप्नोत्यसंशयम् ॥
—(pp 762 763)

[कूर्मपुराणे]

तिलपूर्णं ताम्रपात्रं सहिरण्यं द्विजातये ।
60 प्रातर्दत्त्वा तु विधिवद् दुःस्वप्नं प्रतिहन्ति सः ।
तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमम् ॥
ताम्रपात्रं दशपलं जघन्यं परिकीर्तितम् ।
द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं स्मृतम् ।
64 स्वर्णमेकं जघन्ये तु द्विगुणं मध्यमे क्षिपेत् ॥
त्रिगुणं चोत्तमे तद्वत् सुवर्णं परिकीर्तितम् ॥
सुवर्णं दक्षिणां दत्त्वा सर्वपापक्षयो भवेत् ।
तिलाः पापहरा नित्यं विष्णुदेहसमुद्भवाः ।
68 तिलदानेन सर्वं मे पापं नाशय केशव ॥
औदुम्बरमनुध्येय स्वर्णबीज तव प्रभो ।
दत्तं गृहाण देवेश पापं संहर सत्वरम् ॥
—(pp 767 768)

[एकादशीव्रततिथिनिर्णये कूर्मपुराणे वैशाखशुक्लपक्षे मोहिन्येकादशीमाहात्म्यम्]—

युधिष्ठिर उवाच

वैशाखशुक्लपक्षे तु किंनामैकादशी भवेत् ।
72 किं फलं को विधिस्तस्याः कथयस्व जनार्दन ॥

श्रीकृष्ण उवाच

कथयामि कथामेतां शृणु त्वं ब्रह्मनन्दन ।
वसिष्ठो यामकथयत्पुरा रामाय पृच्छते ॥

राम उवाच

भगवञ्छ्रोतुमिच्छामि व्रतानामुत्तमं व्रतम् ।
76 सर्वपापक्षयकरं सर्वदुःखनिकृन्तनम् ॥
मया दुःखानि भुक्तानि सीताविरहजानि वै ।
ततोऽहं भयभीतोऽस्मि पृच्छामि त्वां महामुने ॥

वसिष्ठ उवाच

साधु पृष्टं त्वया राम तवैषा नैष्ठिकी मतिः ।
80 त्वन्नामग्रहणेनैव पूतो भवति मानवः ॥

98

तथापि कथयिष्यामि लोकानां हितकाम्यया ।
पवित्रं पावनानां च व्रतानामुत्तमं व्रतम् ॥
वैशाखस्य सिते पक्षे द्वादशी राम या भवेत् ।
84 मोहिनी नाम सा प्रोक्ता सर्वपापहरा परा ॥
मोहजालात्प्रमुच्येत् पातकानां समूहत ।
अस्या प्रभावेण सत्यं सत्यं वदाम्यहम् ॥
अत कारणतो वापि कर्तव्यैषा मवादृशैः ।
88 पातकानां क्षयकरी महादुःखविनाशिनी ॥
शृणुष्वैकमना राम कथां पापहरां पराम् ।
अस्या श्रवणमात्रेण महापाप प्रणश्यति ॥
सरस्वत्यास्तटे रम्ये पुरी भद्रावती शुभा ।
92 द्युतिमान् नाम नृपतिस्तत्र राज्यं करोति वै ॥
सोमवंशोद्भवो राम धृतिमान् सत्यसंगर ॥
तत्र वैश्यो निवसति धनधान्यसमृद्धिमान् ।
धनपाल इति ख्यात पुण्यकर्मप्रवर्तक ॥
96 प्रपासत्रायायतनतडागारामकारक ।
विष्णुभक्तिपर शान्तस्तस्यासन् पञ्चपुत्रका ॥
सुमना द्युतिमांश्चैव मेधावी कृष्णली (?) तथा ।
पञ्चमो धृष्टबुद्धिश्च महापापरत सदा ॥
100 वारस्त्रीसङ्गनिरतो विटगोष्ठीविशारद ।
द्यूतादिव्यसनासक्त परस्त्रीरतिलालस ॥
न देवानतिथीन् वृद्धान् पितृंश्चैव द्विजानपि ।
समानयति नास्तिक्यात् सदा दुःसगलालस ॥
104 अन्यायकर्ता दुष्टात्मा पितुर्द्रव्यक्षयकर ।
अभक्ष्यभक्षक पाप सुरापानरत सदा ॥
वेश्याकण्ठार्पितबाहुर्भ्रमति स्म चतुष्पथे ।
पित्रा निष्कासितो गेहात् परित्यक्त स बान्धवै ।
108 स्वदेहभूषणान्येव क्षयं नीतानि तेन वै ।
गणिकाभि परित्यक्तो निन्दितश्च धनक्षयात् ॥
ततश्चिन्तापरो जातो वस्त्रहीन क्षुधार्दित ।
किं करोमि क्व गच्छामि केनोपायेन जीव्यते ।
112 तस्करार्थं समारब्ध तत्रैव नगरे पुन ॥
गृहीतो राजपुरुषैर्मुक्तश्च पितृगौरवात् ।
पुनर्बद्ध पुनर्मुक्त पुनर्बद्ध ससम्भ्रमै ॥
दुष्टबुद्धिर्दुराचारो निबध्य निगडैर्दृढम् ।
116 कशाघातैस्ताडितश्च पीडितश्च पुन पुन ॥
न स्थातव्यं हि मन्दात्मंस्त्वया मद्देशगोचरे ।
एवमुक्त्वा ततो राज्ञा मोचितो दृढबन्धनात् ॥
निर्जगाम भयाच्चास्य गतोऽसौ गहनं वनम् ।
120 क्षुत्तृषापीडितश्चापमितश्चेतश्च धावति ॥
सिंहवन्निजघानासौ मृगशूकरचित्तलान् ।
आमिषाहारनिरतो वने तिष्ठति सर्वदा ॥
करे शरासनं कृत्वा निषङ्गं पृष्ठसंगतम् ।
124 अरण्यचारिणो हन्ति पक्षिणश्च चतुष्पदान् ॥
चकोरांश्च मयूरांश्च कङ्कान्तित्तिरिमूषकान् ।
एतानन्यान् हन्ति नित्यं धृष्टधीर्निर्गवान् नरान् ॥
पूर्वजन्मकृतै पापैर्निमग्न पापकर्दमे ।
128 दुःखशोकसमाविष्टश्चिन्तयन् सोऽप्यहर्निशम् ॥
कौण्डिन्यस्याश्रमपदं प्राप्त पुण्यागमे क्वचित् ।
माधवे मासि जाह्नव्यां कृतस्नानं तपोधनम् ॥
आससाद धृष्टबुद्धि शोकभारेण पीडित ।
132 तद्वस्त्रबिन्दुस्पर्शेन स पापात्मा गताशुभ ॥
कौण्डिन्यस्याग्रत स्थित्वा प्रत्युवाच कृताञ्जलि ।

धृष्टबुद्धिरुवाच

प्रायश्चित्तं ब्रूहि ब्रह्मन् विना वित्तेन यद् भवेत् ।
आजन्मकृतपापस्य नास्ति वित्तं ममाधुना ॥

ऋषिरुवाच

136 शृणुष्वैकमना भूत्वा येन पापक्षयस्तव ।
वैशाखस्य सिते पक्षे मोहिनी नाम नामत ॥
एकादशी व्रत तस्या कुरु मद्वाक्यनोदित ।
मेरुतुल्यानि पापानि क्षयं नयति देहिनाम् ॥
140 बहुजन्मार्जितान्येषा मोहिनी समुपोषिता ।
इति श्रुत्वा मुनेर्वाक्यं धृष्टबुद्धि प्रसन्नहृत् ॥

व्रतं चकार विधिवत् कौण्डिन्यस्योपदेशतः ।
कृते व्रते नृपश्रेष्ठ हतपापो बभूव स ॥
144. दिव्यदेहस्ततो भूत्वा गरुडोपरिसंस्थितः
जगाम वैष्णवं लोकं सर्वोपद्रववर्जितम् ॥
इतीदृश रामचन्द्र उत्तमं मोहिनीव्रतम् ।
नात्र परतरं किंचित् त्रैलोक्ये सचराचरे ॥
148. यज्ञादितीर्थदानानि कलां नार्हन्ति षोडशीम् ।
पठनाच्छ्रवणाद्राजन् गोसहस्रफलं लभेत् ॥
इति श्रीकूर्मपुराणे माहिन्माहात्म्ये वैशाखशुक्लैकादशी माहात्म्यम् ॥
—(pp 448 450)

[This same मोहिन्येकादशीव्रत occurs also in the *Vrata-rāja* of Śrī Viśvanātha Śarmā of Kāśī (A. D 1736), pub. by Venkatesvara-Press, Bombay, Samvat 2020, A D 1963, pp 556-557 It contains the following variants —

–L73. धर्मनन्दन (→ब्रह्मनन्दन) –L87 पतस्तु कारणाद् गाम (→भन कारणानो वापि) –L89 पुण्यप्रदा शुभाम् (→पापहरा पराम्) L98. द्युतिमान (→गुह्यमान्), सुकृती (→कृपणती ?) –L102 पितॄश्चार्चेद् (→पितॄश्चैव) –L103 O. –L106 भ्रमद्दृष्टिस् (→भ्रमति स्म) –L114 पुनर्मुक्त स वै भटै (→धुनबद्ध ससभ्रमं) –L115 धृष्टबुद्धिर् (→दुष्टबुद्धिर्) –L123 शरासने शर कृत्वा (→करे शरासन कृत्वा), पृष्ठ –(→मुष्टि–) –L126 धृष्टबुद्धिश् स निर्घृण (→धृष्टधीर्निगतान् नरान्) –L129 कौण्डिन्यस्याश्रम प्राप्त कस्माच्चित् पुण्यगौरवात् L132. गतपाप्मा हताशुभ (→स पापात्मा गताशुभ) –L141 इति वाक्य मुने श्रुत्वा (→इति श्रुत्वा मुनेर्वाक्य) –L146 उत्तमोमोहनिकृन्तनम् (→उत्तम मोहिनीव्रतम्)]

30. पुरुषार्थचिन्तामणि

प्रदोषव्यापिनी यत्र त्रिमुहूर्ता यदा दिवा ।
तदा नक्तव्रतं कुर्यात् स्वाध्यायस्य निषेधवत् ॥
—(p. 58)

नरस्य द्विगुणा छायामतिक्रामेद्यदा रविः ।
4. तदा सौरं चरेन्नक्तं न नक्तं निशि भोजनम् ॥
—(p. 59)

माघशुक्लचतुर्थ्यां तु कुन्दपुष्पैः सदा शिवम् ।
सम्पूज्य यो हि नक्ताशी संप्राप्नोति श्रियं नरः ॥
—(p. 120)

सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
8. उत्तरां तु यतिः कुर्यात् पूर्वामुपवसेद् गृही ॥
—(pp 209, 231)

द्वौ तिथ्यन्तावेकवारे यस्मिन् स स्याद्दिनक्षयः ।
तस्मिन् स्नानं जपो होमो नोपवासो गृहाश्रमे ॥
—(p. 244)

बहिर्ग्रामान्त्यजान् सूतिं पतितं च रजस्वलाम् ।
12. न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ॥
—(p 259)

एकादश्यामुपोष्यैवं द्वादश्यां पारणं स्मृतम् ।
त्रयोदश्यां न तत् कुर्याद् द्वादशद्वादशीक्षयात् ॥
—(p 265)

कलाद्वयं त्रयं वापि द्वादशीं न त्वतिक्रमेत् ।
16. अतिक्रान्ता द्वादशी तु हन्ति पुण्यं पुराकृतम् ॥
—(p 265)

31. आचारभूषण

ब्रह्मामुरारिस्त्रिपुरान्तकारि-
र्भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः,
4. कुर्वन्तु सर्वे मम सुप्रभातम् ॥
भृगुर्वसिष्ठः क्रतुरङ्गिराश्च,
मनुः पुलस्त्यः पुलहश्च गौतमः ।
रैभ्यो मरीच्यश्च्यवनश्च दक्षः,
8. सनत्कुमारः सनकः सनन्दनः ॥
सनातनोऽप्यासुरिपिङ्गलौ च,
सप्तस्वराः सप्तरसातलानि ।
सप्तार्णवाः सप्तकुलाचलाश्च,
12. सप्तर्षयो द्वीपवनानि सप्त ॥
—(p. 10)

मरादि कृत्वा भुवनानि सप्त,
पृथ्वी सगन्धा सरसास्तथाप ।
स्पर्शी च वायुर्ज्वलित च तेज:,
16. नभ सशब्द महता सहैव ॥
इत्थ प्रभाते परम पवित्रं,
पठेत् स्मरेद्वा शृणुयाच्च तद्वत् ।
दु स्वप्ननाशस्त्विह सुप्रभातम्,
20. भवेच्च नित्य भगवत्प्रसादात् ॥
—(p 11) [cf Vām-P 14 23-28, see also the Introduction to Appendix 1 p 689]

स्नान सन्ध्या ततो होम गृहस्थोक्तेन वर्त्मना ।
कृत्वा सूर्यं गणपतिं लक्ष्मीमीशं तथा हरिम् ॥
पौरुषेण तु सूक्तेन नित्यमर्चां समारभेत् ।
—(p 202)

24 नाराधयति य सायं देवदेवोत्तम शिवम् ।
स पिशाचो भवेच्चैव नात्र कार्या विचारणा ॥
—(p 325)

इन्दौ वृद्धिक्षय प्राप्ते ब्रह्मयज्ञं न कारयेत् ।
न जपेद् वैदिक मन्त्र गायत्र्यष्टोत्तर शतम् ॥
—(p 399)

Index of common verses ascribed to the Kūrma-Purāna and quoted in more than one Nibandha-works or in more than one places in a Nibandha-work

(अनेकनिबन्धग्रन्थेषूद्धृता कूर्मपुराणस्थत्वेन निर्दिष्टा समाना श्लोकपद्‌क्त्य)

कनकं स्यात् सुवर्णेन—चतु. चि L 18, दा. म. L 4
कनकाश्वतिला नागा—चतु. चि. L 119; स्मृ. त L 30; दा. म. L 1
